९९
४

अथ

११
4

ग्रन्थनाम:-	"भामती" Bhamati	
कर्तृनाम:-	'वाचस्पतिमिश्र प्रणीता'	
विषय:-	'अद्वैत वेदान्त शास्त्रम्'	

861

अथ

"भामती"

वेदान्त

205

११/४

शारीरकभाष्यव्याख्यावाचस्पतिप्रारंभः

वाचस्पतिमिश्रप्रणीता

वा. भ. प्र

श्रीगणेशाय नमः। ॐ अनिर्वाच्याविद्याद्वितयसचिवस्य प्रभवतो विवर्ता यस्यैते वियदनिलतेजोऽबवनयः। यत
श्चाभूद्विश्वं चरमचरमुच्चावचमिदं नमामस्तद्ब्रह्मापरिमितसुखज्ञानममृतं॥१॥ निःश्वसितमस्य वेदा
वीक्षितमेतस्य पञ्च भूतानि॥ स्मितमेतस्य चराचरमस्य च सुप्तं महाप्रलयः॥२॥ षड्भिरङ्गैरुपेताय विवि
धैरव्ययैरपि।शा। श्वताय नमस्कुर्मो वेदाय च भवाय च॥३॥ मार्तण्डतिलकस्वामिमहागणपतीन्वयं॥
म विश्ववन्द्यान्नमस्यामः सर्वसिद्धिविधायिनः॥४॥ ब्रह्मसूत्रकृते तस्मै वेदव्यासाय वेधसे॥ ज्ञानशक्त्यवता
म राय नमो भगवतो हरेः॥५॥ नत्वा विशुद्धविज्ञानं शंकरं करुणाकरं॥ भाष्यं प्रसन्नगंभीरं तत्प्रणीतं विभ
ज्यते॥६॥ आचार्यकृतिनिवेशनमप्यवधूतं वचोऽस्मदादीनां॥ रथ्योदकमिव गङ्गाप्रवाहपातः पवित्रय
ति॥७॥ अथ यदसंदिग्धमप्रयोजनं च न तत्प्रेक्षावत्प्रतिपित्सागोचरो यथा समनस्केन्द्रियसंनिकृष्टः स्फीता
लोकमध्यवर्ती घटः करटदन्ता वा तथा चेदं ब्रह्मेति व्यापकविरुद्धोपलब्धिः॥ तथा हि। ब्रह्म चाहं इत्यनुगात्मा
आत्मैव ब्रह्मेति गीयते। स चायमाकीटपतगेभ्यः आ च देवर्षिभ्यः प्राणभृन्मात्रस्येदंकारास्पदे
भ्यो देहेंद्रियमनोबुद्धिविषयेभ्यो विवेकेनाहमित्यसंदिग्धाविपर्यस्तापरोक्षानुभवसिद्ध इति न जिज्ञा
स्यः। न हि जातु कश्चिदत्र संदिग्धेऽहं वा नाहं वेति॥ न च विपर्यस्यति नाहमेवेति॥ न चाहं कृशः स्थूलो गच्छामी हिं
त्यादिदेहधर्मसामानाधिकरण्यदर्शनाद्देहालंबनोऽयमहंकार इति सांप्रतं। तदालंबनत्वे बाल्येपि
तावच्चास्त्वं स एव स्थाविरे प्राप्नु मनुस्मरामीति प्रतिसंधानं न भवेत्॥ न हि बालस्थविरशरीरयो
रस्ति प्रत्यभिज्ञानगंधो येनैकत्वमध्यवसीयेत॥ तस्माद्येषु व्यावर्तमानेषु यदनुवर्तते तत्तेभ्यो

१

भिन्नं यथा कुसुमेभ्यः सूत्रं तथा च बालादिशरीरेषु व्यावर्त्तमानेष्वपि परस्परमहंकारास्पदमनुवर्त्तमा
नं तेभ्यो भिद्यते। अपि च स्वप्नान्ते दिव्यशरीरभेदमास्थाय तदुचितान् भोगान् भुंजान एव प्रतिबुद्धो मनुष्य १।२
मात्मानं पश्यन्नाहं देवो मनुष्य एवेति देहे वशरीरे वाच्यमानेऽपि अहमास्पदमवाच्यमानं शरीरादि
न्नं प्रतिपद्यते। अपि च योगव्याघ्रशरीरेऽपि आत्मानमभिन्नमनुभवतीति नाहंकारालंबनस्य प्रत्यभि
ज्ञानात् विषयेभ्यः स्वस्य विवेकः स्फुटीयानेव। ×देहः। अत एवेंद्रियारामप्यस्यालंबनमिंद्रियभेदेऽपि यो ने ५
हमद्राक्षं स एवेतर्हि स्पृशामी खड्गमालंबन× बुद्धिमनसोश्च कारणयोरस्मिन्निति कर्तृज्ञातिमासप्र
५ भ्यानालंबत्वायोगः। व्योमाहमंचोहमित्यादौ तु प्रयोगाः असत्यजने देवार्थचिन्मे नाः को पाती स्यादिवदौपचा
रिक इति युक्तमुत्पश्यामः। तस्मादिदंकारास्पदेभ्यो देहेंद्रियमनोबुद्धिविषयेभ्यो व्यावृत्तः स्फुटतरस्मत्प्र
त्ययगम्य आत्मास्मायाया भावादजिज्ञास्य इति सिद्धं। अध्यासोऽपि च वाच्यः। तथा हि संसारनिवृत्तिरपवर्गस्तत्प्र
योजनं विवक्षितं। संसारश्चात्मयाथात्म्यानवगमनिमित्त आत्मयाथात्म्यज्ञानेन निवर्त्तनीयः स चेदयमना
दिरनादिना ... याथात्म्यज्ञानेन सहानुवर्त्तते कुतोऽस्य निवृत्तिरविरोधात्। कुतश्चात्मयाथात्म्यानव
बोधो न सुखमित्यनुभवादन्यदात्मयाथात्म्यज्ञानमस्ति। न चाहमिति सर्वजनीनः स्फुटतरानुभवसमर्पि
तात्मा देहेंद्रियादिव्यतिरिक्तः शक्य उपनिषदां सहस्रैरपि अन्यथयितुं। अनुभवविरोधात्। न ह्यागमाः
सहस्रमपि घटं पटयितुमीशते। तस्मादनुभवविरोधात् उपचरितार्था एवोपनिषद इत्युक्तमुत्सश्मा
मरसाधारणमवान्तरशंकापरिहरति। युष्मदस्मत्प्रत्ययगोचरयोरिति। अत्र च युष्मदित्यादि मिथ्याज्ञाननिमित्तमुक्त
मिसंगः शंकाग्रंथः। तथापीत्यादिः परिहारग्रंथः। तथापीत्यभिसंबंधात् शंकायां यद्यपीति पठितव्यं। इदमस्म

मिथ्याशब्दोऽपन्हववचनः। एतदुक्तं भवति। अभ्यासो भेदानुमितेरव्याप्तस्तत्छिन्नकदेवे हास्ति भेदं नेत्यत्र
निवर्त्तयंस्तव्याप्तमभ्यासमपि निवर्त्तयतीति। मिथ्यातिमविशुद्धक्तं यद्यपितथापीति भोजनाः। इदम्
जाकृत्तमवेदेतरदेवं यदपरुषभिप्रायत्वमवोऽस्मात् तत्प्रकाशितेन तेन तदस्तित्वेनप्याहि स्म तत्तोपाध्यनवधि
न्नानेतानंदव्वेतन्ये कर समुदासीनमेकमद्वितीयमासत्तत्वं श्रुतिस्मृतीतिहासपुराणो ऽभीमतो।
न चैतान्युपक्रमोप[redacted]यामशौ पससहार्देः क्रिया समभिव्याहारेणोदस्मात् तत्त्वं अपि द चनीतत
स्परादिास्तं तित्र क्वानि शक्तैरााभ्युपचरितान्यीनि कार्त्तुं। अभ्यासे न हि भेदयस्तत्त्वमर्थस्य भवति। य
थाहोदशीनीया होदशीनीयेति। नाल्पत्वमपि। प्रागेवोपरितत्वमिति। अरुमनुभवस्तु प्रादेशिकाप
ने कविच्छो नादुःस्वादिप्रपंचोय श्रुतमासानमादर्शायन्न कायमासं तत्तगोचरः कथं चानुपल
वः। न च ज्येष्ठप्रमाणास्त्य सर्वविरोधादाम्नायस्यैव तद्रूपेक्षस्य प्रामाण्यमुपचरितार्थत्वे
तिमुक्तं। तस्यापौरुषेयतया निरस्तसमस्तदोषाशंकस्य बोधकतया च स्वतःसिद्धप्रमाणभावस्य
स्वकार्ये प्रमितौ परानपेक्षत्वात्। प्रमितावनपेक्षत्वेपि उत्पत्तौ प्रत्यक्षापेक्षत्वात्तद्विरोधादनुत्पत्ति
मिति लक्षणामस्याः प्रामाण्येचेत्। नोत्पादकाजातिर्द्विलात्। न लागमज्ञानं सो व्याबहारिकं प्रसमस्त-
प्रामाण्यमनुपलभ्यते। येन कारणाभावान्न भवेदपि तु तात्त्विकं। न चैतन्नत्तस्योत्पादकं। अनात्विकं
प्रमाणाभावेप्योपि सोव्यवहारिकेभ्यः तत्र ज्ञानोत्पत्तिदर्शनात्। तथा च वर्णो ह्रस्वदीर्घतादयो ऽन्यच्च
मी अपि समारोपितास्तत्त्व जातिपत्तिरुत्पत्तेः। नहि लौकिका नाग इतिवा नगइति वापदात्। कुंजरत्वात

।न्या·टी·वा·

ऽवाप्रतिपद्यमाना न वर्तितुं भ्रांता॥ न चानन्यपरं वा [illegible] कथं स्वार्थे उप[illegible]चरितार्थमुक्तं उक्तं हि न विशेष
नःशब्दार्थ इति ज्येष्ठत्वं चानपेक्षितस्य बुध्यते हेतुर्नतु बाधकत्वेन जातज्ञानस्य ज्यायस्त्वं शुक्तिज्ञाने
न कनीयसा बाध्यदर्शनात्। तदनन्तरं वा पूर्वं तद्रूपं वा तास्मिन्नसत्त्वस्योत्पत्तेरनुपपत्तिः॥ दर्शितं च तात्त्विक
प्रमाणाभावस्यानपेक्षत्वं। तथा च पारमर्षं सूत्रं। पौर्वापर्ये पूर्वदौर्बल्यं प्रकृतिवदिति। तस्मात्सर्वोत्तम
बलीयस्त्वं तत्र नास्मत्प्रतीयते। अन्योन्यनिरपेक्षाणां यत्र जन्म धियां भवेत्॥ अपि च येष्वहंकारास्पदमा
त्मानमाश्रित्य वर्तते। तैरप्यस्य न तात्त्विकत्वमभ्युपेतव्यं। अहमिहैवास्मि सदने जानान इति सर्वव्यापिनः
प्रादेशिकत्वेन ग्रहणात्। उच्चैस्तरगिरिशिखरवर्त्तिषु महातरुषु भूमिष्ठस्य दूर्वाप्रवालनि[illegible]
[illegible] भासप्रत्ययवत्। न चैवं देहस्य प्रादेशिकत्वमनुभूयते तेन तस्मिन्न[illegible]ति सा प्रतीतिः। नहि तदेवं नवति
अहमिति गौणत्वेवा न जानान इति। अपि च परशब्दः परत्र लक्ष्यमाण[illegible]गुणयोगेन वर्त्तेत
५ इति यत्र प्रायोऽस्य प्रतिपत्तॄणां संप्रतिपत्तिः स गौणः [illegible] स च भेदप्रत्ययपुरस्सरः। तद्यथा नेयमग्निका
ग्निहोत्रवचनोऽग्निहोत्रशब्दः प्रवर्त्तमानस्तदावद्यत्तभेदे कुंडपायिनामयनगतेष्वपि मासमग्निहो
त्रं जुहोतीत्यत्र साध्यसाधनरूपेण गौणः। माणवके चानुभवसिद्धभेदेऽग्नि[illegible] शब्दः न त्वहंकार
स्य सुखव्यापीनिलुंठितगर्भतया देहादिभ्यो भिन्नोऽनुभूयते येन परशब्दः शरीरादौ गौणो भवेत्। न
चास्ततनिरूढतया गौणोऽपि न गौणगताभिमानः सार्षपादिषु तैलशब्दवदिति वेदितव्यं। तत्रापि तैलत्व
तिलभवात्स्नेहाद्द्रव्यसार्षपादीनां तैलशब्दवाच्यत्वमात्राभिमानो न त्वनयोस्तैलसार्षपयोर्भेदा
ध्यवसायः। तत्र हि इंद्रियागोचरसूक्ष्मविवेकविज्ञान[illegible]व्याप्तं तदिह व्यापकं विवेकविज्ञानं निवर्त्तमानं गौणता ३
त्वप्रदर्शि नोगोऽ१

नाम्यपिनिवर्त्तयति। नच बालस्थविरशरीरभेदेपि सोऽहमित्येकस्यात्मनः प्रतिसंधानाद्देहादिभ्यो भेदेन
सिद्धात्मानुभव इति वाच्यं। परीक्षकाणां खल्वियं कथा न लौकिकानां। परीक्षका अपि व्यवहार[illegible]समयेन
लोकसामान्यमनुवर्त्तन्ते। वक्ष्यत्यनंतरमेव हि भगवान् भाष्य[illegible]कारः। पश्वादिभि[illegible]विशेषादिति।
बाह्या अप्याहुः। शास्त्रचिंतकाः खल्वेनं विवेचयंति न प्रतिपत्तार इति। तस्माद्विशेष्याच्छिदात्मगोचरमहंकारमा
त्मालंबिनं सदन इति प्रयुंजानो लौकिकः शरीराद्यभेदमुल्लिहात्मनः प्रादेशिकत्वमभिमन्यते। न·न सर्वघटम
२ ह्निकाद्युपाध्यवच्छेदादिति युक्तमुत्पश्यामः। नचाहंकारग्राह्यात्मा यद्देहांदिदात्मापि प्रादेशिक इति युक्तं। तदा
ऽणुत्वमप्यणुपरिमाणो वा स्यात्। देहपरिमाणो वा। अणुपरिमाणत्वे स्थूलोऽहं दीर्घ इति च न स्यात्। देहपरिमा
णत्वे तु सावयवत्वाद्देहवदनित्यत्वप्रसंगः। किंचास्मिन्पक्षेऽवयवसमुदायो वा चेतयेत्। प्रत्येकं वाऽव
यवाः। प्रत्येकं चैतन्यपक्षे बहूनां चेतनानां स्वतंत्राणामैकवाक्यताभावात्। अपर्यायं विरुद्धदिक्क्रि[illegible]
तया शरीरमुन्मथ्येत। अक्रियं वा प्रसज्येत। समुदायस्य तु चैतन्ययोगे वक्तव्य एकस्मिन्नवयवे विदासे
नाप्यवयवो वक्तव्य इति न चेतयेत। न च बहूनामवयवानां परस्पराविनाभावनियमो दृष्टः। यएव
यदावयवो वि[illegible]रीरीः तदा तदभावेन चेतयेत्। विज्ञानालंबनत्वेप्यहंप्रत्ययस्य भ्रांतत्वं तस्य[illegible]
वस्थमेव तस्य स्थिरवस्तुनिर्भासत्वात्। अस्थिरत्वाच्च विज्ञानानां। एतेन स्थूलोहं अंधोहं गच्छामीत्या
द्योप्यध्यासतया व्याख्याताः। तदेवमुक्तेन क्रमेणाहंप्रत्यये प्रतीकूष्मांडीवते भगवती श्रुतिरप्र
त्यक्षं कर्त्तृत्वभो[illegible]क्तृत्वदुःखशोकाद्यात्मत्वमहमनुभवप्रसंजितमात्मनो निषेद्धुमर्हतीति। तदेवं प्रवा

सर्वे १

प्रतिकूलेच४ ... तो ... द्र२ खा।

दिग्भ्रतिमस्य तीतिसस पुराणा त्रथित्त मिथ्याला वस्याहं त्रयस्यस्वरूपनिमिपकाले रूपव्यां नमन्यो
भा.टी.वा. मस्मिन्नित्यादि। अत्रचान्यो। न्यस्मिन्न धर्मिणिआ त्मस्मरीरादौ अन्यो न्यात्मकतामध्यस्याहमितिव
त्ति चस्तु तोनप्रतीतः। लोकव्यवहारो लोकानां व्यवहारः सचायमहमितिव्यपदेशः। इतिशास्त्र चितश्च श
रीराघनुकूलेप्रमेयजातं प्रमाणेन प्रमायतदुपादानपरिवर्जनादिरन्योन्यधर्मांश्चाध्यस्यान्योन्य
स्मिन्धर्मिणि देहादिधर्मान् जन्ममरणजरा व्याध्यादीनात्मनि धर्मान्यध्यात्मस्त्ते देहादिषा वेत्समारो
प्यात यान्चैतन्यादीनात्मधर्मान् देहादाव ध्यस्तात्मनावेसमारोप्यममेदंजरामरणपुत्र पश्वस्त्राण्यादी
शकि तिव्यवहारोव्यपदेशाबद्धस्तु चितश्चतदनुरूपः प्रवसाद्धिः। अत्रचाध्यासव्यवहारक्रियाध्यायः कर्त्तानीतः
समानकर्त्तृ केनाध्यस्यव्यवहारइत्युपपन्नं। पूर्वकालत्वस्तु चित्तमध्यासस्य व्यवहारकारणत्वं
ससमानइति८ स्तुयति। मिथ्याज्ञाननिमित्तो व्यवहारः मिथ्याज्ञानमध्यासस्तन्निमित्तस्तज्ञावाभावानुविधाना
आवे त्वं व्यवहारभावोयोरित्यर्थः। तदेवमध्यासस्वरूपं फलंच व्यवहारमुक्तो तस्यनिमित्तमाह। इतरेतरा
विवेकेन। विवेकाग्रहेणेत्यर्थः। अथा विवेक एवकस्मान्नभवति। तथाचना ध्यासइत्यत आह। अ
त्यंतविविक्तयोर्धर्मधर्मिणोः। परमार्थतः धर्मिणोर त्यंतास्यविवेकः। धर्मीणां चात्यंतविवेकः।
स्यादेतं [redacted] स्तु सतो नैदाग्रहनिबंधनः तादात्स्यविभ्रमोऽपुज्यते शुक्तौरिवरजतादिदाग्रहनिबंधन [redacted]
विविक्तयोर्व [redacted] ननादेरग्रहनिबंधनस्तादात्म्य भ्रमः। इत्युत्तमरमार्थसत्तविदात्मनो। स
स तस्मिन्नंनदेहाघस्तिवस्तुं तत्कृत श्रिवदोगह। कुतश्चतादात्म्यविभ्रमइत्यत आह। सत्यानृत्ते मिथुनीकृत्यवि त
वेकाग्रहाद्व्यास्येतियोजना। सत्यंचिदात्मा अनृतं बुद्धीन्द्रियदेहादितेह धर्मीर्द्दती मिथुनीकृत्य प्राणीवस ४
[redacted]

त्मनो भेदः २

प्रतीयमानस्य·

स नवसंवृत्तिश्च परमार्थतोः पारमार्थिकं। मिथुनमस्तीत्यस्य तत्तत्राबाधितार्थस्य चेः प्रयोगः। एतदुक्तं भवति। अप्र
तीतस्यारोपायोगात्। आरोप्यस्य प्रतीतिरुपयुज्यते न वस्तुसत्तेति। स्यादेतत्। आरोप्यस्य प्रतीतोसत्या
नी पूर्वदृष्टस्य समारोपः समारोपनिबंधनं च प्रतीतिरिति दुर्वारं परस्पराश्रयत्वमित्यत आह। नैसर्गिक ... इति।
स्वाभाविको ऽनादिरयं व्यवहारः। व्यवहारानादित्वेन तत्कारणस्याध्यासस्यानादित्वोक्ता तत्तदपूर्वपूर्व
प मिथ्याज्ञानोपदर्शितस्य कर्त्तृत्वादिप्रपञ्चस्य देहादेरुत्तरोत्तराध्यासोपयोग इत्यनादित्वाद्बीजांकुरवन्न परस्पराश्र
यत्वमित्यर्थः। स्यादेतत्। अध्यारोपे प्रतीतिमात्रमुपयुज्यते आरोपे न तु परमार्थसत्त्वाप्रतीतिरेव त्वसंभ
पप सतो गगनकमलिनीकल्पस्य देहेन्द्रियादेर्नोपपद्यते। प्रकाशमानत्वमेव हि चिदात्मनोपि सत्त्वं न तु तदति
रिक्ता सत्तासामान्यसमवायो ऽर्थक्रियाकारितावोच्छितापत्तेः सत्तायाश्चार्थक्रियाकारितायाश्च सत्तान्तराप
क्रियाकारितान्तरकल्पने ऽनवस्थापातात्। प्रकाशमानत्वे च सत्तारूपे तव्या। तथा च देहादयः प्रकाशमा
मा नत्वान्नासन्तमिव सदासन्त्। असत्त्वे वा नरविषाणवत्। तत्कथं सत्यानृते मिथुनीभावः। तत्राह। वाक्यस्य कुतो भेदाग्र
आ हस्तस्य संभवे कुतो ऽध्यासस्त्वाशयवानाह। आह को ऽयमध्यासो नाम क इत्याक्षेप्तेः। स माधातात्तु ... लोक
सिद्धमध्यासलक्षणमाचक्षाणः परवादिपरिक्षिपति। उच्यते। स्मृतिरूपः परत्र पूर्वदृष्टावभासः। अवसन्नो
वमतो वाभासो ऽवभासो ऽत्यपातनं बाधः ... स्याबसादो ऽवमानो वा ... एवमुक्ते मिथ्याज्ञानमित्युक्तं भवति।
तस्येदमुपव्याख्यानं पूर्वदृष्टेत्यादि पूर्वदृष्टस्यावभासः पूर्वदृष्टावभासः। मिथ्याप्रत्ययश्चारोपविषया
रोपणीयमिथुनमंतरेण न भवतीति पूर्वदृष्टग्रहणेनानन्तरमारोपणीयमुपस्थापयति। तस्य च दृष्टत्वमात्र
मुपयुज्यते। न वस्तुसत्त्वमिति दृष्टग्रहणेन तथापि वर्त्तमानं दृष्टं दर्शनेनारोपोपयोगीति पूर्वमित्युक्तं। न च पूर्वदृष्टस

भा·टी·वा·

रूपेण सदृश्यारोपणीयत्वं यानिर्वाच्यमित्युक्तं· आरोपविषयं सत्यमाह· परत्रेति· परत्र शुक्तिकादौ परमा
र्थसतीति तदनेन सत्यानृतमिथुनमुक्तं। स्यादेतत्· परत्र पूर्वदृष्टावभासः इत्यलक्षणमिति व्यापकत्वात्· अ
स्ति हि स्वभक्तिमसंगविपूर्वदृष्टस्यागो तस्य परत्र कालाक्ष्यामवभासः। अस्ति च पाटलिपुत्रे पूर्वदृष्टस्य देवद
त्तस्य परत्र माहिष्मत्यामवभासः समीचीनः अवभासपदं च समीचीनेपि प्रसिद्धं यथा नीलस्यावभा
सः पीतस्यावभास इत्यत आह। स्मृतिरूप इति· स्मृतेः रूपमिव रूपमस्येति स्मृतिरूपः। असन्निहितविषयत्वं
च स्मृतिरूपत्वं सन्निहितविषयं च प्रत्यभिज्ञानं समीचीनमिति नातिव्याप्तिः। नाप्यव्याप्तिः स्वप्नज्ञानस्या
पि स्मृतिविभ्रमरूपस्यैवं रूपत्वात्· तत्रापि स्मर्यमाणोपि· पित्रादौ नि· [illegible] दोषवशाद्दर्शनाभिमाना
परामर्शात्तत्र पूर्वदृष्टस्यैव सन्निहितदेशकालत्वस्य समारोपः। एवं पीतः शंखः तिक्तो गुड इत्यत्रापि ए
तद्र समायोजनीयं· तथाहि बहिर्विनिर्गच्छ[illegible]नयनरश्मिसंसृष्टोपि त्तद्रव्यवर्तिनी पीततापित्तरहितां
ने अनुभवन्नास्वचरोपाकाद्दित्तगुलिमामत्र भवन्पीततायाः शंखस्वात्संबंधमननुभवन् असंबंधाग्रहसा
रूप्यापीतं तपनीयपिंडं पीतं बिल्वफलमित्यादौ पूर्वदृष्टसामानाधिकरण्यपीतत्वस्यारोपः [illegible]
पीतशंख इति· [illegible] एतेन तिक्तो गुड इति प्रत्ययो व्याख्यातः। एवं विज्ञाने पुरुषाभिमुखं आदर्शा
दिकादिषु स्वचक्षुश्चाप्यन्तर्जालं तमपि बलीयस्तमपायेन तेजसा प्रतिस्रोतः प्रवर्तितं मुखसंपृक्तं स्वमुखं गृह्णत्
दोषवशात्तद्देशतामनभिमुखतां च मुखस्यामारोपयत् [illegible] बहिष्ठाभिमुखवादर्शीदृकदेशतामभिमुखं च मुख
स्यापि प्रतीति प्रतिबिंबविभ्रमोपि लक्षितो भवति· एतेन दिक्चंद्रमोहालातचक्रगन्धर्वनगरशाखाग्रादिविभ्रमोपि
व्यपि यथायथमवलक्षणं योजनीयं· एतदुक्तं भवति· न प्रकाशमानतामात्रं सत्त्वं येन रजतादेः प्रकाशमानता ५

गे हिग इ्वा८

२का नु शितो गर

यस्य सद्भावेन भवेत् न हि सर्पादिभावेन रज्ज्वादयो वास्तव दयो वा अरूप्यादिषु राग्यो न प्रतिभान्ति नासत्त्व
नावान्न वर्त्तितरां सा न कर्द्दमो रागो वा तथा सति मरुमरीचीचयस्तु त्वं पच उज्ज्वल गगनं गंगमाल्यपमन्यर्गी
न वैमनी तीर्थमिदं किनी स्थमिसचायप्रवृत्तस्तत्तोयमापीय पिपासामुपशमयेत् तस्मादकामेनाप्यारोपितस्य
ने प्राकाशमानस्यापि वस्तुसत्त्वमभ्युपगन्तव्यं नु च मरीचिरूपेण सलिलमवसेसत्व [redacted] रूपेणानुपलभ्यमान
वदेशेन्द्रियादयस्तु स्वरूपेणाध्यवसानं स्वलक्षण बगोचरत्वात् कथमारोपयन्तरिति चाभ्रं तं प्रतीयमानं
नवगोचरः कथं तन्निमिरीच्यादीनामभूतानी यत्तयाच्च भवगोचरत्वं न च स्वरूपसत्त्वं नतो भासमानापि सती
तु भवति यन्चयेत् ना नाभावाना मभावादन्य कश्चिद् दृष्टि अपि च भावएव भावान्तरात्मना अभाव स्वरूपेणानुभा
वः यथाहुः भावान्तरमभावो हि कयाचिन्नु व्यपेक्षया इति तत्र स्वभावास्वभावो पाध्येयत्तया स्य वत्स्यतानुभवगोचरता
उ प्रपञ्चस्य पुनरत्यन्तासत्तो निरस्तसमस्तसामर्थ्यस्यानिःस्वस्य कुतो भवविषयभावः कुतोवा चिदास्पद्भासो
पः न च विषयस्य समस्तसामर्थ्य विरहेऽपि ज्ञानमेव तत्तादृशं स्वप्रत्यय सामर्थ्यात् स्यादिति दृष्टं नहि द्रव्यभावभेद
स मुपजातमसतः प्रकाशमानं तस्माद प्रकाशान शक्तिरेवास्याक्षिपेति सा प्रत्ययतो ऽपमसत्यकाशनयाकि वि
ज्ञानस्य किं पुनरस्याः शशक्तः असदिति चेन्न किमेतत्कार्यमाह अविरस्याज्ञाप्य न तावत्कार्यमभूतस्त्वा
नुपपत्तेः नापि ज्ञाप्यं ज्ञानान्तरानुपलब्धेरनवस्थापाताच्च विज्ञानस्वरूपमेवासतः प्रकाश इति चेत् का उ
न्वेवमसदत्तो सबधो ऽसदधीननिरूपणस्य सतो ज्ञानस्यासता संबन्ध इति चेदवश्यं तत्तापमपि निर्वक्तव्य
मतयस्वीयस्यासत्त्वापि निरूपणाभावयत्ते न च प्रत्ययमस्तनाय तेकिञ्चित् असतत्ज्ञा च स्याता यो गात् अथ
दत्तेराज्ञस्य योन त्वर्थ इति प्रत्ययस्यैव स्वभावानुस्तसदधीनमस्य किं चि [redacted] दिति चेन्न अत एव
नास्यास्तत्त्वस्य पातो पमत दुत्पत्तिरतदात्म्याच्च तदविनाभावनियमतः प्रत्यय इति तस्माद्यस्य नासतः प्र
तीरेन्द्रियादयो निरस्तज्ञानानुभवविजयामविन्तुमर्हन्तीति अत्र स्म निरस्तं चेन्नानुभवगोचरत्व

ते

किंमिरीचीमरीचयोपितोयात्मना सतत्त्वाः यद्यनुभवगोचराः स्युर्न स्युर्वा तदात्मना मरीचीनामसत्त्वात्॥ त१
भा·टी·वा· द्विविधं च वस्तूनां तत्त्वं सत्त्वमसत्त्वं चा तत्र सद्वस्तु सत्तः परं तु रूपं तत्ः। यथाहुः। स्वरूपपररूपाभ्यां नित्यं सदसदात्म
के। वस्तु निजाप्यते किंचिद्रूपं कैश्चित्कदाचनेति। तर्हि मरीचिषु तोयं निर्भासमानं सत्प्रत्ययगोचरः। तथा च मरीचीन च३
इति न भ्रान्तो नाधिबाध्येत। अद्यान बाध्येत। यदि मरीचीन तोयात्मतत्त्वान्न। अतो यात्मना गृहीयात्।
तोयात्मना तु गृ [illegible] न्न कथम्भ्रान्तः कथं वा ऽबाध्यः। इतस्ततोयाभावात्मना मरीचीनां तोयमभावात्मत्व
तावन्न सत्। तेषां तोयाभावाद्भेदेन तोयभावात्मतानुपपत्तेः। नाप्यसत्। वस्त्वन्तरमेवं हि स्वस्तं स्यासत्वमा २६
स्थीयते। भावातत्सम्भावो न्यो न कश्चिद्दनिरूपणादिति बदैर्भिः। न चातोपितं रूपं वस्त्वन्तरं तर्हि मरीचयो बाध्नवत्तुः। ६०
गांगादिगततोयं वा। पूर्वस्मिन्काले मरीचय इति प्रत्ययः स्यात्। न तोयमिति। उत्तरस्मिन्नु गांगमम्भातोयमिति स्यान्न पुन
सं·त म रिति। देशभेदास्मरणात्तोयमिति स्यान्न पुनरिहेति। न चैवमस्ति। निरस्तसमस्तस्वरूपमलीकमेवाविलसतीति सांप्रतं॥
तस्यानुभवगोचरत्वानुपपत्तेरित्युक्तमधस्तात्। तस्मान्न सन्नासन्नापि सदसत् परस्परविरोधादिति। अनिर्वाच्यमेवा
रोपणीयं मरीचिषु तोयमास्थेयं। तदनेन क्रमेणाख्यातौ तोये परमार्थे [illegible]ति यमिव। अत एव दृष्टमिव तत्त्व
तद्भुतं तोयं। न चायं दृष्टं किंचन्तत्त्वमनिर्वाच्यं। एवं च देहेन्द्रियादिप्रपंचोप्यनिर्वाच्यो ऽध्यस्तो पि तद्वदमिथ्याप्र
स्यापूर्वरीतिभवप्रपञ्चविद्यमानस्याध्यस्तत इति उपपन्नं। अध्यासलक्षणयोगात् [illegible]न्द्रियादिप्रपंचवाच्यन
चापपारमिथ्यन्त। चिदात्मानुभूति स्फुरतीति हास्तदुपरागो चैतन्यमूलं तदविद्यान्यायानिर्वाच्यतः। शुद्धबुद्धमुक्तस्वभावा २३
सत्त्वेन वानिर्वाच्यो बाधितस्वयंप्रकाशतेवास्यात्तत्ता। सा च स्वरूपमेव चिदात्मनः। ननु न व्यतिरिक्ता सत्तासामान्यस्त
मवायोऽधिक्रियाकारिता वा इति सत्त्वमवदात। तच्चायमेवं लक्षणाको ऽध्यासोऽनिर्वचनीयः सर्वेषामेव सम्म ६

तत्परीक्षकाणां तन्द्रेदे परं विप्रतिपत्तिरित्यनिर्वचनीयतां द्रढयितुमाह। तत्र केचिदन्यत्रान्यधर्माध्यासे
इति वदन्ति। अन्यधर्मस्य ज्ञानधर्मस्य रजतस्य ज्ञानाकारस्येति यावत्। अध्यासोऽन्यत्र बाह्ये। सौत्रान्तिक
नये तावन्न बाह्यमस्ति। वस्तुसत्तत्र ज्ञानाकारस्यारोपः विज्ञानवादिनामपि यद्यपि न बाह्यं वस्तुसत्तथा
ना प्यविद्यावासनोपितं नीलादिकं बाह्यं तत्र ज्ञानाकारस्यारोपः। उपपत्तिश्चेयमाभ्यामनुभवसिद्धरूपत ना
ज्ञानानामिव बाह्यमुपपत्त्या इदन्तु सर्वोऽन्यथोपपत्तौ पुनरस्य बलवद्बाधकप्रत्ययपदवी। नेदं रजतमिति तु बा
धस्येदन्तामात्रबाधेनाप्युपपत्तौ न रजतगोचरतोचिता। रजतस्य धर्मिणो बाधे हि रजतत्वमतत्स्य तु धर्मदे
त्ता बाधितैव भवेत्। तत्र इदं त्वेन वा स्वधर्मी बाध्यतां। ननु न रजतत्वमपि धर्मि। तथा च रजतत्वबहिरबाधितमपि
धान्तरेण ज्ञाने व्यावर्तिष्यत इति ज्ञानाकारस्य बहिरध्यासः सिद्ध्यति। केचित्तु ज्ञानाकारस्य तावद्बहिरुष्ण्य
तावदन्ति। यत्र यदस्यास्तस्तत्र हि वेकाग्रहनिबन्धनो भ्रमः। इति। अपरितोषकारणं चाहुः। विज्ञानाकारत्वमर
नतादेरनुभवाद्व्यवस्थाप्यते। अनुमानाद्वा। तत्रानुमानं नमु परिशिष्टाज्जियाकारिष्यते। अनुभवो
जतादेरनुभवाद्व्यवस्थाप्यते। बाधकप्रत्ययो वा। न तावद्रजतानुभवः स हि इदङ्कारास्पदं रजतमावेदय
पि रजतप्रत्ययो वा स्यात्। बाधकप्रत्ययो वा। न तावद्रजतानुभवः स हि इदङ्कारास्पदं रजतमावेदय
ति। न त्वान्तरं। अहमिति हि तत्स्यात्। प्रत्ययनुः प्रत्ययादव्यतिरेकात्। श्रोतं विज्ञानमथाकारमेवबाह्यान्
पाच्यवस्यति। तथा च नाहङ्कारास्पदमस्य दृष्टो चरो ज्ञानाकारता पुनरस्य बाधकप्रत्ययप्रवेदनीय
मालेव
य तिचेत्। हन्त बाधकप्रत्ययं तावद्बुध्यान्। किं पुरोवर्ति द्रव्यं रजतादिवेचयसारो ज्ञानाकारतामप्यस्य
वीर्यति। तत्र ज्ञानाकारतापदर्शनव्यापारं बाधकस्य बुवाणाः श्लाघनीयप्रज्ञो देवानांप्रियः पुरोवर्ति
लप्रतिषेधात्प्रयोरस्यता बनाकारत्तेतिचेन्न। असन्निधानात्मन[redacted]निषेधात्त्असन्निहितान्नवति
जतिपत्तुः। असन्ततसन्निधानेत्वस्य प्रतिपत्ताकुतस्त्यं। नचैवं रजतस्य निषेधो न चैदन्तायाः। किन्तु

Ksh.

भा॰टी॰टी॰ विवेकाग्रहजसं...जित्तस्य रजतव्यवहारस्य। नच रजतमेव शुक्तिकायां संजिते रजतज्ञानेन नहि र
जतत्तिनीस्य नशुक्तिकालेवमेयुत्तामनु नबाधिरोध्यान्। नवबलुसत्तामात्रेमालबनमिति प्रसंगात् सर्वेषाम्
विशेषा र्थानां सत्त्वालंबन तत्त्वप्रसंगात्। नाधिकारणत्वेनेंद्रियादीनामपि कारणत्वात्। तथा च भासमानत्वेनालंब
नार्थः। नच रजतत्वानेन शुक्तिका भासत इति कथमालंबनं भासमानत्वात्स्युपगमे वा कथं नानुनवविरोधः
तथापि चेंद्रियादीनां समीचीनज्ञानोपजननेसामर्थ्यमुपलब्धमिति कथमन्योन्यथाज्ञानस्य जनकः दोषस
हितानां तेषामिथ्याज्ञानस्यदेपि सामर्थ्यमिति चेन्न। नदोषाणां कार्योपजनने सामर्थ्यं विघातमात्र हेतुत्वात्। अ
न्यथा कुष्ठादपि कुटजबीजात् वटांकुरोत्पत्तिप्रसंगात्। अपि च स्वगोचरव्यभिचारविज्ञानानां सर्वज्ञानाम
सत्प्रसंगः। तस्मात् सर्वज्ञानसमीचीनमास्थेय। तथा च रजतमिदमिति च द्वे विज्ञाने स्मरणानुभवरूपे तत्रेदमिति पु
द्रव्य रोवर्त्तिमात्रग्रहणं दोषवशात् तद्गतशुक्तिसामान्यविशेषस्याग्रहणात्। तन्मात्रं च गृहीतं सदृशतया संस्कारोद्बो
धनक्रमेण रजतं स्मृतिजनयति। सा च गृहीतग्रहणस्वभावापि दोषवशाद्गृहीत चोद्य क्रमेण ग्रहणमात्रम
वतिष्ठते। तत्त्पाचरजतस्मृतेः पुरोवर्त्तिद्रव्यमात्रग्रहणस्य मिथः स्वरूपतः स्वभेदाग्रहात्संनिहितरजतगोच
रज्ञानसारूप्यरोदरजतमितिनिम्ने अपि स्मरणग्रहणे अभेदव्यवहारं च सामानाधिकरण्यव्यपदेशं च प्रव विषयत्वे
र्तयतः। कचिद्भेदाग्रहणे गृहीतं नेदं यथापीतः शंखइति। अत्र हि बहिर्निःसरन्नयनरश्मिवर्त्तिनः पित्तद्र
व्यस्य काचस्यैव स्वच्छस्य पीतत्वं गृह्यते पित्तं तु न गृह्यते तथा स्वाधिदोषवशात्। शुक्लगुणरहितः स्वरूपमात्रेण गृ
ह्यते। तदनयो ग्रहणयोरसंसर्गाग्रहसारूप्यात् पीततपनीयपिंडप्रत्ययाविशेषेण भेदव्यवहारः सा
मानाधिकरण्यव्यपदेशो भेदाग्रहणसंजितो भेदव्यवहारबाधनाच्चनेदमिति विवेकप्रत्ययस्य बाधक

त्रि॰ स्ता॰ ५

त्वमपि उपपद्यते। न तु पन्नोच प्राचीनस्य प्रत्ययस्य भ्रांतत्वमपि लोकसिद्धमिति सिद्धं भवति। तस्माद्यथार्थाः सर्वे विज्ञप्ति
वि पुंसाः सन्देहभ्रमाः प्रत्ययत्वात् घटादिवत्। तदिदमनुमानं। यत्तु यद् व्यासपास्ति [illegible] न्मुक्तिकादौ रजतादेर
ध्यासः इति लौकिकप्रसिद्धिः नासावन्यथाख्यातिनिबन्धना किंतु रजतादेर्भास्वरत्वादिना सादृश्याद् भेदाग्रहात् तस
यो मारति। तस्मात्तस्य रूपमिति पुरोवस्थिता द्रजताद् व्यमाना तज्ज्ञाना विवेकः तदग्रहणनिबन्धनो भ्रमः भ्रां तत्
मुख्य. त्वं च स्मरणयोरितरेतरस्य मानाधिकरण्य व्यपदेशो रजतादि व्यवहारश्चेति। अन्ये तु आ
वि नुमतो यत्तु पदव्यासस्तत्र विपरीत धर्मत्व कल्पना मात्र सन्ने। अत्रेद माकृतं। शुक्तिता व रजतादिनो रज
तमिति प्रत्ययात् पुरोवर्तिनि द्रव्ये प्रवृत्तिः सामानाधिकरण्य व्यपदेशश्चेति सर्वं [illegible] जानीते। तथैव
भ्रान्तावक्रमात् रजतयोस्तत्र चरयोऽप्यभिन्न [illegible] भेदाग्रहमात्रात् नाविद्यमानेति। ग्रहणनिबन्धनो चेतन
स्य व्यवहारव्यपदेशो कथमन्यग्रहणमात्राद्भवेत। न न्यत्तनाग्रहणमात्रं किंतु स्मरणग्रहणाप्येवमिमः
त स्वरूपतो विषयं ग्रागृहीतं भेदसमीचीनपुरःस्थित रजतविज्ञानयो रूपेण भेदव्यवहारं सामानाधिक ना
रण्य व्यपदेशं व्यवहारं प्रवर्त्तन्ते तु पुरः स्थमारोपासत्तामात्रेण तस्मात्तयोरपि समीचीने सारूप्यमनयोरि
इति दमिति च रजतमिति च ज्ञानयोरनुभूतौ। अथवा अनुयोरेव स्वरूपयोर्विषयत स्वभिन्नयोर्भेदाग्रहणात्। तत्र न तावत्स
१ मीचीनज्ञानसदृशमिति ज्ञानं समीचीनज्ञानं [illegible] वत्तद्व्यवहारप्रवर्त्तकं न हि गोसदृशो गवयमिति ज्ञानं गां वाभिनगवयप
वर्त्तयति। अनयोर्भेदाग्रहण इति तु ज्ञानपराहतं। नहि भेदाग्रहे अनयोरिति भवति अनयोरिति भेदग्रहणमिति च
भवति तस्मात्तन्मात्रेण भेदाग्रहणमिति एव व्यवहारहेतुरिति वक्तव्यं। तत्र किमयमारोपाद्भ्रमेणाव्यवहारहेतुर
स्तु आहोस्वित्तत्पादितारोपस्य स्वतः इति वयंतु पश्यामः चेतनव्यवहारस्याज्ञानप्रत्यक्षत्वानुपपत्तेः। आरोपज्ञानोत्पादकमे
भवतीयतः। अथ समीचीनज्ञानसारूप्यमनयोर्मि गृहीतं वाक्यवत् नेत्र·१ पो·२ ह्येवम्

मा॰दी॰वा॰

तं

गोवेति। ननु सत्यं न चेतनव्यवहारो ज्ञानपूर्वकः किंत्वविदितविवेकास्मरणाग्रहणा[illegible]पूर्वक इति चेत्। न हि रजतप्रातिपदि
कार्थमात्रस्मरणात् प्रवृत्तावुपयुज्यते इदंकारास्पदाभिमुखो खलु रजतार्थिनो प्रवृत्तिरित्यविवादः। कथं चार्थमिदंकारास्पदे
१२ प्रवर्त्तेत यदि न तद्धितं। अन्यादिहन्य त्वनोती[illegible]त्रियाहृतं। न चेदं [illegible] इदंकारास्पदं रजतमिति जानीयात्। कथं रजतार्थी
तद्धितं। यथा तथा खेनाग्रहणादित्युपा[illegible]त संप्रति वक्तव्यः। अथ तथा स्वेनाग्रहणात्कास्मात् नोपेक्षते तत्स्तस्य हुपादा
नोपेक्षान्यां अमितआख्यमाणा[illegible]तनो व्यवस्थित इदंकारास्पदे रजतसमारोपे[illegible] सोपादान एव व्यवस्थास्यात इति मेदा
गतः समारोपोत्पादनापेक्षा चेतनप्रवृत्तिहेतुः। तथा हि। मेदाग्रहादिदंकारास्पदे रजतत्वमारोप्य तज्जातीयस्योपकारे
तुवेवमनुचिंत्य तज्जातीयतया इदंकारास्पदे रजतत्वमनुमाय तदर्थी प्रवर्त्तत इति आनुपूर्व्यसिद्धं। न च तदस्य रजतस्यति
त्रिदंकारास्पदस्योपकारहेतुभावमनुमापितुमर्हति। रजतत्वस्य हेतो[illegible]पक्षधर्मत्वात्। एकदेशदर्शनं स्वत्वनुमापक
त्वेनैवादेशदर्शने यथा उक्तः। ज्ञातसंबंधस्यैकदेशदर्शनादिति। समारोपस्तु कोऽपादर्शनमक्षितं तस्मिन्मतं तू। विवादाध्यासि
तरजतादिज्ञानं पूर्ववर्त्तिवस्तुविषयं रजतार्थिनः। तन्नियमेन प्रवर्त्तकत्वात्। यद्यदर्थिनं यन्नियमेन प्रवर्त्तयति। तत्तानतद्वि
य षयं [illegible] सम्यग्वादिसिद्धं सम्यग् रजतज्ञानं तथा चेदं तस्मात्तथेति यच्चोक्तं न च भासमानतया न शुक्तिरालंबनमिति। तन्नम
वान्तरेण्याच[illegible] किं शुक्तिका[illegible]लंबनत्वं स्येदं रजतमिति ज्ञानस्य नालंबनत्वं। आहि स्वभावस्य पुरःस्थितस्य
सितभास्वरस्य यदि शुक्तिका[illegible]कालंबन[illegible]। अस्ति। उक्तस्यानालंबनत्वं बुद्धामात्स्य तदबाधेन च विरोधः। तथा हि। रजतमित्यनु
१७ भवनमनुभविता पुरोवर्त्तिवस्तुतुल्यानिर्दिशति दुष्टानाकारमात्रानां औपसर्गिककार्यं प्रतिबंधेन कार्यांतरापजनननसामर्थ्यं
यथा दावाग्निदग्धानां वेत्रबीजानां कारकीकाउजनकत्वं[illegible] न स्वकार्य दुष्टस्य चोदर्थस्य तेजसा बहुलपानयपनमिति। प्रसंसत्वा
यथा कापहृतविषयविज्ञानाधिमाधर्थिस्यानुमानमाभासोहृतवत्स्त्रनुष्णत्वानुमानवत्तायच्चोक्तं मिथ्यात्वस्य च व्यभिचारित्वंम
मात्राभावास इति तद्वाचकत्वेन स्वतःप्रामाण्योपनाव्यभिचारयतीति व्युत्पादयद्भिरस्माभिः परिहृतं न्यायकणिकायामिति नेह
प्रपञ्च[illegible]यते। दिङ्मात्रं चास्य स्मृतिप्रमोषभङ्गस्योक्तं विस्तरस्तु ब्रह्मतत्त्वसमीक्षायामवगन्तव्य इति। तदिदमुक्तं। अन्येतु यत्र

मदध्यासः तस्यैवविपरीतधर्मत्वकल्पनामाचक्षत इति। यत्र शुक्तिकादौ यस्य रजतादेरध्यासस्तस्यैव शुक्तिकादेर्विपरीतधर्मत्व
१ कल्पनां रजतत्वादिधर्मकल्पनामिति योजना॥ ननु तन्त्रेषु सकाशां विप्रतिपत्तयः प्रकृते तु किमायातमित्यत आह। सर्वथापि तु
अन्यस्यान्यधर्मावभासतां न व्यभिचरति। अन्यस्यान्यधर्मकल्पना। अन्ततस्ता। सा चानिर्वचनीयत्वस्य वस्तु उपपादिता। तेन
तद्वैपामिव परीक्षकाणां मते अन्यस्यान्यधर्मकल्पनानिर्वचनीया वश्यं नाविनीति। निर्वचनीयतानन्वर्णत्र सिद्धांतइस
र्थः। आख्यातिवादिभिरप्यामेरधिसामानाधिकरण्यव्यपदेशाज्ज्ञप्तिनियमस्वादिदमन्यूपयमिति नावः। न केवलमिप
मन्ततापरीक्षकाणां सिद्धः। अपितु लौकिकानामपीत्याह। तथा च लोकेऽनुभवः शुक्तिका हि रजतवदवभासत इति। न पुनार ६
तमि जैतिदोषः स्यादित्यत। अन्यस्यान्यात्मनावि भ्रमो लोके सिद्धरवाचाभिन्नस्य भेदविभ्रमो न दृष्ट इति। कुतश्चिदप्यस्ना।
भिन्नान्नेजीवानां भेदविभ्रमः स तत्राह। एकश्चन्द्रः सद्वितीयवदिति। पुनरपि विप्रतिपत्तिमनि अध्यासमाक्षिपति। क
थं पुनः प्रत्यगात्मन्यविषयेऽध्यासो विषयधर्माणां। अयमर्थः। चिदात्मा स्वप्रकाशात्मा वा न वा न चेत्स्वप्रकाशात्तर्हि कथमस्मि
न्नध्यासो विषयधर्माणां। न खल्वत्र नियासमानेपुरोवर्तिनि द्रव्ये रजतस्य वा धर्माणां वा समारोपः संभवति। प्र
भासे नान्न तावदयमात्मा जडो बुद्ध्यादिवत्पराधीनप्रकाश इति युक्तं। न खलु स एव कर्म कर्त्ता च भवति विरोधात्॥
परसमवेतक्रियाफलशालि हि कर्म न च ज्ञानक्रियाफलसमवायिनि इति कथमस्या कर्म। न च तदेव स्वपरं च विरोधात्। आ
त्मान्तरसमवायाभ्युपगमे ह्यात्मनोऽनात्मत्वप्रसङ्गः एवं तस्य तस्यैव मन्वयापातः। स्यादेतत्। आत्मान आपि स्वबो
धेतानेषु भासमानोऽपि वर्तत न कर्म परसमवेतक्रियाफलशालित्वाभावात्। चैत्रवत्। यथा हि चैत्रसमवेतस्या क्रियायाश्चैन
नारव्याप्ता वनयसमवेतायामपि क्रियमाणायां नगरस्यैव कर्मता परसमवेतक्रियाफलशालित्वात्। ननु चैत्रस्य क्रियाफल
शालिनोऽपि चैत्रसमवायादगमनक्रियायाइति। तन्न। श्रुतिविरोधात्। श्रूयते हि सत्यं ज्ञानमनन्तं ब्रह्मेति। उपपद्यते। तथाहि।
योऽयमर्थप्रकाशः फलं यस्मिन्नर्थं स्वात्मा चायं प्रथते तस्य किं जडः स्वयं प्रकाशो वा। जडश्चेद्विषयात्मानावपि जडा विति वा
स्मिन्किं प्रकाशतां विशेषात्। इति प्राप्नमान्ध्यमशेषस्य जगतः तथा चाहुराचार्याः अप्रत्यक्षस्य चोपलम्भस्य विनिपातः परपद

न[redacted]नीली[redacted]नमेवविज्ञानमर्थोस्मानेज्ञापयतिन्वसुरादितिवाच्यं। ज्ञानेहिज्ञानजनितं जनितं च ज्ञानं जडं स्यन्नो
ना·री·वा· ते तेरूपरामतिवर्त्तीएवमुक्तवोक्ता न्यपिज्ञानानिजडानीत्यनवस्थातस्मादपराधीनप्रकाशास्तिविदुप[redacted]तव्या तथा
या पिकिमयात्तविषयात्मनोःस्वभावजडयोरेतदौत्तमत्तयोःसंविद्जडेतितत्किंपुत्रःपंडितइति पितापिपंडितोकुत्त
स्वभावएषसंविदःस्वयप्रकाशायाःयदर्थोत्सस्त्वबधितेतिचेत्। हंतपुत्रस्यापिपंडितस्यस्वभावएषःयत्पितृस्त्वबधि
से न तेतिसमानं। सत्यस्त्वार्थस्य कोशोनत्वर्थो प्रकाशं किंनेतितस्याःस्वभावइतिचेत् तत्किं[redacted]संविदोभिन्नोसंविदस्त्वार्थप्र त्म
काशो। तथाचनस्वयप्रकाशस्तवित्। नचसंविदर्थालप्रकाशइति· अथसंविदर्थात्मप्रकाशोनसंविदोभिधत्तेसविदस्त्वतो·
एवंचेदयावदुक्तंभवति। संविदात्मार्थोस्तहेतितावदुक्तंभवति। संविदर्थात्मप्रकाशोस्तहेति तथाचनविवक्षिताथसिद्धिः।
न[redacted]वातीतानागतार्थगोचरायाःसंविदोर्थसहभावोपितद्विषयतानोपादानापस्ताबुद्धिजननादर्थसहभाव इतिचेत्नार्थ
संविदइवेह नादिबुद्धीनामपितद्विषयत्वानुपपत्तेः हानादिजननात्। हानादिबुद्धीनामर्थविषयत्वं अर्थविषयहाना
नाट° दिबुद्धिजनाच्च। अर्थसंविदस्तद्विषयत्वमितिचेत्। किंदस्यप्रयत्नवशात्संयोगादरूपप्रवृत्तिनिवृत्तिहेतुरर्थ[redacted]त्यर्थप्रका २
आ शोस्तुजाद्दित्यात्मसंयोगोनार्थप्रकाशइतिचेत्। नन्वयप्रकाशोपिस्वालन्यवत्स्वघातवत्प्रकाशः। अर्थस्तुजडइत्युपपा
दितं। नचप्रकाशस्यास्मानोविषयाःतेकिंचिद्भिन्नदीर्घस्थलतयाऽनुभूयते। प्रकाशस्यायमातनोऽस्यस्थोनाणुरूपस्वोऽदी
र्घश्चेतिप्रकाशते। तस्माद्ब्रःऽनुभूयमानस्वद्वितीयश्चद्रमाःप्रकाशास्यो। र्थोनिर्वचनीयएवेतिमृत्तमुत्परयामः। न
* देकोलिंगमुका चास्यप्रकाशस्याजानतःस्वलक्षणभेदोनुभूयतेनचानिर्वाच्यार्थभेदःप्रकाशनिर्वाच्यभेदमहेति अतिप्रसंगात्। नचार्थ
शामानेप नामपिपरस्परंभेदःसमीचीनज्ञानपद्धतिमध्यास्तइत्युपरिष्टादुपपादयिष्यते। तदयप्रकाशएवस्वयप्रकाशएकःकु
टस्थनित्योनिरंशःप्रसंगात्मासस्यशाकप·वनिर्व[redacted]चनीयेभ्योदहेंद्रियादिभ्यःआत्मानंप्रतीत्यनिर्वचनीयमसंचाति
विजानातीतिप्रसरू॥ सचात्मेतिप्रसंगात्मासचापराधीनप्रकाशत्वादनर्थतोवाविषयःतस्मिन्नव्याप्तिविषयचर्मारणादि १

इंद्रियादि[redacted]धर्मी सांकथंचित्साक्षेपेण अमुतोयमध्यासस्त्यासेपः। कस्मादुक्तहेतत आह। सर्वोहि पुरोवस्थि
तेविषयेविषयांतरमध्यस्यति एतदुक्तं भवति प्रत्यक्पराचीनप्रकाशः अथावन्तत्सामान्याद्यहं कारादोषा ब्रवित्य
भान्नहेन्यथाप्रकाशानध्यस्यगात्मा च पराचीनप्रकाशात पान स्व स्थाने कारणान्यपेक्षते ये न तदान्यदोषेदुष्ट
तः नचाभावान्येन कश्चिदस्याशोपघटेत कश्चिन्नापद्येत नहि तदेव तदानीमेव तेनैव गृहीतमपरोक्षं तत्त्वत्तेन वर्ती
तिन्नस्वयंप्रकाशपरोक्षेऽध्यासः सदा तत्नेप्य प्रकाशपुरोवस्थितत्वस्यापुरोक्षत्वस्याभावात्नाध्यासः। नहि शुक्ता
[redacted]त्तदुक्तः स्थिता मा रजतमध्यस्यतीदं रजतमिति। तस्मादस्य तस्य हेत्वसंतागर्हे चनाध्यास इति सिद्धं॥ स्या
देतत् अविषयत्वे चिदात्मनो नाध्यासो विषय एव तु चिदात्मा ऽप्रत्यस्य स्यतत्कथं नाध्याद इत्यत आह। युष्म
त्प्रत्ययापेत स्य च प्रत्यगात्मनो वि[redacted]षयत्व ब्रवीषि। विषयत्वे हि चिदात्मनोऽन्यो विषयी न वेत्तत्य च प्र
विषयी स एव चिदात्मा विषयस्तु ततोऽन्योऽस्मत्प्रत्ययगोचरोऽभ्युपेयः। तस्मादनात्मत्वप्रसंगादन वस्थापत्तिः
रायमुपपन्नस्यादपत्ति अत एवाविषयत्वमात्मनो वक्तव्यं तथा च नाध्यास इत्यर्थः। परिहरति। उच्यते। न तावद
यमेकांतेनाविषयः कुतः अस्मत्प्रत्ययविषयत्वात् अयमर्थः तत्संसर्गात्स्वयं प्रकाशोऽप्यविषयोऽनवच्छिन्नोऽपि वस्तु
तःप्राप्यनिर्वचनीयानाद्यविद्यापरिकल्पितबुद्धिमनः सूक्ष्मस्थूलशरीरेंद्रियावच्छेदेनानवच्छिन्नोपि विषय
तो वच्छिं वा भिन्नोपि भिन्नवदवभासते तेन गृहीतश्चैत्तोपि कर्तृभोक्तापि भोक्तेत्यविषयोप्यस्मत्प्रत्ययविषयइव जीवभावमापन्नो
वभासते तेनापि चिदात्मा इदमिति नेदमिति च नैकमनेकं वा किंचिदस्ति। नरवत्वादनित्यत्वविभुत्वादयो धर्माः इति। न तिरस्कारस्याप्स
नः चिदंशोपरोक्षात् अपरोक्षत्वादप्रतीति इति चेत्। नात्मनो बुद्ध्यादिभ्यो भेदस्तादात्म्यायनं चिदात्मनि
तत्त्वे न परोक्षतापरोक्षतावपि कल्पितन भेदेन विविच्यतां स्व एवं ग्रहीतापि बन्धाति। तस्माच्चिदात्मनः स्वयंप्रकाशस्य
त्स्य मा परोक्षतापि प्रतीतेः सैवतः बुद्ध्यादीनामनिर्वाच्यत्वेन तदेतदस्याप्यनिर्वचनीयत्वात्। तस्माच्चिदात्मनः स्वयंप्रकाशस्य
नस्यैवावच्छिन्नस्यावच्छिन्नेभ्यो बुद्ध्यादिभ्यो भेदाग्रहात्तदध्यासेन जीवभाव इति। तस्य चानिदमिदमात्मनोऽस्मात्

त्मव विषयत्वमुपपद्यते। न ह्यादिकर्त्री भोक्त्री चिदात्मा ऽहंप्रत्यये प्रसवभासते तेन चोदासीनस्य तस्य क्रियाशक्ति
भा.टी.वा. भोगशक्तिर्वा संभवति। यस्य च बुद्ध्यादेः कार्यकारणसंघातस्य वा तस्य क्रियाभोगशक्ती न स्वप्रकाशे तन्त्ये। तस्माच्चिदात्मै ते
व कार्यकारणसंघातेन ग्रथितोऽतो ऽस्य क्रियाभोगशक्तिः स्वप्रकाशोऽपि बुद्ध्यादि विषयविशेषणत्वात्कथंचित्
स्वप्रत्ययविषयोऽहंकारास्पदो जीव इति च जन्तुरिति च क्षेत्रज्ञ इति चाख्यायते। न खलु जीवश्चिदात्मनो भिद्य
ते। तथा हि श्रुतिः अनेन जीवेनात्मनेति। तस्माच्चिदात्मनोऽव्यतिरेका जीवः स्वयंप्रकाशोऽप्यहंप्रत्ययेनैकत्वेनोक्तो
तया व्यवहारयोग्यः किमतु इत्यस्यास्मत्प्रत्ययस्यालंबनमुच्यते। न चाध्यासे सति विषयत्वं विषयत्वे चाध्यास इत्यन्यो
न्याश्रयत्वमिति साम्प्रतं। बीजांकुरवदनादित्वात्। पूर्वपूर्वाध्यासतदुपहितविषयीकृतस्य उत्तरोत्तराध्यासविष
यत्वाविरोधादित्युक्तं नैसर्गिकोऽयं लोकव्यवहार इति भाष्यग्रंथेन। तस्मात्सूक्तं न तावदयमेकांतेनावि
षय इति जीवो हि चिदात्मतया स्वयंप्रकाशतया ऽविषयोऽप्यौपाधिकेनांशेन विषय इति भावः। स्यादेतत्। न वय
मपराचीनप्रकाशतया विषयत्वेनाध्यासमपाकुर्मः किंतु प्रत्यगात्मानस्तनोऽविषयत्वं अतः प्रत्यगात्मसविषयः
ति ब्रूमः। तथा च सर्वथा युष्माने प्रत्यगात्मनि कुतोऽध्यास इत्यत आह। अपरोक्षत्वाच्च प्रत्यगात्मप्रसिद्धेः प्रतीच
आत्मनः प्रसिद्धिः प्रथा तस्याः स्वीपरोक्षत्वात्। यद्यपि प्रत्यगात्मन अन्या न प्रथास्ति तथापि भेदोपचारो यथा
पुरुषस्य चैतन्यमिति। एतदुक्तं भवति। अनवच्छिन्नचिदात्मा परोक्षोऽभ्युपेयः। तदवच्छाया सर्वसत्त्वप्रथनेन जगदाध्य
क्षतमादित्युक्तं। श्रुतिश्चात्र भवति तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभातीति। तदेवं परमार्थः
परोक्ष प्रकाशरूपे स्यापि चिदात्मनः ... तमाह। न चायमस्ति नियमः। पुरोवस्थित एव [illegible] २
ते परोक्ष एव विषये विषयान्तरमध्यसितव्यं। कस्मादयं न नियम इत्यत आह। अप्रत्यक्षेऽपि ह्याकाशे बालास्तलमलिन
ताध्यस्यन्ति। यस्मादेकोन भोऽदृश्यमानत्वं रूपस्पर्शविरहात् न बाह्येन्द्रियप्रत्यक्षं नापि मानसं तस्मान्नभोऽस्य प्रत्यक्षत्वा १०
दिऽप्रत्यक्षं। तस्मात्प्रत्यक्षं। अयमत्र बालो विविकिनः परदेशीतदर्शिनः कदाचित्सार्थे नक्षत्रास तमारोपयन्
श्री।

दविच्छतैजसं कृष्णमारोप्य नीलोत्पलपलाशश्याममिति वा राजहंसमालाधवलमिति वा निरूपयति। तत्रापि एवं
हृस्य तैजसस्य वा तामसस्य वा रूपस्य परत्र न नाहि स्मरति रूपावनास्तीति। एवं तेद्ध तत्र मध्यस्यति। अवाङ्मुखी
न्नतमहेद्द नीलमतिमयमेवकटाहकल्पमित्यपर्थः। उपसंहरति। एवमुक्तेन प्रकारेण सर्वापि परिणादविकारः
प्रत्यगात्मन्यपि अनात्मनां बुद्ध्यादीनामध्यासः। ननु सति चेत्स तत्त्वम्याः तत्किम प्रमेयमेवाध्यास आक्षेपमभावा
नात्मानं बुद्ध्यादिनाध्यासमाक्षिपन्त आह। तमेतमेवंलक्षणमध्यासं पण्डिता अविद्येति मन्यन्ते। अविद्या हि सर्वानर्थबी
जमिति श्रुतिस्मृतीतिहासपुराणेषु प्रसिद्धा। तदुच्छेदाय वेदान्ताः प्रवृत्ता इति च वक्ष्यति। प्रत्यगात्मन्यनात्माध्यास एव
सर्वानर्थहेतुः। न पुनरात्मजतादिविभ्रमा इति स एवाविद्यात्वकल्पया विज्ञातानन्दकल्पकल्पेति तद्वत्बन्धुपाधिना ध्या
समाप्ति। अयं चेद्वलक्षणमित्यवरूपतयाऽन्यैर्हेतुतोक्ता। यस्मात् प्रत्यगात्मन्यध्यासानादिरनिर्वाच्या पाधुपतातः कारणा
घाहितादोषस्य प्रत्यगात्मनः दुःखेन दुःखावकाशो तत्र स्यादन्यथेतु। न चैतत् पृथग्जना अपि मन्यन्ते। अध्यासत्वेन न
ध्याधेनेत्य तदुक्तं पण्डिता मन्यन्त इति। न च्विषममनादिरूपतीति निरूढ निबिडवासनानुबद्धा अविद्यानयानक्यानिराकृउपा
भासनावादितिर्यामन्यतानप्रतिनिरोध्यापायमाह। तद्विवेकेन च वस्तुस्वरूपावधारणं विद्यामाहुः। घा
पण्डिताः। प्रत्यगात्मनि व्यस्तं विविक्तेभ्यो बुद्ध्यादिभ्यो बुद्ध्यादिभेदाग्रहनिमित्तो पबुद्धालिनात्र समीध्यासः तत्र
वराग्मनादिभिः पद्धिवेकविज्ञानं तेन विवेकाग्रहनिवृत्तिर्हि तेऽध्यासस्य बाधात्मकवस्तुस्वरूपावधारणं विद्या। विद
त्मरूपस्वरूपेण्यवतिष्ठत इत्यर्थः। स्यादेतत्। अतिनिरूढनिबिडवासनानुबन्धा अविद्या विद्यया प्रबाधितापि स्ववास
नावभासनरूढा विद्यति प्रवर्तयिष्यति चवातनादिकार्यं स्वोचितमित्यत आह। तत्रैवं सति एवं व्यवस्थिते वावचारस्तेन
गुणेन तिर्यत्र यदध्यासः तत्कृतेन दोषेण गुणेन वाऽणुमात्रेणापि स न संबध्यते। अतः करणादिदोषेणाप्यनाद्यादिना चिरसाविद्या
त्मनो गुणो न चैतन्या उनयादिना अतः करणादिन संबध्यते। एवं तदुक्तं भवति तत्त्वावधारणाभ्यासस्य हि स्वभाव एव स
तादृशोपदनादिप्यतिनिरूढनिबिडवासनामपि मिथ्याज्ञानमपनयति। तत्त्वपक्षपातो हि स्वभावो धियाम्। यथाहुर्बाह्या

भा.टी.वा. नि अपि किल पश्ववन्तार्थस्वभावस्याविपर्ययेः। न वा यो ऽप्यसत्वचे ऽपि बुद्धेर्जनस्य सम्पातत इति। विप्रो श्रुतश्चिद्दत्तम्ब को
भावस्यैतत्वज्ञानस्यास्मत्ताः तस्मात्स्यकृताऽनिर्वाच्यमविद्या बाधयेति। उक्तमस्मान्त्तो ऽपि प्रत्युनीद्व्यत्विवेकोऽप्यतादृश
स्यात्मिद्दम्मभेदम्मितिलोकव्यवहार इति। तत्र व्यपदेशफलं पराध्यवहारः कोऽयं इति शाब्दस्य चितं लोकव्यवहारस्यादर्श
यति तमेतं [illegible]मविद्याख्यमिति। निगद्व्याख्यातः आक्षिपति। कथं पुनरविद्यावद्विषयाणि प्रत्यक्षादीनि प्रमाणानि। तत्त्वपरि
च्छेदो हि प्रमा विद्या तत्साधनानि प्रमाणानि कथमविद्यावद्विषयाणि। नाविद्यावत्प्रमाणान्यपत्यमितितत्कार्यस्याविद्या
या अविद्याविरोधित्वादिति भावः। सत्तु वा प्रत्यक्षादीनि तस्यत्याप्यपिपासा शास्त्राणि तु [illegible] तान्तु शास्त्रेना [illegible] पराशय
विद्याप्रतिपक्षतया नाविद्यावद्विषयाणि भवितुमर्हन्तीत्याह। शास्त्राणि चेति समाधत्ते। उच्यते। देहेन्द्रियादिष्वहंममाभिमा
तत् पर नरहितस्य प्रमातृत्वानुपपत्तौ प्रमाणप्रवृत्त्यनुपपत्तेः। अयमर्थः। प्रमातृत्वं हि प्रमा
प्रति कर्तृत्वं तच्च स्वातन्त्र्यं स्वातन्त्र्यं च प्रमातुरितरकारकाप्रयोज्यस्य समस्तकारकप्रयोक्तृत्वं। तत्त्वेन प्रमाकरणं प्रमा
णप्रयोजनीयं। न च व्यापारमन्तरेण करणं प्रयोक्तुमर्हतीति। न च कूटस्थो नित्य [illegible] स्यचिदात्मा अपरिणामी व्यापार
वृत वान्। तस्माद्व्यापारवद्बुद्ध्यादितादात्म्याध्यासाद्व्यापारवत्तया प्रमाणान्यधिष्ठातुमर्हतीति न बत विद्यावत्पुरुषविषयत्वं
प्रमाणानामिति। अथ मा भूदविदितप्रमाणानि किंन्नः छिन्नमित्यत आह। नहीन्द्रियाण्यनुपादाय प्रत्यक्षादिव्यवहारः
संभवति। व्यवह्रियते ऽनेनेति व्यवहारः फलं प्रत्यक्षादीनां प्रमाणानां फलमित्यर्थः। इन्द्रियाणीति। इन्द्रियलिङ्गादीनीति
द्रष्टव्यं। देहेन्द्रियादिष्वहंममाभिमानरहितस्य पुरुषस्य व्यवहारक्रिया च व्यवहारो नोपपद्यते समानकर्तृता
मा अनुपादाय प्रत्यक्षव्यवहार इति [struck through] प्रयोजना। किं निमित्तं पुनः [illegible] प्रमाणानि अथ प्रत्यक्षमनुव कस्मात् न प्रव
र्तन्त इत्यत आह। न चाधिष्ठानमन्तरेणेन्द्रियाणां प्रमाणानां व्यापारः संभवति। न जातु करणान्यधिष्ठितानि कर्तृत्वेन चि
निं स्वव्यापारेण व्याप्रियन्ते [illegible] देहादिभ्यः प्रवर्तन्त इति। अयं देहे एव अधिष्ठानाव [illegible] तथा आत्मा २१
ने इत्यत आह। न चानध्यस्तात्मभावेन देहेन कश्चिद्व्याप्रियते। तत्रापि व्यापारः [illegible] इति भावः। स्यादेतत् [illegible]
मा

स्वभावेवेमादिकं कुविंदो व्यापारयन् पटस्य कर्ता तेनैवं मनस्य स्वस्त्वात्मभावे देहेन्द्रियादिव्यापारयन् प्रतिपत्तातद
भिन्नः प्रमातेत्युक्तमाह। नचैतस्मिन् सर्वस्मिन् तत्र तत्काले व्यासत्वामितिआत्मनोऽस्याः स्य सर्वे पात्ववदास्तवेच
निर्जः प्रमातेत्युक्तमाह। नचैतस्मिन्सर्वस्मिन्नुपपद्यते। व्यापारवान्तो हि कुविंदादयो वेमादीन्नेजञ्चिन्तायव्यापारयंति। अनन्यकर्ता
निश्चर्मीविङ्क्तस्य प्रमातृत्वमुपपद्यते। व्यापारयोऽस्मगत्वादित्स्यर्थः। आत्मनो व्यापार्याविति प्रमाणे। नोत्साह। नन्व प्र
स्वभावस्य देहादिधारस्तेना नव्यापारयोऽस्मगत्वादित्स्यर्थः। प्रमाणवेदवस्तुत्वः प्रमातान्वति। अंतःकरणपरिणामभेदे [redacted]
मोऽस्त्वमतेरात्प्रमाणात्र [redacted] र्त्तिनुरक्ति। प्रमायावस्तुस्व तत्त्वः प्रमातान्वति। अन्तःकरणपरिणामः। चिद्रूपो नवेत्
[redacted] स्व प्रमेयप्र व शाः। क लेस्थः चित्त्वभावः प्रमा। कथं चजडस्यातः वान्स्या स्वपरिणामः। चिद्रूपो नवेत्
परिच्छिदात्मा तत्रना व्यस्थितकस्य पचिदात्मकार्यो नवेद्य घतः करणो व्यापारवच्छिदात्मनि नाव्यस्थितेः तस्मादि
तरेतराध्यासान्निदात्मकस्यैव प्रमाफलत्वसिद्धमिति। तत्सिद्धो स्व प्रमातृत्वा। तामेव च प्रमातुरपीकरणप्रमाणस्य त्वं
नि। प्रमातृत्वैव प्रमाफलस्य तत्प्रमायाः फलस्यान्नावप्रमाणान प्रवर्त्ततातयाच प्रमाणाम्प्रमाणस्याद्दित्यर्थः। उपसंह
न ति। प्रमातृत्वैव प्रमाफलस्य तत्प्रमायाः फलस्यान्नावेप्रमाणानि प्रमाणानि। स्यादेतत्। भवतु पृथक् जनानामेवं। आगमोपपत्ति
रीति। तस्मादविद्यावद्विषयाण्येव प्रत्यक्षादीनि प्रमाणानि प्रमेयव्यवहारा दृश्यन्तेति। कथमविद्यावद्विषयाण्येव प्रमा
प्रतिपन्नप्रत्यगात्मतत्त्वानां व्युत्पन्नानामपि पुंसां प्रमाणप्रमेयव्यवहारा दृश्यन्त इति। कथमविद्यावद्विषयाणि च प्रमा
णानीत्यत आह। पश्वादिभिश्चाविशेषादिति। विदुषामपि उपपन्नानामपि पत्तिभ्यो देहेन्द्रियादिभ्यो भिन्नात्मप्रत्यगात्मानं प्र नो
माणामयव्यवहारस्तु प्राप्तत्वं मात्र चर्मनातिवर्त्ततेयादृशोऽपि पशुः शङ्कुनादीमविद्युतिपत्तमुग्धभावो नो
व्यवहारः तादृशो व्युत्पन्नानामपि पुंसां दृश्यतेतिनासामान्यात् तेषामविद्यावत्त्वं रसम्भवः। विद्यावत्त्वम् उभयं
चेत्प्राप्तः समुच्चये उक्तपाकानि वेदेनसहितापूर्वी [redacted] कोपपत्तिरविद्यावत्तु रूपविषयत्वं प्रमाणानामस्ति चयतीत्य
र्थः। एतदेव विभजते। पश्वादीति। पश्वादयइति। अत्रबाह्याद्दिभिः श्रोत्रादीनां संबन्धेसतीतिविशेषणं प्रमाणं दर्शितशब्दा
दिविज्ञाने प्रतीतिस्फलमुक्तं। प्रतिकूल इति चानुमानफलं। तथाहि शब्दादिस्वरूपमुपलभ्य तज्जातीयस्य प्रतिकूलता
मनुस्मृत्य तज्जातीयतयोपलभ्यमानस्य प्रतिकूलतामनु [redacted] मिमत इति उदाहरन्ति। यथादण्डेति शेषमभिमतेस्थिरेत्तानि।

तस्मात्स्वपंयोगेस्यार

भा॰टी॰वा॰ दी स्यादेतत्। न वेतु प्रत्यक्षादीनामविद्यावद्विषयत्वं। शास्त्रं तु ज्योतिष्टोमेन स्वर्गकामो यजेतेत्यादि न देहात्माध्यासेन
प्रवर्तितुमर्हति। अत्र स्वर्गादेरामुष्मिकफलोपभोगयोग्यो ऽधिकारी प्रतीयते। तस्य चापार्थ्ये सति शास्त्रफलप्रयो
र क्तृत्वस्य संगतत्वादिति। न च देहादिस्वर्गं प्रति अलौकिकायफलाय कल्पत इति देहाद्यतिरिक्तचिदात्मा न स्वाधिका
मा रिणोऽसिद्धिरिति शास्त्रतदागमस्याविद्येति कथमविद्यावद्विषयं शास्त्रमित्याशंक्याह। शास्त्रीयेऽपीति। तु शब्दः प्रत्यक्षा
दिव्यवहाराद्भिनत्ति। अधिकारशास्त्रं हि स्वर्गकामस्य पुंसः परलोकसंबन्धं विना न निर्वहतीति तावन्मात्रमाक्षि
५ शास्त्रीये पति न त्वस्यासंसारित्वमपि तस्याधिकारेऽनुपयोगात्। प्रत्युत न औपनिषदस्याकर्तुरभोक्तुरधिकारो विरोधात्। वा
भोक्ता हि कर्मणः कर्मजनितफलभोगी कर्माद्यपेक्षितो दृश्यमानो भवति तत्र कथमकर्ताभोक्ताकथ्याभोक्ताक
र्मजनितफलभोगी तस्मादनाद्यविद्याध्यासकर्तृत्वभोक्तृत्वब्राह्मणत्वाद्यभिमानिनं नरमधिकृत्य विधिनिषे
धशास्त्रप्रवृत्तेः। एवं वेदान्ता अपि अविद्यावत्पुरुषनिष्ठा एव नहि प्रमात्रादिविभागाद्वेतद्भावे विगमस्ते त्वविद्याव
न्तमनुशासतो निर्मृष्टनिखिलाविद्यमनुशिष्टस्वरूपं स्थापयन्तीति एतावानेषां विशेषः तस्मादविद्यावदस्तु सर्व
विषयाण्येव शास्त्राणीति सिद्धं। स्यादेतत् यद्यपि विनाप्यध्यासं यथाभोक्तृत्वमपि निषद्धः पुरुषोऽधिकारे नापि क्ष्यते तथा
प्युपनिषद्भ्योऽवगम्यमानस्याकर्तुरधिकारविरोधात् तथा च परस्परपराहतार्थत्वेन व्याहतार्थं वेदः प्रामाण्यमपज
ह्यादित्यत आह। प्राक्तथाभूतात्मविज्ञानादिति सत्यमपि निषदपुरुषात्मविज्ञानादधिकारविरोधो। तस्मात्तु पुरस्तात्कर्मविषयः
वि त्वाद्विद्यावद्विषयतामनिवर्तयन्तो नानुपजातत्वेन तत्त्वज्ञानेन शक्यता निरोद्धुं। न च परस्परपराहतिः। विद्याविद्यावत्पुरुषभेदेन
व्यवस्थोपपत्तेः। यथा नाहिंस्यात्सर्वा भूतानीति शास्त्र्या प्रतिषिद्धेऽपि श्येनेनाभिचरन् यजेतेति शास्त्रप्रवर्तमान
नाहिंस्यादित्यनेन न विरुध्यते तत्कारणस्य रागतः पुरुषभेदेन भेदादिति। अवजितक्रोधारागात्सपुरुषप्रत्याभिमन्यो विक्रिय
ते। क्रोधाद्यतिवशीकृतात्मनो रागिणस्तु नादिशन्त्यतुरति अविद्यावत्पुरुषविषयत्वं नातिवर्तत इति पूर्वोक्ततदेव स्फोरयति तथा १२
हीति। वर्णाध्यासः राजा राजसूयेन यजेत इत्यादि। आश्रमाध्यासः गृहस्थः सदृशीं भार्यां विन्देदित्यादिः वयो

विद्य

ध्यासः व छ केशोऽग्नीनादग्नीत्येत्यादि अवस्थाध्यासोऽप्रतिसमोचयत्याचीनां जलादिप्रवेशेन प्राणत्याग इत्यादि
आदिमस्त्रीणाम् अपातकोपपातकसंकरीकरणापात्रीकरणामलिनीकरणाध्यासोपसंमताः॥ तदेवमात्मनात्म
नोः परस्पराध्यासमासपुरस्सराचानीत्याउपपाद्य प्रमाणसूत्रमेपव्यवहारप्रवर्त्तनेनचरित्त सतस्यानर्थहेतु
तामुदाहरणाद्रूपचेनप्रतिपादयितुं तत्स्वरूपमुक्तं स्मारयति। अध्यासो नामातस्मिंस्तद्बुद्धिरित्यवोचामस्मेति
प्यः परं तदूपवेदनाय नास इत्यस्य सस्य सपाठि चानमात्र। तत्राहमिति चीमतादात्म्याध्यासमात्रे ममेत्युपादि
तधर्माध्यासेनानर्थहेतुरिति धर्माध्यासमेवममकारसाक्षादर्शयानर्थसंसारको नराष्ठु सदा प्रपंचयन्ना
ह। तद्यथा पुत्रभार्यादिष्विति देहतादात्म्यमासिन्यध्यस्य देहधर्मं पुत्रबालत्रादिस्वाम्यंवत् एवादिवदारोप्याह
अहमेव विकलः सकल इति। स्वस्य खलु मा विकल्येन स्वाम्यस्याकल्यात् स्वामी स्वरूपसकलः सन् दुःखी भवति। तथा
स्वस्य वैकल्ये न स्वाम्यवैकल्यात् स्वामी स्वरूपविकलः सन् दुःखी भवति। बाह्यधर्मा मिवैकल्यादयः स्वाम्यप्रणा
लिकास्वचारिताः शरीरे तानात्मन्यध्यस्यतीत्यर्थः। यदा च परंपराध्यासमेव देहधर्मे स्वाम्यंद्वयं गतिः तदा कोवकाश इनो,
७ पचिको भुदरोमे उव्यरात्यादि क्षिस्साशय बानाहत या देहधर्मानिति देहादयंतरंगानीं इंद्रियाणामप्यध्यासमाह। भावो
नो धर्मान्मूकत्वादीन्। ततोऽप्यंतरंगस्यान्तःकरणस्याध्यासमाहभावस्य धर्मान्कामसंकल्पादीन् अज्ञानस्य ध्यस्य
तीति योजना। तदनेन प्रपंचेन धर्माध्यासमुक्त्वा तस्य मूलं धर्म्यध्यासमाह। एवमहंप्रत्ययिनमशेषस्वप्रचारसाक्षि
न्नतःकरणादेस्तोपमहंप्रत्ययीत्वं स्वप्रचारसाक्षिणि प्रत्यगात्मन्यध्यस्य चैतन्यादासीन्तारूपा प्रत्यगात्म
न्यध्यस्यति। तदनेन कर्तृत्वं भोक्तृत्वं उपपादितं। चैतन्यमुपपादयति। तं च प्रत्यगात्मानं सर्वसाक्षिणं तद्विपर्ययेणांतःकार
णादिविपर्ययेणांतःकरणाघवच्छिन्नं तस्यविपर्ययः चैतन्यं तेन इत्यर्थ तल्लक्षणं तत्तीयाअंतःकरणादिष्वध्यस्यति
तदनेनांतःकरणाघवच्छिन्नः प्रत्यगात्मा इदमनिदंरूपश्चेतनः कर्त्ता भोक्ता कार्यकारणाविद्याद्वयाधारो हंका

स्यंदसंस्कारी सर्वानर्थसंतानस्य नानं जीवात्माइतरेतराध्यासोपादानं तदुपादानाध्यासस्यानादित्वात् बीजांकुरवने
२ ईश्री तरेतराश्रयत्वमित्युक्तं भवति। प्रमाणप्रमेयव्यवहारेणांवितमपि शिष्यैर्ज्ञातव्यं स्वरूपा। शिष्यानप्रवृत्तस्य लोक प्र
स्यस्तत्याध्यासस्तु इत्यीकरोतीति एवं अनादिरनंतस्तत्त्वज्ञाननिवर्त्यः तरेणाध्यासस्य स्वरूपं। अनाद्यनंतत्वे हेतुरुक्तो नैसं
मिथ्याप्रत्य र्गिक इति। मिथ्याप्रत्ययानां रूपमनिर्वचनीयत्वं तद्रूपस्य सर्वथोक्तः अनिर्वचनीयमित्यर्थः। प्रवृत्तमुपसंहरति। अ
यं रूपो स्यानर्थहेतोः प्रहाणाय विद्याप्रतिपत्तये विना कुतोऽस्य प्रहाणमित्यत उक्तं। आत्मैकत्वविद्याप्रतिपत्तये इति प्रतिपत्तिः
प्राप्तिस्तस्यै न तु जपमात्राय। नापि कर्मसु प्रवृत्तये। आत्मैकत्वं विगलितनिखिलप्रपंचत्वम् आनंदरूपस्य स
तत्त्वात्प्रतिपत्तिर्निर्विचिकित्सा भावयतो वेदांताः समूलघातं मिथ्यासमुपघ्नंति एतदुक्तं भवति। अस्मत्प्रत्य
°तनिष्प्रयोज यस्यात्मविषयत्वं स्य समीचीनत्वे स्यात् ब्रह्मणो ज्ञातत्वाच्च न जिज्ञास्यता स्यात् तदभावेन ब्रह्मजिज्ञासा नापि वेदांताः च
नत्वा° पठेरन्। अपि च विवक्षितार्थं जपमात्र उपयुज्येरन् न हितदोपनिषदात्मप्रत्ययः प्रमाणं स्मृतौ न चास्य
न प्रमाणमभ्यस्तोऽपि वास्तववक्तृत्वमौत्सर्गिकासनोऽपनेतुमर्हति। आरोपितं तद्रूपं तत्त्वज्ञानेनापोद्यते
न तु वास्तवमतत्त्वज्ञानेन न हि रज्ज्वामुरगत्वं सहस्रमपि सर्पधियां रज्जुधीः अपवदितुमर्हति मिथ्याज्ञानस बाहिक
स्निजितं रूपं शक्यं तत्त्वज्ञानेनापवदितुं मिथ्याज्ञानसंस्कारश्च दृष्टोऽपि तत्त्वज्ञानसंस्कारेणापदस्यते न तु यदी
र्घकालतत्त्वज्ञानाभ्यासजन्मनेति स्यादेतत्। प्राणाद्युपासना अपि वेदांतेषु बहुलमुपलभ्यंते तत्कथं सर्वेषां
वेदांतानामात्मैकत्वप्रतिपादनार्थत्वमित्यत आह यथा चायमर्थः। सर्वेषां वेदांतानां तथा वयमस्यां शारीरकमी
मांसायां प्रदर्शयिष्यामः। शरीरमेव शरीरकं तत्र निवासी शारीरकोजीवात्मा तस्य त्वंपदाभिधेयस्य तत्पदा १३
भिधेयपरमात्मरूपतामीमांसायां सा तथोक्ता। एतावानत्रार्थसंक्षेपो यद्यपि च न व्याख्याताध्ययनं विच्छिन्नार्थाख्या
त्म

यपदवाच्यवेदराशेः फलवदर्थावबोधपरतामापादयता कर्मविधिनिषेधानामिव वेदान्तानामपि स्वाध्यायशब्दवाच्या
नां फलवदर्थावबोधपरत्वमापादितं। यद्यपि चाविशिष्ट एव स्तु वाक्यार्थ इति न्यायात् मन्त्राणामिव वेदान्तानां अर्थ
परत्वमौत्सर्गिकं। यद्यपि च वेदान्तेभ्यः चैतन्यानन्दघनः कर्तृत्वभोक्तृत्वरहितो निष्प्रपञ्च एकः प्रत्यगात्मावगम्य
ते तथापि कर्तृत्वभोक्तृत्वदुःखशोकमोहमयमात्मानं अवगाहमानेनाहं प्रत्ययेन संदेहवाच्यविरहिणा
विरुध्यमाना वेदान्ताः स्वार्थात् प्रच्याव्य उपचरितार्था वा जपमात्रोपयोगिनो वा अविवक्षितस्वार्थाः तथा च तदर्थ
विचारात्मिका चतुर्लक्षणी शारीरकमीमांसा नारब्धव्या। न ह्यसर्वजनीनाहमनुभवसिद्ध आत्मा संदिग्धो वा स नी
अं प्रयोजनो वा येन जिज्ञास्यः सन् विचारं प्रयुञ्जीतेति पूर्वपक्षः। सिद्धान्तस्तु भवेदेतदेवं यद्यहं प्रत्ययः प्रमाणं तत्त्वे न्ना
स्यात्तत्ते न त्रामे शास्त्रस्यादिबाधकत्वानुपपत्तेः ब्रूसादिभिश्च समस्ततीर्थकरैः प्रामाण्यानभ्युपगमात् अन्य
च थात्वा एवं वेदान्ताः नाविवक्षितार्थाः नाप्युपचरितार्थाः किन्तु लक्षणया प्रत्यगात्मैव तेषां मुख्यार्थः तस्य च वस्तु
नात्मनः संदिग्धत्वात् प्रयोजनवत्त्वाच्च युक्ता जिज्ञासा तस्य शास्त्रबाधितस्तत्र काण्ठ जिज्ञास्यतामस्य सूचयन् अ
थातो ब्रह्मजिज्ञासा इति। जिज्ञासया संदेहप्रयोजने सूचयति। न त्वसंदिग्धे हि व्याप्यत्वाद्धि तज्ज्ञानं कण्ठोक्तं स्ते
प्रयोजनं। न च कार्यं ज्ञानात् पराचीनमनुष्ठेयं। न हि ब्रह्मज्ञानात् पराचीनं किंचिदस्ति येनैतदवान्तरप्रयोजनं भवे
त् किन्तु ब्रह्मसमीमांसा व्युत्पत्तिकर्तव्यता तु ज्ञातविषये वेदान्तैः राहित्यं निर्विचिकित्सं ब्रह्मज्ञानमेव स
मस्तदुःखोपशमनरूपमानन्दैकरसं परमं प्रयोजनं तदर्थं चिरस्य हि शास्त्रतः प्रवर्तते तरां। तत्र प्रागपि
नाधविद्यावशात् प्राप्तमिवेति प्रेप्सितं भवति यथा स्वग्रीवागतमपि ग्रैवेयकं कुतश्चित् भ्रमान्नास्तीति म

न्यमानः परेषामाजत्ति पादितमप्राप्तमिव प्राप्नोति। जिज्ञासानुसंधापस्य वा पमितिस्वकारणं संशयं सूच
यति। संशयश्च मीमांसारंभं प्रयोजयति। तथा च शास्त्रे प्रेक्षावत्प्रवृत्तिहेतुसंशयप्रयोजनसूचनाद्युक्तमस्य सूत्र
स्य शास्त्रादित्वमित्याह। भगवान्भाष्यकारो वेदांतमीमांसाशास्त्रस्य व्याचिख्यासितस्येदमादिमं सूत्रं प टि
जितविचारवचनो मीमांसाशब्दः। परमपुरुषार्थहेतुभूतसूक्ष्मतमार्थनिर्णयफला तावद्विचारस्य पूजितता। पृ४
तस्या मीमांसायाः शास्त्रं साधनेन शिष्यते। शिष्यतेऽनेन यथावत्प्रतिपाद्यत इति। सूत्रं च बहुर्थसूचनाद्भवति
यथाहुः। लघूनि सूचितार्थानि स्वल्पाक्षरपदानि च। सर्वतः सारभूतानि सूत्राण्याहुर्मनीषिण इति। तदेवं सूत्र
ख्या० तात्पर्यं व्याचिख्यासुः प्रथमं पदमथेति व्याचष्टे। तत्राथशब्दस्यानन्तर्यार्थः परिगृह्यते। तेषु सूत्रपदेषु प्रथमोऽथा
थशब्दः स चानंतर्यार्थ इति योजना॥ नन्वधिकारार्थोऽप्यथशब्दो दृश्यते। यथा अथैष ज्योतिरिति वेदे यथा च
लोके अथ शब्दानुशासनं अथ योगानुशासनमिति तत्किमत्राधिकारार्थो न गृह्यत इत्यत आह। नाधिकारा
र्थः। कुतः। ब्रह्मजिज्ञासाया अनधिकार्यत्वात्। जिज्ञासा तावदिह सूत्रे ब्रह्मणः श्रुतत्वान्नाधिक्रियाव्ध तत्र प्रधान
प्रतीयते। ननु यथा दंडी प्रैषानन्वाह सत्राज्ञचानमपि दंडशब्दार्थो विवक्ष्यते एवमिहापि ब्रह्मज्ञानेऽपि तु
तं ब्रह्ममीमांसाशास्त्रप्रवृत्त्यंगसंशयप्रयोजनसूचनार्थेन जिज्ञासायाः एव विवक्षितत्वात्तद्विवक्षायां तु
दसूचनेन काकदन्तपरीक्षायामिव न ब्रह्ममीमांसायामिष्टावतः प्रवृत्तेरभावात् तदानीं ब्रह्म वा तज्ज्ञानं वाऽधिक
प्रयोजनेन भवितुमर्हतः। अनभ्यस्तानां प्रत्ययविरोधेन वेदांतानामिव विधेयार्थप्रामाण्यानुपपत्तेः कर्मत्रव
स्युपयोगितया प। चरितार्थानां वाजपेयोपयोगिनां वार्हस्पत्यसवमादीनामिव स्थितार्थानामपि॥ १४
स्वाध्यायाध्ययनविध्यधीनग्रहणस्योपक्रमत्वात्। तस्मात्तदेहप्रयोजनेनीजिज्ञासेह पदतो

पा॰दे॰

वाक्यतश्च प्राधान्यं विवक्षितं न च तस्या। अधिकार्यत्वमप्रकृतत्वमानन्तर्येण तत्समभिव्याहृतोऽथो ऽधि-
कारार्थः स्यात्। जिज्ञासाविशेषणं तु ब्रह्मज्ञानमधिकार्यं नैव। न च तदप्यथशब्देन संबध्यते प्राधा-
न्याभावात्। न च जिज्ञासा मीमांसापर्यायेणानुशासनवदधिक्रियेत। नांतसनिपात्यमाङ्मानवस्था
दामानप्रजायामित्यस्माद्धातोर्मान्बधेत्यादिना ऽनिच्छार्थे सति सन्प्रत्यये तस्य मीमांसापदस्य पूजि-
तविचारवचनत्वात् ज्ञानेच्छावाचकत्वाच्च जिज्ञासापदस्य प्रवर्तिका हि मीमांसा या जिज्ञासा स्यात्। न प्रवृत्तप्र
दे॰ वर्तिकयोरेकस्मिन्काले तेनानुपपत्तेः। न च वाच्यार्थपरत्वस्योपपत्तौ सत्यां अन्यार्थपरत्वकल्पनायुक्ता-
तिप्रसंगात्। तस्माद्युक्तं जिज्ञासाया अनधिकार्यत्वादिति। अथ मंगलार्थो ऽथशब्दः कस्मान्न भव-
ति। तथा च मंगलहेतुत्वाद्ब्रह्मज्ञानस्य जिज्ञासाकर्तव्यतेत्यर्थः संपद्यते इत्यत आह। मंगलस्य च वा-
क्यार्थे समन्वयाभावात्। पदार्थ एव हि वाक्यार्थे समन्वीयते। स च वाच्यो वा लक्ष्यो वा। न चैष मंगलमथश-
ब्दस्य वाच्यं वा लक्ष्यं वा। किंतु मृदंगशंखध्वनिवदथशब्दश्रवणमात्रकार्यं। न च कार्यं ज्ञाप्ययोर्वा-
क्यार्थे समन्वयः शाब्दव्यवहारे दृष्टः इत्यर्थः। तत्किमिदानीं मंगलार्थोऽथशब्दस्तत्र तत्र प्रयोक्तव्यः। तत्र न
पाचोंकारश्चाथशब्दश्च द्वावेतौ ब्रह्मणः पुरा। कंठं भित्त्वा विनिर्यातौ तस्मान्मांगलिकावुभौ। स्मृति
कोपरस्यत आह। अर्थान्तरप्रयुक्त एव ह्यथशब्दः श्रुत्या मंगलं कुर्वन्मंगलप्रयोजनो भवति। अर्थान्तरेषु
आनन्तर्यादिषु प्रयुक्तो ऽथशब्दः श्रुत्या श्रवणमात्रेण वेणुवीणाध्वनिवत् मंगलं कुर्वन्मंगलप्रयोजनो भ- वति

वति· अन्यार्थानीयमानोदकुंभदर्शनवत्· तेन न स्मृतिव्याकोपो न चेहानंतर्यार्थस्य सतो न्यत्र नरामा त्रे
नामंगलार्थते त्यर्थः। स्यादेतत्· पूर्वप्रकृतापेक्षोऽपूर्वाद्विमविषयति· विनो वानंतर्यार्थत्वं तदर्थमेव वा
तर्थ अथशब्दप्रवृत्तिनिमित्तं विमृश्यते किमयमथशब्द आनंतर्याधिकार इति अत्र विमर्शवाक्ये अथशब्दः पूर्वप्रकृ
प्रत्येय तमथशब्दमपेक्ष्य प्रथमोपन्यासः पूर्वं च पक्षांतरोपन्यासेन चास्यानंतर्यमर्थः पूर्वप्रकृतप्रथमपक्षोपन्या
सेन व्यवायात्· न च पूर्वप्रकृतानपेक्षः। तदनपेक्षस्य तद्विषयत्वाभावेनासमानविषयतया विकल्पा
नुपपत्तेः। नहि जातु भवति किं नित्य आत्मा अथ वा नित्या बुद्धिरिति तस्मादानंतर्यं विना पूर्वप्रकृतापेक्षो
रु ऽप्यथशब्दः। कस्मान्न भवतीत्यत आह· पूर्वप्रकृतापेक्षायाश्च फलत आनंतर्याव्यतिरेकात्· अस्या
र्थः। न वयमानंतर्यार्थतां व्यस्तनितया वाच्यामहे किंतु ब्रह्मजिज्ञासाहेतुभूतपूर्वप्रकृतसिद्धये· सा
च पूर्वप्रकृतार्थापेक्षत्वेपि अथशब्दस्य सिध्यतीति व्यर्थ आनंतर्यार्थत्वोपादानाग्रहोऽस्माकमिति तदि व
दमुक्तं फलत इति· परमार्थस्तु। कल्पांतरोपन्यासे पूर्वप्रकृतापेक्षा न चेह कल्पांतरोपन्यास इत्यपा
दिशो व्याप्त आनंतर्यार्थ एवेति युक्तं· भवत्वानंतर्यार्थः किमेवं सतीत्यत आह· सति चानंतर्यार्थ इति·
नतावद्धर्मस्य कस्यचिदानंतर्यमिति वक्तव्यं तस्य चाभिधानमंतरेणापि प्राप्तत्वात्· अत्र यं यं हि पुरुषः
किंचित्कृत्वा किंचित्करोति· नचानंतर्यमात्रस्य दृष्टमदृष्टं वा प्रयोजनं पश्यामः। तस्मात्तस्यात्रानंतर्यं व
क्तव्यं। यदि नाब्रह्मजिज्ञासा न भवति यस्मिन्सति भवंती भवत्येव तदिदमुक्तं· यस्मान्नैयत्येन यमेना १५

मेवेति सांप्रतं मननाद्भेदेन च तत्र दर्शनस्य निर्देशात् न च मननमपि तत् ॥ ईक्षा प्र: धीशोध: ॥ अनन्तरवा-
क्यनिर्दिष्टो ब्रह्मलोको वा जीवघनं स हि समस्तकरणात्मनः सूत्रात्मनो हिरण्यगर्भस्य भगवतो निवास-
भूमित्यपाकरणाय परिवृतानां जीवानां तत्र संघात इति भवति जीवघनः तद्देवं त्रिमात्रोंकारायतनेप-
रमेव ब्रह्मोपास्यं अत एव चास्य देशविशेषाधिगतिफलमुपाधिमत्वात्क्रमेण च सम्यग्दर्शनोत्पत्तौ
मुक्तिः ब्रह्म वेद ब्रह्मैव भवतीति तु निरुपाधिब्रह्मवेदनविषया श्रुतिः परं तु ब्रह्म सकेवलमात्रायत-
नमुपास्यमिति मंतव्यं ॥ दहर उत्तरेभ्यः ॥ अथ यदिदमस्मिन्ब्रह्मपुरे दहरं सद्मं गुहाप्रायं पुंडरीकं
पुंडरीकसमावेशो वेश्म दहरोस्मिन्नंतराकाशस्तस्मिन्यदंतस्तदन्वेष्टव्यं आगमाचार्योपदेशाभ्यां
श्रवणं च तद्विरोधिना तर्केण मननं च तदन्वेषणं तस्य च केणचादरैरत्यैर्दीर्घकालसेवितेन ध्याना- नैरं
भ्यासपरिपाकेण साक्षात्कारो विज्ञानं विशिष्टं हित तद्ज्ञानं पूर्वेभ्यः तद्विद्धा विजिज्ञासनं अत्र सं-
शयमाह तत्रेति तत्र प्रथमं तावदेव संशयः किं दहराकाशादन्यदेव किंचिदन्वेष्टव्यं विजिज्ञासित- रा०म०

यं चउत दहराकाश इति यद्यपि दहराकाशोन्वेष्टव्यस्तथापि किंभूताकाशः आहो शारीरआत्मा वि
वा परमात्मेति संशयहेतुं पृच्छति कुत इति तत्र हेतुमाह आकाशब्रह्मपुरशब्दाभ्यामिति तत्र प्रथमं त्वाउ
त भूताकाश एव दहर इति पूर्वपक्षयति आकाशशब्दस्य भूताकाशे रूढत्वादिति सपक्षस्तु बहूत्तरोत्तरसं
दर्भविरोधात्तुच्छः पूर्वपक्ष इत्यपरितोषेणापक्षान्तरमालंबते एवं पक्षे अथवा जीवो दहर इति प्राप्तपु
क्तमित्यर्थः तत्राधेयत्वाद्विशेषाच्च पुरं जीवस्य पुरं तद्देहो न ब्रह्मणः पुरं कोहेतुद्वयवियोगतः असाधा
रणेन हि व्यपदेशा भवंतिपद्यादेतिजलपवनबीजादिसामग्रीसमवधानजन्माप्यंकुरः शालिबीजे
न व्यपदिश्यते शाल्यंकुर इति न तु क्षित्यादिभिस्तेषां कार्यांतरेष्वपि साधारणत्वात् तद्देहशरीरं ब्रह्मवि
कारोपि न ब्रह्मणा व्यपदेष्टव्यं ब्रह्मणः सर्वविकारकारणत्वेनातिसाधारणत्वात् जीवभेदधर्माध
र्मोपार्जितं तदसाधारणकारणत्वात् जीवेन व्यपदिश्यत इति युक्तं अपि च ब्रह्मपुर इति सप्तम्य
धिकरणे स्मर्यते तेनाधेयेनाने न संवहव्यं न च ब्रह्मणः स्वे महिम्नि व्यवस्थितस्यानाधेयस्याधारसंबंधः
कल्पते जीवस्त्वाराग्रमात्र इत्याधेयो भवति तस्मात् ब्रह्मशब्दो हृदयादिसप्तदेहादिव्यवहरणतया जीवे
योगिको वा भाक्तो वा व्याख्येयः चेतनत्वे च भक्तिः प्रधानेनानुपधाने तु विशेषः नाच्यत्वगम्यतस्यांतरे तत्

२९

वा०प्र० जीवस्यपुरंभवतुशरीरंपुंडरीकंदहरंगोचरतात्वन्यस्यभविष्यतिवत्स्वराजस्यपुरइववउक्तापिन्यांमेत्रस
८६ स-ह्रैसेसनआह नत्रपुरस्वामिनःस्वपमर्घोवेश्मस्वत्वधिकरणमनिर्दिष्टाधेयमाधेयविशेषापेक्षा
यांपुरस्वामिनःप्रकृतत्वात्जीवेनैवाधेयेनसंबध्यसहृनयेत्तंनाधेयांतरेणासंबंधंकल्पयतिननुतथापिश
रीरमेवास्यभोगायतनमितिकोहृदयपुंडरीकस्यविशेषायत्तहेवास्यसंध्रेत्यतआह मनउपाधिक
श्चजीवइतिननुमनोपिचलत्तयासकलदेहवृत्तियर्यायेणोत्यतआह मनश्चप्रायेणेति आकाश
इतितथाप्यसोवरस्याह नवाचदहरस्याकाशस्यान्वेष्यत्वमितिसिद्धप्राप्तेउच्यते भूताकाशस्यतावत्
तूनदहरत्वेपावान्वायमाकाशस्तावानेषोंहृदयाकाशइत्युपमानविरोधात् तथाहितेनतस्योप
मेयत्वरामरावणयुद्धवत्अगमाभेदमारोप्यगतोसत्यानयुज्यतेव्याप्तितुदहराकाशस्यब्रह्मत्वेन
भूताकाशात्भेदेनोपमानस्यगतिःनचानवच्छिन्नपरिमाणमवच्छिन्नंभवेतितथासत्यवच्छेदा
नुपपत्तेःनभूताकाशमानत्वेब्रह्मणोऽविधीयतेयेनस्यापानयमाकाशादितिश्रुतिविरोधःस्या
दपितुभूताकाशोपमानेनपुंडरीकोपाधिप्राप्तंदहरत्वंनिवर्त्यतेऽपिचसर्वेयवडजरेहेतवोदह
राकाशस्याभूताकाशत्वेव्यासेधंतीत्याहनचकस्मिन्नमेदइतिनापिदहराकाशोजीवइत्याहयध राम०
+ यदस्याकाशलादितासामान्येनजीवेभाकोः जोक्त्याभूताकाशात्एवोपमाकारणाद्दो दहरोस्मिन्नंतराकाश

व्याप्तशब्द इति उपलब्धेर् इति स्थानं ब्रह्मणो देहो ऽभ्युपगम्यते तेनासाधारण्येन देहो ब्रह्मपुरं भवेत् देहे हि ब्रह्मो-
पलभ्यते इति असाधारण्यं तथा देहो ब्रह्मपुरम् इति व्यपदिश्यते ननु ब्रह्मविकारत्वेनात्मनश्च ब्रह्मशब्दार्थो
मुख्यो भवति अस्तु वा ब्रह्मपुरं जीवपुरं तथापि यथा वत्सराजस्य पुरे उक्ते ऽपि न्यायमैत्रस्य सम्भव एव-
वं जीवस्य पुरे दहरं पुण्डरीकं ब्रह्मसदनं भविष्यति उत्तरेभ्यो ब्रह्मलिङ्गेभ्यो ऽवधारणात् ब्रह्मणो हि बाधके प्र-
माणे बलीयसि जीवस्य च साधके प्रमाणे सति ब्रह्मलिङ्गानि कथंचिद् भेदविवक्षया जीवे व्याख्यायन्ते
न चेह ब्रह्मणो बाधकं प्रमाणं साधकं वास्ति जीवस्य ब्रह्मपुरव्यपदेशश्चोपपादितो ब्रह्मोपलब्धिस्था-
नतया अर्भकौकस्त्वं चोक्तं तस्मात् सति सम्भवे ब्रह्मणो लिङ्गानां नाब्रह्मणि व्याख्यानम् उचितम्
इति ब्रह्मैव दहराकाशो न जीवो भूताकाशो वेति अत्र च गमनमनुविद्य ब्रह्मानुभूय चरणं चास्य
तेषां कामेषु चरणं भवतीत्यर्थः स्यादेतत् दहराकाशस्यान्वेष्टव्यत्वे सिद्धे न तत्र विचारो युज्यते ननु त-
दन्वेष्टव्यम् अपि तु तदाधारम् अन्यदेव किंचिद् इत्यत आह अनुभाष्यते यदप्येतदिति अनुभाषितं दूषय-
ति अत्रेदमुच्यते यथाकाशाधारम् अन्यदन्वेष्टव्यं भवेत् तदेवोपरि व्युत्पादनीयम् आकाशस्तुत्या द-
नेनु कोपपद्यते इत्यर्थः चोदयति नन्वेतदपीति आकाशोपमानमपि तत्र दत्तं जीवस्तत्र सङ्गावप्रदर्श

नाप्येव अथाकाशपरमेव कस्मान्न भवतीत्यत आह तं चेद्ब्रूयुरिति आचार्येण हि दहरोऽस्मिन्नन्तर आकाशस्त-
स्मिन्यदन्तस्तदन्वेष्टव्यं तद्वाव विजिज्ञासितव्यमित्युपदिष्टे अन्तेवासिना आक्षिप्ते किं तदत्र विद्यते यदन्वेष्टव्यं
पुंडरीकमेव तावदल्पं ततोऽल्पतरं तदवरुद्धमाकाशं सुदहरतमं तस्मिन्नस्य दहरस्य तन्मध्ये किमपरमस्ति यो नास्त्येवेत्य-
र्थः तत्र किमन्वेष्टव्यमिति तदस्मिन्नाक्षेपे परिसमाप्ते समाधानावसरे आचार्यस्याकाशोपमानोपन्य-
मेव वदतु उभे अस्मिन्द्यावापृथिवी समाहिते इति तस्मात्पुंडरीकावरुद्धाकाशाश्रये द्यावापृथिव्यावेवान्वेष्ट-
व्ये उपदिष्टे नाकाश इत्यर्थः परिहरति नैतदेवमिति स्यादेतत् तत्सर्वमप्येतन्नोऽस्य कुम्भघटमात्रस्य दोषत्वे
न नोद्यते इत्यत आह तत्र वाक्यशेष इति वाक्यशेषो हि दहराकाशात्मवेदनस्य फलवत्त्वं ब्रूते यस्य फलव-
त्त्वं तेनैव तथा चोद्यते यत्फलवत्त्वं तदिच्छतीति तदन्वेष्टव्यं तद्वाव विजिज्ञासितव्यमिति दहराकाशवि-
षयमवतिष्ठते स्यादेतत् द्यावापृथिव्यावेवात्मानो भविष्यतः नाभ्यामेवात्मा लक्ष्यापि व्याप्ते आकाशश्च
ह्येव जगत आकाशाधारेतौ वैयधिकरण्यश्रुतेः इत्यत आह अस्मिन्कामाः समाहिता इति सर्वमा-
त्मा अपहतपाप्मा इत्यन्तेनेन हि प्रकृते द्यावापृथिवी समाधानाधारं आकाशमात्रमप्य द्यावापृथिव्याभिधा-
नव्यवहितमपीति शेषः ननु सत्यकामत्वानस्यैतत्फलेन तदन्नेनेरनिर्दिशात ननु दहराकाशवेदनस्यैतत्फलम ~

हे समुच्चयार्थेन च शब्देन तस्मिन्कामा इति च सत्या इति चैकवचनेन द्यावापृथिव्यौ परामृष्टु महेती
ति दहराकाश एव परामृष्ट इति समुच्चयार्थः तदनेन क्रमेण तस्मिन्यदन्तरिति श्रुतत्वाद्दहरोनन्तरं सप्ताका
शमतिलंघ्य दहरं पुंडरीकं परामृशतीत्यक्रोन्त्रवति तस्मिन्दहरे पुंडरीके यदन्तराकाशं तदन्वेष्टव्यमित्यर्थः
गतिशब्दाभ्यां तथा हि दृष्टं लिंगं च उत्तरेभ्य इदमस्य प्रयुंजते मेव दहराकाशं प्रक्रम्य बताहो कष्टमिदं प्र
वर्त्ते तेजं तत्रात्मा चबोधविकलानां पुरुषैः स्वाधीनमपि न प्राप्यते यथा चिरंतननिरूढानि बिंदुमत्यपि
हितानोकुलषोत्तशकलानां पथि गतानामुपर्युपरि संचरद्भिरपि पांथैर्धमायावद्धिर्यावर्त्तनि वहम्यन्ने
रोतानि नोपादीयंत इत्यभिसंधिमती साहुनमिव सस्वेरमिव श्रुतिः एवमेवेमाः सर्वाः प्रजा अहरह
र्गच्छत्यस्य एतं ब्रह्मलोकं न विंदंतीति स्वापकाले हि सर्वेषां विद्वानविद्वांश्च जीवलोको दहरपुंडरीकाश्रयं द
हराकाशाख्यं ब्रह्मलोकं प्राप्नोत्यनाद्यविद्यातमः पटलपिहितत्वात्पायं ब्रह्मभूयमोपगतो ह्यस्मीति
न वेद सोयं ब्रह्मलोकशब्दः तदुक्तिर्ब्रह्मप्रस्तावे जीवलोकस्य दहराकाशस्यैव ब्रह्मरूपलोकेता माह
तुं तदेतदाह भाष्यकारः इत्थमस्य परमेश्वरस्य दहरोपस्माद्दहर ऊकाशे यदिति तदनेन गतिशब्दो व्या
ख्यातौ तथा हि दृष्टमिति सूत्रावयवं व्याचष्टे तथा ह्यहरहर्जीवानामिति वेदे लोके च दृष्टं यद्यपि च

सूत्रस्य ब्रह्मभावे लौकिकं तु पुमाराणां तरमास्ति तथापि वैदिकीमेव प्रसिद्धिं स्थापयितुमुच्यते ईदृशीनामे
यं वैदिकी प्रसिद्धिः पल्लोके पि जीयते यथाऽत्रेरेप यथा च लोके तथेह ब्रह्मलोक शब्दोपीति योत्तनालिंग
चेति सूत्रावयवव्याख्या चोद्यमुखेनावतारयति ननु कमलासनलोकमपीति यदि इह शब्दैति गमयेद्यदि
ब्रह्मणो लोक इति चाव्रतावति घारस्त्रष्यति स्या मेषष्ठीसमासः कर्मधारयो वलीयानिति स्थितमेव
वथापीह षष्ठीसमासनिराकरणेन कर्मधारयसमासस्थापनाय लिंगमप्यस्तीति तदप्यकं सूत्रक
रेणात्र याहि लोकवेदप्रसिद्धाहरह ब्रह्मलोकमाद्य मिधानमेव लिंगं कमलासनप्राप्तेविप्रस्तारसंभ
वाद्यावत्तेमानेषष्ठीसमासाशंकां व्यावर्त्तयद्दहराकाश प्राप्तावेवावतिष्ठते न दहराकाशो ब्रह्मणोलो
कः किंतु तद्ब्रह्मैति प्रसाचनत्लोकश्चेति कर्मधारयः सिद्धो भवति लोक्यत इति लोको हृत्पुंडरीकस्थो ब्रह्म खल
यं लोकयते [illegible] पंतवल्लु पुंडरीकस्थम्म तत्करणं तस्मिन्नुपहितं प्रत्याहृते तरकरणानां योगिनो नि
र्मलं दर्शो दर्केव दुर्ममसो विदमतिस्वच्छं चेतनमस्पोतिस्वरूपं ब्रह्मावलोक्यत इति घनेन [illegible] श्रुयमहिम्नो
स्यास्मिन्नुपलब्धेः सेतोर्विधृतिशब्दोभाववचनः धृतेश्च परमेश्वरस्य दहराकाशः कुतः अस्य विधर
णालन्दराणास्पमहिम्नोऽस्मिन्नेवईश्वरस्य चक्षुपतेरिते सु तेषुपलब्धेः तिगरेण्याख्यातमस्य भाष्ये प्रासे एम०

देश्वनचेयमाकाशशब्दस्य ब्रह्मणि लक्ष्यमाणगुणयोगात् वृत्तिः सा प्रतीतौ यथा रथांगनामा
चक्रवाक इति लक्षणा किंतु संतोनिरूढेति स्फुटार्थः येनाकाशशब्दो ब्रह्मण्यपि मुख्यस्वनभोवदिसा
वह्नेतेनेरस्यापस्थानेकार्यत्वमिति अन्नस्य लक्ष्यः शब्दार्थेइतिचमीमांसकानांमुद्राभेदः हृत्तलक्ष्यते
न्याकाशशब्दाद्विभुत्वादिगुणयोगेनापि ब्रह्मणि न च ब्रह्मरूपे व मुख्यो नभसितु तेनैव गुणयोगेनवस्ते
तीति वाच्यं लोकाधीनावधारणत्वेन शब्दार्थसंबंधस्य वैदिकेपदार्थप्रत्ययस्य तत्पूर्वकत्वात् न
नुयावान्चयमाकाशस्तावानेषोन्तर्हृदयाकाश इति श्रुतिरेकनिर्द्दिशात्ल लक्षणायुक्ता नहिभवद्भ
ति गांगायां कूलमिति विवक्षिते गंगायां गंगेति प्रयोगः तर्हि मिश्राणां पौर्णमास्यां पौर्णमा
स्यां यजेतामावास्यायाममावास्यया यजेतेत्यस्य साधुर्वैदिकः प्रयोगः न त्वयोः पौर्णमास्यमावास्याश
ब्दावाग्नेयादिषु मुख्यौ प्रयोक्तं यत्र शब्दादर्थप्रतीतिस्तत्र लक्षणा यत्र पुनरन्यतोर्थनिश्चिते शब्द
प्रयोगस्तत्र वाचकत्वमेवेति तदयुक्तं उभयस्यापि व्यभिचारात् सोमेन यजेतेति शब्दादर्थः प्रती
यते न वाचकस्य चिह्नास्त्रणीकृत्वाकृते वाक्यार्थात् न च यस्यैवं विद्वान् पौर्णमासीं यजते य
एवं विद्वानमावास्यामित्यत्र पौर्णमास्यमावास्याशब्दौ न लाक्षणिकौ नस्माद्यार्थिकं चिदेनदि

वा॰प्र॰ ति॥१८॥ इतरपरामर्शात्स इति चेन्नासंभवात् सम्यक्प्रसीदत्यस्मिन् जीवो विषयेन्द्रियसंयोगजनितं का
५८ लुष्यं जहातीति सुषुप्तिः संप्रसादो जीवस्यावस्थाभेदो न ब्रह्मगुणः तथा शरीरात्समुत्थानमपि शरीरा
श्रयस्य जीवस्यैव न त्वनाश्रयस्य ब्रह्मणः तस्माद्यथा पूर्वोक्ते वाक्यशेषगते लिंगे ब्रह्मावगम्यते दहराका
शपरवाक्यशेषगताभ्यामेव संप्रसादसमुत्थानाभ्यां दहराकाशो जीवः कस्मान्नावगम्यते न स्यान्नास्ति
विनिगमनेति शंकार्थः नासंभवात् संप्रसादसमुत्थानाभ्यां हि जीवपरामर्शो न जीवपरः किंतु तदीप
वास्तवरूपब्रह्मभावपरः यथा चैष परामर्शो ब्रह्मण एवेति तेन संप्रसादसमुत्थाने जीवलिंगमपितु ब्र
ह्मणास्तवनादृश्योदितस्यैव स्पतेत्राकाशोपमानादपरुक्त ब्रह्माव्यभिचारिगुणः ब्रह्मपराश्चैत्यास्तिविनि
गमनेत्यर्थः॥१९॥ उत्तराच्चेदाविर्भूतस्वरूपस्तु॥ दहराकाशमेव प्रकृत्योपाख्यायते यमात्मानमन्वि
ष्य सर्वांल्लोकानाप्नोति स सर्वांश्च कामानिति तमात्मानं विविदिषंतौ सुरासुरराजाविंद्रविरोचनौ समित्पाणी
प्रजापतिं विविदिषुमानजग्मतुः आगम्य च द्वात्रिंशद्वर्षाणि परिचरणपरौ ब्रह्मचर्यमूषतुः अथैतौ
प्रजापतिरुवाच किं कामाविह स्थौ युवामिति तौ च तुय आत्मापहतपाप्मा तेमा वां विविदिषावहेति त
२ तः प्रजापतिरुवाच य एषोऽक्षिणि पुरुषो दृश्यते स एष आत्मा अपहतपाप्मादिगुणो मद्विज्ञानात्सर्वांल्लो राम॰

ककामावाप्तिरेव स्यादनमेवमर्थेन तृष्णं त्वा एतावत्प्रतीतौ शाक यावद्गतिनपा छायापुरुषं जगद्धेतुः प्र
जापतिं च पप्रच्छतुः अथ योऽयं भगवोऽप्सु परिख्यायते यश्चादर्शे यश्च खड्गादौ कतम एतेषु स्यात् एवं ध्वावा सकेषु सर्वे
ष्विति तेन मे न यो क्षिण्यात्मा प्रजापतिर्येनाहो स्तु दृष्टस्तु ज्ञाता वेतौ अस्माभिरवसि छायात्मा आत्मोपदिष्टः ए
तौ छायापुरुषग्राहिणौ ग्रहौ बुद्धी पौ वं भोतौ स्त्वई ति ब्रूमः ततः समारोपितयोः हि सव हुमानतो विमानितौ
स्यातां शमेन स्वेन यथावदुपदेशेन गदं हीयातामस्मदपनोदपीशापमनुरुध्य यथार्थं इहपि ध्याम इत्यभिसं मा
स धिमान् प्रजापतिः उदशराव आत्मानमवेक्ष्य यदात्मनो न विजानीथस्तन्मे प्रब्रूतमिति तौ च हृदृष्टा संतुष्टहृद
यौ नातु तां अथ प्रजापतिरेतौ विपरीतग्राहिणौ मा भूतामिति पाशयवानपप्रच्छ किमत्राविपश्यतमिति तौ
होचतुः पृष्टो वावामस्मि चिरं ब्रह्मचर्यचरणात् समुपजातानि तन रव लोमादिमंतावेवमावयोः प्रतिरू
पकं नखलोमादिमदृष्टशरावे पश्याव इति ... न रेतयोः छायात्मविभ्रममपनिनीषुः यथेदं हि छायापु
रुषं यजमानं पापधर्मेभेदेनावगम्यमानमात्मलत्ररा विहारेण नात्मा एवमेवेदं शरीरं नात्मा किं तु त
तोऽभिन्नमित्यं च पश्यतीति काम्यामेतौ जानीयातामिति पाशयवानप्रजापतिरुवाच साध्वलंकृतौ सुव
सनौ परिष्कृतौ भूत्वा पुनरुदशरावे पश्यतमात्मानं पश्याद्यात्तपदपथस्त हूत क्षितितौ च साध्वलंकृतौ सुव

६२

वा० भू० सन्नौ छिन्ननखलोमानौ तथैव चक्रतुः पुनश्च प्रजापतिना दृष्टौ तमेवात्मानमूचतुः तद्दुपश्रुत्य प्रजापति
१०० रहो बत दृष्ट्वाप्यप्रशान्तसंशयावनयोर्विभ्रमः तद्यथाभिमतमेवात्मतत्त्वं कथयामि तावत्कालेन कल्मषे क्षी
णे स्वच्छवचनसंदर्भयोर्वीर्ययोरपि लोचनपात्मतत्त्वं प्रति पत्स्येते स्वयमेवेति मत्वोवाच यश्चक्षुष आत्मा एतद
मृतमभयमेतद्ब्रह्मेति तयोर्विरोचनोऽसुरानुपाति त्वरन् छायापात्र इहस्ववात्मत्वमिति मत्वा तन्निसद
नमागत्य तथैवासुराननुपदिदेश देवेन्द्रस्त्वप्राप्तनिजसदनो धुन्वे किंचिद्विरलकल्मषतया छायापात्रस्य
स्ति शरीरगुणदोषानुविधायित्वं निरीक्ष्य परिभावयन्नाह मत्र छायात्मदर्शने भोग्यं पश्यामीति प्रजा
पतिसमीपं समित्पाणिः पुनरपि प्राप आगत्य प्रजापतिना आगमनकारणं पृष्टः परिभावितं जगाद
प्रजापतिस्तु व्याख्यातमप्यात्मतत्त्वमक्षीणकल्मषावरणतया नाग्रहीः तत्पुनरपि तत्कल्मषापचयाय चरापर
णि द्वात्रिंशद्वर्षाणि ब्रह्मचर्यमथ प्रक्षीणकल्मषाय ते अहमेतमेवात्मानं भूयो व्याख्यास्यामीत्युवाच
न स च तथाचरितब्रह्मचर्यः सुरेन्द्रः प्रजापतिमुपससाद तु पुनरल्पापचयात्स्वे प्रजापतिर्योऽयं चक्षुषि आत्मा
पद्द तया प्रादित्स्य लोहितिरंशितं सोऽयं य एष स्वप्ने महीयमानो वनितादिभिरनेकधा स्वप्नोपभो
गान्भुञ्जानो विहरति आत्मास्मिन्नपि चेद्ब्रह्म यदिदं दर्शपदाप्यं पञ्छायापात्रस्य च न शरीरधर्माननुपतति राम०

तथापि शोकभयादिविविधवेदनानुभवान्न तत्राप्यस्ति स्वस्तिप्राप्तिरित्यत उक्तव ॥ ति मघवति पुनरपरा
णि च द्वात्रिंशद्वर्षाणि ब्रह्मचर्यमिदानीमप्यक्षीणकल्मषोऽसीत्यवेत्य प्रजापतिः अथास्मिन्नेवंकारमुपस
न्ने मघवति प्रजापतिरुवाचेयम् आत्मा अपहतपाप्मादिगुणो दर्शितः अक्षिणि च स्वप्ने च सम्प्रसादविषयेन्द्रि
यसंयोगविरहात्सम्पन्नः सुषुप्तावस्थायामिति अत्रापि नेन्द्रो निर्ववार यथा हि जाग्रत्स्वप्नगतो वा अय
महमस्मीत्यात्मानं भूतानि चेति विजानाति नैवं सुषुप्तः किंचिदपि वेदयतेऽतस्तत्र खल्वयमचेतयमानोऽभावप्रा
प्त इव भवति तदिह का निर्वृतिरिति एवमुक्तवति मघवति ब्रह्माद्यापि न ते कल्मषक्षयो भूत इत्यतः पुनरपराणि
वस पंच वर्षाणि ब्रह्मचर्यमित्यवोचत प्रजापतिः तदेवं मघोनस्त्रिभिः पर्यायैर्व्यतीयुः षण्णवतिवर्षा
णि चतुर्थपर्याये पंच वर्षाणि तस्यैवमेकोत्तरशतं वर्षाणि ब्रह्मचर्यं चरतः सहस्राक्षस्य समये दिदृ अ
थास्मै ब्रह्मचर्यसंपन्नाय दग्धकल्मषाय मघवते पुरुषेऽक्षिणि य स्वप्ने य सुषुप्ते अनुसूत एक आत्मा
अपहतपाप्मत्वादिगुणो दर्शितः तमेव मघवन्मर्त्यं शरीरमित्यादिना विस्पष्टमाचष्टे प्रजापतिः अयमस्य
अभिसंधिप्रायः किंचिन्नु खलु दुःखमागमापादितं सर्वं शरीरेन्द्रियान्तःकरणसंबन्धिनमात्मनः स पुनरेतानेव श
रीरादीनवैनाद्यविद्यावशादात्मत्वेनाभिमन्यते ततः तद्गतेन सुखदुःखेन तद्धर्ममात्मानमनुमन्यमानो नु तप्यते परा

वा.प्र॰ त्वमपहतपाप्मत्वादिलक्षणमुदासीनमात्मानं देहादिभ्यो विविक्तमनुभवति अथास्य शरीरवतोप्य
१०१ शरीरस्य नरदेहादिधर्मैः स्वप्रसंगोस्तीति नानुतप्यते केवलमपैति तेनैव स्थानरहितरूपे आवस्थितः स
मस्तलोककामांस्तथा प्रभवति एतस्यैव हि परमात्मनः स्वमात्राः सर्वे कामाः दुःखं त्वविद्यातिमोरणमिति न वि
द्यानां प्रीतिश्च शीलितो यतिमरणव्यामोहदुःखे प्राप्यते तेषामनुग्रहाय परमकृपालुना मर्त्यलोके एवं अवस्थितेः
शरीराद्यावत्संभवोस्मात्तापमारद्धेरेणी च स्वप्ने च सुषुप्ते च चतुर्थे च पर्याये मम एष संप्रसादोस्माच्छरीरात्समु
त्थायेति जीवो वात्मा वापहतपाप्मादिगुणः अतोच्यते नो खलु परस्मात्स्थानं संभवति नापि स्वस्वभाव
स्थायोगः नापि शरीरान्तमुत्थाने तस्माद्यस्यैतस्य वै सोपहतपाप्मादिगुणः अतो सोच्यते जीवस्य चेत
त्सर्वमिति स स्वापहतपाप्मा पाप्मत्वोतः इतिनापहतपाप्मादिभिः परब्रह्मगम्यमेतत्तु जीवस्यापहतपाप्म
त्वादयो न संभवन्तीत्यकं वचानादिविप्रतिपत्तिः किमिव वचनं तत्रुपरि नास्ति वचनस्यातिभारः नैव मानोतर
विरोधः नहि जीवः पाप्मादिस्वभावः किंतु वाग्बुद्धिशरीरारंभको यस्य पाप्मादिः शरीराद्यभावे न भवति धर्म सम
रूपवदूमध्ज्जोभावइति वाकार्थो निराकरोति तनाम्नि श्रेयान् आविर्भूतस्वरूपता आमममभिसंधिः योवोपपद्येपयो
म त्तो वचनमनावरुयमिति शंका उदुहृत्य मुक्तमेके पप्रपंचं ब्रह्मेतरमिति कं रीत्यं च सर्वं तद्धि वर्जितः रुत्तोखिमुक्तंग सम॰

द्यत्र तात्पर्यमवगम्यते तथा च जीवोप्यविद्याकल्पितदेहेंद्रियाद्युपहितं रूपं ब्रह्मणो न तु स्वाभाविकं स्वं च
नामपरं तथापि भ्रमादपरस्तस्मिन्नविद्याद्युपाधौ संभवेत्ति आविर्भूतेन ब्रह्मरूपेणु निरूपाधौ स्वे भवतो ब्रह्मस्वरू
पत्वं न जीवस्य स्वं च ब्रह्मैवोपहितमपाकृदिगुणांशयोजनमिति तदेव दहराकाशेन जीवस्यास्य तत्स्वरू
पाविर्भावे चेद्दूरैव नोदस्तु हि विप्रतिषिद्धमिदमुच्यते जीवस्याविर्भूतस्वरूप इत्यत आह अत एव गत्येति
उदशरावब्राह्मणेनेति पथ्येवाहमिद्योनः श्रुतिविवादस्तु उदशरावउपलक्षणायापधर्मकारणात्तत्त्वस्यविर
हात्मा एवं देहेंद्रियाणयुपलक्षणापापधर्मकारणात्मनात्मोदशरावदृष्टांतेन शरीरात्मतापास्तुच्छाने
बाध इति नोदयति कथं पुनः स्वं च रूपमिति दृष्टांतरसंस्पृष्टं हि तेनाभिभूतं तस्माद्विविच्यमानं व्यज्यते हे
मतारकादिकूटस्थं नित्यस्य पुनरन्येनासंस्पृष्टस्य कुतो विवेचनादभिव्यक्तिः नच संसारावस्थायां जी
वोनभिव्यक्तः दृष्टसृष्ट्योर्दृष्टस्य स्वरूपेणैव संसारावस्थायामभासनं इति कथं जीवरूपेनभासनं इत्यर्थः
परिहरति प्राक्विवेकज्ञानोत्पत्तेरिति अयमर्थः पद्यप्यस्यकूटस्थनित्यस्यान्यसंसर्गो न वस्तुतोस्ति पद्य
पि च संसारावस्थायामस्य दृष्ट्यादिरूपं चकास्ति तथाप्यनिर्वाच्यानाद्यविद्यावशाद्विद्याकल्पितेर्देह
हेंद्रियादिभिरसंसृष्टमपि संसृष्टमिव विविक्तमप्यविविक्तमिव दृष्ट्यादिरूपमस्य प्रथते तथा च देहेंद्रिया

वा॰वृ॰ गतेस्तथा यादृशमित्यादिमिति रविरभवति उपपादितं चैतत् न विस्तरेणाध्यासभाष्य इति नेहोच्यते यद्यपि स्फ

१॰२ टिकादयो जपाकुसुमादिसन्निहिताः सन्निधानेन च संपृक्तस्य योगात्मकं तथा च संपृक्ता तथापि च न साक्षा

त्तज्जपाकुसुमस्य योगिन इत्येतावता दृष्टान्तितादृत्तिवेदनाहर्षभयशोकादयहंही तिके यो न यतितथादे

९ हादीति संप्रसादो ऽस्माच्छरीरात्समुत्थाय परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यत इत्येतद्विभजते ऽक्र

तिकृतं विवेकज्ञानमिति तत्र दृष्टेन श्रवणमननध्यानाभ्यासाः विवेकविज्ञानमुक्तं तस्य विवेकविज्ञानस्य

फलं केवलात्मरूपसाक्षात्कारः स्वरूपेणाभिनिष्पत्तिस्य च साक्षात्कारो ऽहं निरूपः प्रपञ्चमात्रे प्रविला

पयन् स्वयमपि प्रपञ्चरूपत्वात्कतकरजोवत्स्वविलीयते तृष्णा च निर्भेद्य ति खिलप्रपञ्चजालमनुपसर्ग

म परापेधीन प्रकाशमात्मज्योतिः सिद्धं तेन भवति तदिदमुक्तं परं ज्योतिरुपसंपद्येति अत्र चोपसंपत्त्रावुत्तरका

लापाममपि क्त्वाप्रत्ययोमुखं व्याहायस्व पिता तिव न्मत व्यपदा च विवेकसाक्षात्कारः शरीरात्समुत्थानं त

तुशरीरसंपादानककं गमनं न तदा ससशरीरस्यापि संभवति प्रारब्धकार्यकर्मक्षयपर्यन्तं पुरस्तादित्याह तथा

विवेकाविवेकमात्रेणेति न केवलं स यो ह वै तत् परमं ब्रह्म वेद ब्रह्मैव भवतीत्यादि श्रुतिभ्यो जीवस्य पर

मात्मनोभेदः प्राजापत्य वाक्यसंदर्भपर्यालोचनया प्येवमेव प्रतिपत्तव्यमित्याह कुतश्चैतदेवं प्रतिपत्त राम॰

व्यमिति स्यादेतत्प्रतिछायात्मवत् जीवं परमात्मनोभिन्नमपि अपहतपाप्मत्वेन ग्रहयितव्यमस्मात्प
रमात्मानमपहतपाप्मादिमंतं प्रज्ञापयतिग्रोह्यपि तिन्नत्वं जीवस्य परमात्मभावमाचष्टे छायात्मनइवे
त्यत आह नापियति छोपात्मा यमविलादितइति आविलादिती प्यात्मैवोपदिश्यते नछायात्मातस्मा
दसिद्धो दृष्टांतेरत्यर्थः किंच द्वितीयादिष्वपि पर्यायेषु एतं त्वेव ते भूयोनुव्याख्यास्यामीत्युपक्रमात्म्यष्टयमप
पायतिरहितोनछायापुरुषो विद्युतत्वोन्यो दृष्टात्मेति दर्शयति अन्यथा प्रजापतेः प्रतारकत्वप्रसंगादि त्या
ह द्वितीयेपीति अथ छायापुरुषस्य दोषेः कस्मान्नभवति तथा च छायापुरुषस्यैवेतन्मितियदन्धस्यपत र
त्यत आह किंचाहमपि स्वप्नेहंतीव नमंध्नालमिति किंचेति समुच्चयाभिधानं द्वितीयपर्यायसाहित्यद्योते
तत्क्लेशकोनिराकरणद्वारेण छायापुरुषोस्वप्नपरिच्छादीनापमात्मात्मा चकास्तिप्रत्यभिज्ञानादित्यर्थः नाहखलु
ल्वयमेवमिति इति अयं सुषुप्तः से प्रति सुषुप्तावस्थायां अहमस्मीत्यात्मानमहं जानाति स्वरूपमात्मानं न जानाति केन प्र
कारेण न जानाति इत्यत आह अयमहमस्मीति मानि भूतानि चेति यथयस्त अस्य प्रवेतिन हि विज्ञातुर्विज्ञातेर्वि
परिलोपो विद्यते विनाशित्वादिति अनेनाविनाशित्वमसिद्धवद्धेतुकुर्वतासुप्रसिद्धितस्मात्प्रत्यभिज्ञानमु
क्तं एषवाहं जागरित्वा सुप्तः स एवेतर्हि जागर्मीति आचार्यदेशीयमतमाह केचिदिति यदि द्येनमिप्सने

बा०प्र० यदीन्नित्यशुद्धबुद्धमुक्तस्वभावस्यात्मनः ... जीवस्योपाधिकल्पितस्य ब्रह्मभावउपरेदृश्यते नत्वाञ्जो जीव एवा १२

नानन्तरोक्तश्चरसुरविष्ठान पुरुषपरामर्शस्तस्मात्तत्त्वमुच्यते ततो न भवेत्पाञ्चपुरुषोत्त्वेन तारस्मिवाक्यो

१०३ पक्रमसूचितस्य परमात्मनः परामर्शोत न खलु जीवात्मनो पहतपाप्मत्वादिगुणसंभवः तथैः तदे

तदृष्यति तेषामेतस्मिन्नितिसुबोधमतं तरमाहापरे तु वादिनः इतिपदिन जीवः कर्त्ता भोक्ता चैव स्तुतो

भवेत्तन्न तदाप्रपाः कर्मविषयश्च बहुधेरत्न सूत्रकारवचन न यत्नासंभवादिति कुप्ये तवतत्र खलु ब्रह्म

गुणानां जीवे संभवमाहन बामेदेत्र ह्यरागो जीवनां ब्रह्मगुणानां असंभवो जीवे स्थितिः तेषामनभिप्रा

ख०प यः तेषां वादिनां शारीरस्ये शावा नसंज्ञेन तथाहि यौ वोयमौ वौ चनपावेदाता नामेकमङ्गमात्मतत्त्वं

जीवात्मविद्योपधानकल्पितादित्यत्रतात्पर्यमवगम्यते न चैवस्तत्सतोऽप्रसङ्गोग्गुणाः समारोपिते

षु जीवेषु संभवन्ति न खलु वस्तुसत्पारब्धाधर्मोः सेव्यत्वादपः समारोपितेषु जगे संभवितः न च स

मारोपितो भुजंगोरज्वाभिन्नस्तस्मान्नसत्रबाधातः अविद्याकल्पितबकहृष्टेर्मोरूतपथालोकसि

द्धमुमार्श्रिके सेर्विधपः प्रवर्त्ततिरर्ज्जे नोहि विधपइवति पिद्धपिनहीस्यात्सर्वभूतानीतिसाधयोः

मिचारेतिक्रान्त निषेधपुरुषमात्रस्मा विद्यायत्पुरुषाऽपत्वाछ्रीरस्वमस्फुरे दमाह तेषांसर्वं पाप्मानि ते

न नुपस्यचेदन्त्यं ह ते जीवयरामर्शशाद्व ऽपरेहमिति स्वस्थावस्थासु जीवः परामृष्टः बद्धावस्थाविलय दम०

न तस्य पारमार्थिकं ब्रह्मभावं दर्शयितुमित्यर्थः अल्पश्रुतेरिति चेत्तदुक्तमिति सूत्रव्याख्यानेन भाष्येणाव्या-
ख्यातं अनुकृतेस्तस्य चेत्यत्र भानेन तेजसो हि सति तेजोन्तरे यतः तेजोधात्वन्तरं तस्मादनुकाराच्चगम्य-
ते बलीयसा हि सौर्येण तेजसा मन्दं तेजश्चन्द्रतारकादि अभिभूयमानं दृष्टं न तु तेजसोन्येन पेरापि
धायकाः प्रदीपस्य गृह्यन्ते दाहकः न तेजस्वभासा प्रदीपभासापि तु भीशाते अनुपतेत्र तस्य भासा सर्वमिदं विभा-
तीति सर्वशब्दः प्रकृतस्य प्रदीपाद्येः न वा तुल्यरूपेणानुभानमनुकारः संभव[ति] तेन हि गावो वराहमनुधावन्ती-
ति शूकरहिंसा गानुधावनमुपपद्यते गवामपि तु तत्सदृशशूकरानुधावनं तस्माद्युक्त्यापि यस्मिन्द्यौः पृथि-
वी चान्तरिक्षमोतमिति प्रकृतप्रकृतं तथाप्यभिभवानुकारसामर्थ्यलक्षणेन लिंगेन प्रकरणबाधया
तेजोधात्वन्तरमवगम्यते न तु प्राज्ञं लिंगानुपपत्तेः तत्र तस्येति च सर्वनाम प्रत्यासन्नप्रदर्शनीयमेवाव-
मृशति न च तद्व्यवहितं परामृशतीति नियमः समासन्नं हि तेजोन्तरं गगानन्तस्याप्ययमिमा होपवर्ते
किंचिदस्ति तस्मात्स्मोरणान्तराप्रमितमपि तेजोन्तरमलौकिकं शब्दादृष्टत्वेनागम्यत इति प्राप्त उच्यते
प्राज्ञस्यैव हि तल्लिंगं न तु तेजसः लौकिकेन स्मात्र्यदृश्यत्वं ब्रह्मणेषुगम्यते तमेव भान्तमित्यत्र किं ज्यो-
तिष्कं तेजः कल्पयित्वा सर्वादीनां तदनुभानमुपपाद्यतां किं वा भारूपः सत्यसंकल्प इति श्रुतेस्तत्प्रा-

वा०प्र०

१०४

द्वेन प्रकारेणाभानेन सूर्यादीनां भानमनुमापाद्यतामिति विशेषेश्रुतसंभवेश्रुतकल्पना ८ नयुक्तेत्यप्रसिद्धे
नो । लौकिकमुपास्येतेजोपुरस्यनेऽप्यंवित्युक्तेति प्रसिद्धं ब्रह्मैवलेपमितिवदाह प्राज्ञस्यवात्माभवितुमर्हतीति
ति विरोधमाह समत्वाच्चेति ननु स्वप्रतिभाने सूर्यादरमंडलस्तुषं तेजो येस्ते तेन स्वाधेनैते दृश्यंते तेषां
तदेव चास्तु षंतेजो बाह्यसौर्यादितेजः आप्यायितं रूपादि प्रकाशयतितानाप्याप्यंतमंधकारेपि रूपदर्श
नप्रसंगादित्यत आहयेभांतमनुभांत्यंति न हि तेजोंतरस्य तेजोंतरापेक्षा यासेधामं किंतु तज्ज्ञानमनुभा
नेन च लोके चनभानमनुभांति सूर्यादयः तदिदमुक्तं न हि प्रदीपरंति अनुभाप्यव्यभिचारमाहयस्य
क्तमिति स्वदृक्तं भवति यदि स्वरूपसाम्याभावमभिप्रेत्यानुकारो निराक्रियते तदा व्यभिचारः अथ
क्रियासाम्याभावे सोऽसिद्धः अस्ति हि वायुरजसोः स्वरूपविसदृशयोरपि पतनिपतदिरेषा वहनक्रि
यासाम्यं वृक्षायः पिंडयोरिति यद्यपि देहनक्रियान भिद्यते तथापि द्रव्यभेदेन क्रियाभेदेकल्पितस्तत्क्रि
यासादृश्यं व्याख्येयं तदेवमत्वेनुकृतेरिति विभज्यमस्य चेति स्वत्रौ च पर्वविभज्यते तस्य चेति ज्योति
षां सूर्यादीनां ब्रह्मज्योतिः प्रकाशकमित्यर्थः तेजोंतरेणानिंद्रियभावमापन्नेन सूर्यादितेजो विभा
वीत्यप्रसिद्धं सर्वे शब्दस्य हि स्वरसतो निशेषाभिधानं वृत्तिः सा नेजो धातावलौकिकरूपंपमात्रप्रका राम०

शाकेसंकुचेत् ब्रह्मणि तु निःशेषजगदवभासके न सर्वे शब्दस्यार्हत्वे सकुचतीति तत्र शब्दमाहुरन्त्विति स
र्वत्र खल्वयं तत्र शब्दः पूर्वोक्तपरामर्शी तेन रक्तं रागादिमास्वव विप्रकृतेः परस्मिन् प्रत्ययेर्थभेदेत्वाख्याप
माने प्रातिपदिकप्रकृत्यर्थस्यैवेष्टजत्वमस्तीति तेनेतिपरामर्शोन्ल व्यभिचारः तथा च सर्वनाम्न आ
तिरेव त्र हलोपस्थापयति तेन भवतु नाम प्रकरणाल्लिङ्गं बलीयः श्रुतिरक्तलिङ्गात् तव लोप सोतिश्रोत्रमिह
त्र स्रेवगम्यत इति अपि चापि त्वे तातपेद्दितामिधानयोरपि त्वे तामिधाने पुक्तं हेत्वार्थत्वादित्याहानंतर
च हेरामपेपरे कोश इति अस्मिन्वाक्ये ज्योतिर्मा ज्योतिरित्युक्तं तत्र कथं तदेव ज्योतिषां ज्योतिरित्यपे
क्षायामिस्सुपतिष्ठते नतत्र सूर्यो भाति स्वतं त्रैरणत्वमानेनपे क्षितं स्वादृहाय इति ब्रह्मरूपवि
चेषां मानप्रतिषेधोव कल्पते इत्यय मद्रि प्रापं न तत्र सूर्यो भातीति नेपुसति समीपतसूर्यो हीनं
तास्मिन्न प्रभवः प्रतीपेतापि नु विषयस्य प्रमीतेनं तत्र ब्रह्मणि प्रकाशयितव्ये सूर्योदयः प्रक
शकतया भाति किंतु ब्रह्मैव स्वरूपो हि सुप्रकाशयितव्ये सु प्रकाशकत्वेन भाति तन्नु स्वयंप्रकाशं अग
त्योनाहि गृह्यते इत्याहि श्रुतिर्स्पष्ट इति अपि स्वयं तेन न तद्भासयत इति ब्रह्मणो ग्राह्यत्वमुक्तं परादि
ज्जगतमिति अनेन नतु तस्यैव ग्राहकत्वमुक्तमिति ग्राह्याद्देवप्रमितः नांतसोमानमेदे यत्तिपरस्मिन्मान

वर्त्तितेभूतभव्येशितानेति वेन्नोत्तसीतेनसंशयः किमंगुष्ठमात्रश्रुत्यनुग्रहाय जीवोपासनापरमेतद्वाक्यमु
त तदनुरोधेन चेशानश्रुतिः कथंचिद्व्याख्येयतां आहोस्विदीशानश्रुत्यनुग्रहाय परमेश्वरपरमेतद्वाक्यं त
दनुरोधेनांगुष्ठमात्रश्रुतिः कथंचिन्नीयतां तत्रानन्तरं स्यादनन्तरानुरोधविषये प्रथमानुरोधो न्याय्य इति
अंगुष्ठश्रुत्यनुरोधेनेशानश्रुतिर्नेतव्या अपि च पर्यंकेहृत्पुंडरीके हृदस्थानत्वं परमात्मनः स्थानमेवं
दतिर्दृ ईशानतद्धितस्योपलब्धिस्थाने शास्त्रप्रामाण्यभगवतः कमलनाभस्यान्तर्गत एवांगुष्ठश्रुत्यास्था
नमेवोतिर्दिष्टं इतिपरिमाणमात्रं निर्दिष्टम् न च मध्यआत्मनीत्यत्रापि स्थानमेवोच्यते आत्म
शब्दोह्ययं स्वभाववचनो वात्मा वचनो वान्तर्वचनो वा स्यात् तत्र स्वभावस्य भवित्रधीननि
रूपणात यास्वस्य च भवितुर निर्दिष्टं शान्तत्वापत्ते के स्वमध्यइति न चजीवपरपोरन्तिमध्यमंत्रस्ते
तिनेयस्थानं निर्दिष्टं शोविस्पष्टं स्वहृत्कपरिमाणानिर्दिष्टशः परिमाणानिर्दिष्टं शष्टपरत्वसिन्नसंभवीति
जीवात्मैवांगुष्ठमात्रः सर्वस्वतह्युक्ततरापाधिकत्वेनोभागः परमात्मनः श्रुतश्रवणं च प्रायेण
हृत्कमलको शस्थानं हृत्कमलको शष्टमनुष्याणामंगुष्ठमात्रइति तद्वछिद्रोजीवात्मायंगुष्ठमा
त्रो नभरवदंशयवोयाछिन्नमरत्निमात्रे अपि च जीवात्मनः स्पष्टमंगुष्ठमात्रत्वेस्मर्यते अंगुष्ठ

मात्रं पुरुषं निश्चकर्ष यमो बलादिति न हि सर्वेशस्य ब्रह्मणो यमेन बलान्निकर्षः कल्पते यमोपि तन्
गोहरिगुरुवशगोस्मि न स्वतंत्रः प्रभवति संयमने ममापि विष्णुरिति तेनांगुष्ठमात्रत्वस्य जीवे विनि
श्रवणापेक्षितं किंचिद्भूतभव्यं प्रति जीवस्येशानत्वं व्याख्येयमस्तु द्वैतदिति च प्रकृतजीवरूपपर
मर्शति तस्माज्जीवात्मैवात्रोपास्य इति प्राप्तमेवं प्राप्तेभिधीयते प्रश्नोत्तरत्वादीशानश्रवणस्यावि
शेषः ८। तज्जीवस्य ब्रह्मरूपत्वप्रत्यायनपरं वचः इह हि भूतभव्यमात्रं प्रति निरंकुशमीशानत्वं प्रतीयते प्रा
कृष्टं चात्र ब्रह्म अन्यत्र धर्मादित्यादिना तदनन्तरस्य संदर्भस्य तत्त्वमितिवचनतोचितेतिस्यन्तद्वैत
दिति ब्रह्माभिधाने फलं जन्मत्वाच्चांगुष्ठमात्रत्वापायमध्यपि जीवोपगम्यते तद्यापि न तत्परमेतद्धा
केपकित्वंगुष्ठमात्रस्य जीवस्य ब्रह्मरूपताप्रतिज्ञाहनपरस्य च निरंकुशमीशानत्वं न संकोचयितव्यं न
च ब्रह्मप्रश्नोत्तरताहानव्यातेन मुख्यात्तत्त्वमसीति विज्ञानात्मनो बंधयदास्पदस्य नहि तिपुरमात्म
नेकत्वं प्रतिपाद्यते न चेहाप्यंगुष्ठपरिमितस्य विज्ञानात्मन ईशानत्वाद्ब्रह्मभावः प्रतिपाद्यते
इतिफक्तो ।४०। हृद्यपेक्षया तु मनुष्याधिकारत्वात् सर्वगतस्यापि ब्रह्मणो हृदयेवस्थानमपेक्ष्येति
जीवाभिप्रायेन चान्यतः परमात्मनः इह ग्रहणमर्हतीति तेन जीवपरमेतद्वाक्यमित्यर्थः मनुष्यानेव

ब्र०सू० तित्रैवर्णिकानेवार्थित्वादित्यतः संजातानां मोक्षमाणानां च कामेषु कर्मसु अधिकारं निषेधति
१०६ शक्तत्वादिति तिर्यक्‌देवर्षीणां अशक्तानामधिकारं निवर्त्यपतिदुपनयनादि शास्त्राच्चेति शूद्राणाम
नधिकारितां दर्शयति यदप्युक्तं परिमाणनिर्देशात् तस्य तेष्विति यच्चेतत्परमात्मपरं किमिति तत्र हि जी
व इहोच्यते ननु परमात्मैवोच्यतां उच्यते च जीवस्तस्माज्जीवपरमेवेति भावः परिहरति तत्त्वमस्य
तद्वदिति जीवस्य हि तत्त्वं परमात्मभावः तद्वक्तव्यं च जीवमनभिधाय शक्यं वक्तुमिति जीव उच्यत
इत्यर्थः तदुपर्यपि बादरायणः संभवात् देवर्षीणां ब्रह्मविज्ञानाधिकारचिंता समन्वयलक्षणेऽ
संगतेत्यस्यांशा संगीकी संगतिं दर्शयितुं प्रसंगमाहागुष्ठमात्रश्रुतिरिति स्यादेतत् देवादीनां
विविधविचित्रानंदभोगभोगिनां वैराग्याभावान्नार्थित्वं ब्रह्मविद्यायामित्यत आह तत्रार्थित्वं ता
वत्मोक्षविषयमिति स्यात् विषयोगस्य स्वर्गादिक्षयभोगेऽपि भावादस्ति वैराग्यमित्यर्थः ननु दे
वादीनां विग्रहाद्यभावेनेंद्रियाद्यसन्निकर्षेणापाः प्रमाणादिद्विजेरनुपपत्तेरविद्वत्तया सामर्थ्या
भावेन नाधिकार इत्यत आह तथा च सामर्थ्यमपि तेषामिति यथा च मंत्रादिभ्य इत्यत्र तद्विग्रहवत्त्व
थो परिहार्यपाद इति उच्यते ननु श्रद्धेदुपनयनासंभवेनाध्ययनाभावात्तेषामनधिकार इत्यत आ राम०

हनचोपनयनशास्त्रेणेति न खलु विधिवद्गुरुमुखात् गृह्यमाणो वेदः फलवत्कर्मब्रह्मावबोधहे
तुरपि त्वध्ययनोत्तरकालं निगमनिरुक्तव्याकरणादिविदितपदतदर्थसंगतेरक्षिगतश्राद्दन्नाये
न त्वस्य पुंसस्स्मर्यमाणः स च मनुष्याणामिह जन्मनीव देवादीनां प्राचि भवे विधिवदधीतो नांम्रा
म्नाय इह जन्मनि स्मर्यमाणः अत एव स्वयंप्रतिभातो वेदः संभवतीत्यर्थः न च कर्मानधिकारे ब्रह्म
विद्यानधिकारो भवतीत्याह यद्यपि कर्मस्वनधिकारकारणमुक्तमिति वस्वादीनां हि न स्वाद्यंतरम व
स्ति नापि भृग्वादीनां भृग्वाद्यंतरमस्ति प्राच्यां च वस्वादीनां तीर्णाधिकारत्वेनेदानीं देवक्रविता
भावादित्यर्थः विरोधः कर्मणीति चेन्नानेकप्रतिपत्तेर्दर्शनात् मंत्रादिपदसमन्वयात्प्रतीयमानो
र्थः प्रमाणान्तराविरोधे सत्यर्थेनत्वेन नु विरोधे प्रमाणान्तरविरुद्धं चेदं विग्रहवत्वादि देवतायाः स्मा
तेद्यतमानः प्रस्तर इत्यादिवदुपचरितार्थो मंत्रादिरित्याक्षेपः तथा च विग्रहाद्यभावात्तशाक्षेप
हितोर्थोपहितो ब्राह्मणोऽवतेति अचेतनत्वात् नास्याः क्वचिदप्यधिकार इति शंकार्थः नि
राकरोति न कस्मादनेकप्रतिपत्तेः सैव कुत इत्यत आह दर्शनात् श्रुतिस्मृतिषु च तथा हि एक
स्यानेककायनिर्माणमदर्शनाद्यानमपुत्पत्तेबाधदर्शनाद्यानान्तरादर्शनमनुलिंहं श्रुतिस्मृतिषु दर्श

मात्त्रं न हि लोके केन प्रमाणेनादृष्टत्वादागमेन दृष्टमदृष्टं भवति मा भूद्यागादीनामपि स्वर्गसाधनत्वं
त्वमदृष्टमिति मनुष्यशरीरस्य मातापितृसंयोगजत्वनियमादसति पित्रोः संयोगे कुतः संभवः संभ
वे वा नाग्नितोऽपि धूमः स्यादिति बाधदर्शनादिति चेन्न हन्त किं शरीरत्वेन हेतुना देवादिशरीरमपि मा
तापितृसंयोगजं त्वं सिसाधयिषसि तथात्वे श्रुते कातिकोहेत्वाभासः स्वेदजोद्भिज्जादीनां शरीराणाम
तद्धेतुत्वात् इच्छामात्रनिर्माणत्वे देहानामदृष्टचरमिति चेन्न अभ्युपगतत्वे नेच्छामात्रनिर्मा
णत्वासिद्धेः भूतवशिनां हि देवादीनां नानाकार्यविकीर्षावशात् भूतक्रियोत्पत्तौ भूतानां परस्प
रसंयोगेन नानाकार्यसमुत्पादात् दृष्टा च वशिन इच्छावशात् वस्तुक्रिया यथा विषविद्याविद इच्छा
मात्रेण विषशकलप्रेरणं न च विद्याविदो दर्शनेनाधिष्ठानदर्शनात् व्यवहितविप्रकृष्टभूता
धिदर्शनादेवादीनां कथमधिष्ठानमिति वाच्यं काचाभ्रपटलपिहितस्य विप्रकृष्टस्य च
भौमशनैश्चरादेर्दर्शनेन व्यभिचारात् अस्मदादृष्टयोर्देवादीनां काचाभ्रपटलादिवत् म
हीधरादिभिर्न व्यवधीयन्ते न चास्मदादिवत् तेषां शरीरित्वेन व्यवहितविप्रकृष्टादिदर्शनासं
भवोऽनुमीयत इति वाच्यं आगमविरोधेनानुमानस्यानुत्पादात् योगानन्तर्धानं चाञ्जनादिना म राम॰

नुजानामिव नेषां प्रभवतामुपपद्यते तेन सन्ति हितानामपि न क्रतुदेशे दर्शनं संभविष्यति त
स्मात्तत्क्रमनेकप्रतिपत्तेरिति तथा हि कति देवा इत्युपक्रम्येति वैश्वदेवशस्त्रस्य हि निविदि क
ति देवा इत्युपक्रम्य निविदैवोत्तरं ददौ शाकल्याय याज्ञवल्क्यो त्रयश्च त्री च सहस्रेति निविन्ना
म शस्यमानदेवतासंख्यावाचकानि मंत्रपदानि सा तदुक्तं भवति वैश्वदेवस्य निविदि कति दे
वाः शस्यमानाः प्रसंख्याता इति शाकल्येन पृष्टे याज्ञवल्क्यस्योत्तरं त्रयश्च त्री च शतेत्यादि या
वत्संख्याका वैश्वदेवनिविदि देवास्तावन्त इति पुनश्च शाकल्येन कतमे त इति संख्येयेषु
पृष्टेषु याज्ञवल्क्यस्योत्तरं महिमान एवैषामेते त्रयस्त्रिंशत्त्वेव देवा इति अष्टौ वसव एकाद
श रुद्राः द्वादशादित्या इंद्रश्च प्रजापतिश्चेति त्रयस्त्रिंशद्देवाः तत्राग्निश्च पृथिवी च वायुश्चांतरिक्षं
चादित्यश्च द्यौश्चंद्रमाश्च नक्षत्राणि चेति वसवः ते हि प्राणिनां कर्मफलाश्रयेण कार्यकार
णसंघातरूपेण परिणमंतो जगदिदं सर्वं वासयंति तस्माद्वसवः कतमे रुद्रा इति दशेमे पु
रुषे प्राणा बुद्धिकर्मेंद्रियाणि दश एकादशं च मन इति तद्देनाति प्राणाः वहन्तित्वात्ते हि
प्रायणकाले उत्क्रामंतः पुरुषं रोदयंतीति रुद्राः कतम आदित्या इति द्वादश मासाः संवत्स

वा॰ प्र॰
१०८
यत्रमाधवंतन

रस्मावयवाः पुनः पुनः परिवर्त्तमानाः रथारामं तामायुंषि चकर्मफलोपभोगं चादाय यंतो त्यादि
त्याअशनिरिंद्रः स हि बलं सा हि इंद्रस्य परमा ईशा तया हि सर्वान्प्राणिनः प्रमापयति तेन स्तनयि
त्नुरशनिरिंद्रः यज्ञः प्रजापतिरिति पशुरूपं च यशवः प्रजापतिः एत एव त्रयस्त्रिंशद्देवाः वस्ना
मग्निःपृथिवीवायुरंतरिक्षमादित्यद्दिवामानंनीतो त्रिघंते षड्देवाः तेनुषड्ग्निं पृथिवीं चैकी वंतोनत
कृत्यांतरिक्षं वायुं चैकीकृत्य च आदित्यं दिवं चैकीकृत्य त्रयोलोकाः त्रय एव देवा भवंतीति त एतेस
र्वत्रयोन्नप्राणयोरंतर्भवंतः अन्नप्राणौ द्वौ देवौ भवतः तावप्यर्द्धदेवस्य कः कतमोध्यर्द्धः योयंवा
युः पवते कथमयमेक एवाध्यर्द्धः यदस्मिन्सति सर्वमिदमध्यर्द्धं तं कर्द्धिं प्राप्नोतीति तेनाध्यर्द्ध इतिक
तम एक इति स एव चाध्यर्द्धः प्राणः एकोप्रमुसर्वदेवात्मत्वेन ब्रहत्वात् ब्रह्म तदेव त्यदित्याचक्षतेप
रोक्षाभिधायकेन शब्देन तस्मादेकस्यैव देवस्य महिमवशाद्युगपदनेकदेवरूपता माहश्रुतिः स्मृतिश्च
लिंगदर्शाख्यानाः अपि च पृथक्कृतनानाभ्युपायानुष्ठानेन यथाणिमाभागिमाद्यैश्वर्याणां युगपन्नानाकार्यंतिमोरं
त्र्यपेतेन त्रकैव कथा देवानां स्वभावसिद्धानामिमोह आप्राणिमाद्यैश्वर्याणामिति अणिमा महिमा लघिमा
प्राप्तिः प्राकाम्यमेव च ईशित्वं वशित्वं च यत्र कामावसायित्वमिति ऐश्वर्याणि अपराण्याख्याति अनेकत्र कर्म रा॰म॰

भावादुपाधेरप्येकस्याः प्रतीतेः। पाचकादिवत्। आकाशादिशब्दवत्। व्यक्तिवचनाश्च वस्त्वादिशब्दाः। तस्याश्च प्रति
पत्त्यात्तपास्सहसंबंधो नित्यो भवेत्। विग्रहादियोगेन सा च पर्वत्ववस्त्वादीनामनित्यत्वात्। अतः पूर्वं वस्त्वादिशब्दे
न स्वार्थेन संबंध आसीत्। स्वार्थस्यैवाभावात्। तत्रश्चोत्पन्नेषु वस्त्वादिषु वस्त्वादिशब्दसंबंधः प्रादुर्भवन्नेव शब्दा
दिशब्दसंबंधवत्पुरुषस्य बुद्धिप्रभव इति तस्यैकोवाकार्थप्रत्ययोपि पुरुषबुद्ध्यधीनः स्यात्पुरुषबुद्धिप्र
मानानतरधीनत्वमिति मानान्तरापेक्षया प्रामाण्यं वेदस्य स्याद्धन्येनेतिशंकार्थः। उत्तरं। अतः प्रभावात्
वस्त्वादिजातिवाचकाच्छब्दात्तज्जातीयो व्यक्तिं चिकीर्षितां बुद्ध्या लिख्यत्तस्याः प्रभवेन तदिदं तत्संभवतो
ऽतदुक्तं भवति यद्यपि नाशब्दउपादानकारणं वस्त्वादीनां ब्रह्मोपादनत्वात्। तथापि निमित्तकारणोऽमु
केन क्रमेणानयैतावता शब्दार्थसंबंधस्यानित्यत्वं वस्त्वादिनां तेषां तदुपाधेर्वा कपाल्विहास्त्वावच्छिन्न
स्यानित्यत्वादिति। इममेवार्थमाक्षेपसमाधानाभ्यां विभजते। ननूत्पन्नाद्यस्यपत इति। तेनिगदव्याख्या
ता। नत्वि। मिदानीं स्वयंभुवा वादि। मितकालिदासादिभिरिव कुमारसंभवादिः तथा वतदेव प्रमाणतरा
पेक्षत्वाच्चत्वारः प्रामाण्यमापततीति। मित्यत आह। उत्सर्गोप्यपवादैः संप्रदायप्रवर्तनात्मवाइति संप्रदाये
गुरुशिष्यपरंपरयाध्ययनं। एतदुक्तं भवति। उपेयादरपि अपिद्यति यात्रे भाष्यकारः। अपिवाधनेप्येतदृश्यते

प्री०

४ पिमिमिदंयीर किं लिंगाग्रनमतु स्त्रते केएकवर्णो च्चारणानंतर मर्थप्रत्ययादर्शनात् वर्णांतरोच्चारणानर्थक्यप्रसंगाच्च ना ४

तद्दर्शनात्प्रामाणिकत्वं तथाभावो नुमीयत इत्याह। अपिवचिकीर्षितमिति। आक्षिपति। किमात्मकं पुनरि

१०८ ति। अयमभिसंधिः। वाचकशब्दप्रशब्दप्रभवत्वेहि रेवानामभ्युपेतव्यं। अवाचकेन तेषां बहुव्यवनाल्लेखनात्

। तत्र न तावद्ध्रस्वादीनां वकारादयो वर्णा वाचकाः तेषां प्रत्युच्चारणमन्यत्वेनाशक्यसंगतिग्रहत्वात् अग

हीतसंगतेश्च वाचकत्वेतिप्रसंगात्। अपि चैते प्रत्येकं सर्वेपि मिलिताः। तेषामेकवक्तृप्रयुज्यमानानां

रूपतो व्यक्तितो वा प्रध्वंसिनामपवर्गेव तेषां मिथः साहित्यसंभवाभावात् न च प्रत्येकसमुदायाभ्यामन्यः

प्रकारः संभवति। स्वरूपसाहित्याभावे पि वर्णानामग्रेपाठीनामिव संस्कारद्वारकमस्ति साहित्यमि

ति सांप्रतं विकल्पासहत्वात्। कोनु खल्वयं संस्कारो भिमतः किमपूर्वमाग्नेयादि तत्त्वमिव किं वा भावना

परनामा स्मृतिप्रसवबीजं। न तावत्प्रथमः कल्पः न हि शब्दस्वरूपतो यागतो वा विदितो विदितसंगति

रथैधाहतुर्गेहि पवदुच्चरितस्वबधिरेणागृहीतस्य यागगृहीतसंगतेरप्रत्यायकत्वात्। तस्माद्विदितो

विदितसंगति विदितसमस्तज्ञापनोगश्च शोकोधूमादिवत्प्रत्यायको भ्युपेयः। तथा चापूर्वाभिधानोस्य

संस्कारो अर्थप्रत्यायनोगमित्यर्थप्रत्ययात्प्रागवगंतव्यः। न च तदास्यागमोपायोस्ति। अर्थप्रत्ययात्तु तद व

वगममर्थयमानो दुरुत्तरमितरेतराश्रयमपि विशति संस्कारावसायाद्दर्थप्रत्ययः ततश्च तदवसाय इति भा टम०

वनाविधानस्य संस्कारः स्मृतिप्रसवसामर्थ्यमात्मनः। न च तदेवार्थप्रत्ययप्रसवसामर्थ्यमपि भवितुमर्हति ७
नापि तस्यैव सामर्थ्यस्य सामर्थ्यान्तरं। न हि यैव वह्नेर्दहनशक्तिः सैव तस्य प्रकाशनशक्तिः। नापि दहनशक्तेः प्रकाश
नशक्तिः। अपि च युक्तमेतदुच्चरितेभ्यो वर्णेभ्यः सैवास्ति स्मृतिबीजं वासनेत्यर्थप्रत्ययप्रसवस्तु तेन न वास्ति। तस्मा
न्न कथंचिदपि वर्णा अर्थधीहेतवः। नापि तदतिरिक्तस्फोटात्मा तस्यानुभवानारोहात्। अर्थधियस्तु कार्यान्तदव
गमे परस्पराश्रयप्रसंगः इत्युक्तप्रायं। सत्तामात्रेण तस्य नित्यस्यार्थधीहेतुत्वे भावे सर्वदार्थप्रत्ययोत्पादप्रसंगो
निरपेक्षस्य हेतोः सदातनत्वात्। तस्माद्वाचकोऽङ्गात्मवाचो स्यादित्यनुपपन्नमिति। अत्राचार्यदेशीय आह
स्फोटमिमाहेति। मन्यामहे न वर्णाः प्रत्यायकाः इति न स्फोट इति तु मन्यामः। तदनुभवानन्तरं विदितसंगतेरर्थ
धीसमुत्पादात्। न च वर्णातिरिक्तस्यानुभवो नास्ति गौरित्येकं पदं गामानय शुक्लामित्येकं वाक्यमिति। नाना वर्णा
तो पदातिरिक्तैकपदवाक्यावगतेः सर्वजनीनत्वात्। न चायमतिबाधकरमेकपदवाक्यानुभवः शक्यमिथ्येति वक्तुं
१५ नाप्यौपाधिकः। उपाधिः खल्वेकधीग्राह्यता वा स्यात्। एकार्थधीहेतुता वा। न तावदेकधीगोचराणां धवखदिरप
लाशानामेकनिर्भासः प्रत्ययः समस्ति। तथा सति धवखदिरपलाशा इति न जातु स्यात्। नाप्येकार्थधीहे
तुता। तद्धेतुत्वस्य वर्णव्यासे भावात्। तद्धेतुत्वेन तु साहित्यकल्पने अन्योन्याश्रयप्रसंगः साहित्यात्तद्धेतुत्वेन

वा॰
११॰ देतुत्वाच्च साक्षित्वामिति तस्मादुपमर्दाधितोनुपाधिश्च पदवाक्यगोचर एकनिर्भासोनुभवो वर्णातिरिक्तं वाच
कमवलंबते। स स्फोट इति। तेन च ध्वनयः प्रत्येकं व्यंजयंतोपि तद्रागीमेव विशदयंति। येन द्रागर्थधीः स्यात्। अपि
तु रत्नतत्वज्ञानवदेव तत्। यथा स्वं हि त्रिचतुःपंचषट्दर्शनजनितसंस्कारपरिपाकसचिवचेतोलब्धजन्मनि
वरं भवे तत्परीक्षिकाणां। विशदं पदवाक्यतत्वमिति प्रागनुत्पन्नायाः तदनंतरमर्थधियउदयः। इति नो
त्रे ग्रामानर्थकांध्वनीनां। नापि प्रांचां। तदभावे तज्ज्ञानितसंस्कारतत्परिपाकाभावेनानुग्रहाभावात्
अंत्यस्येव तस्य केवलस्याजनकत्वात्। न च पदप्रत्ययवत्प्रत्येकमव्यक्तामर्थधियमाधास्यतिप्रांचो व
र्णाः चरमस्तु तद्विवः स्फुटतरामिति युक्तं। व्यक्ताव्यक्तावभासितायाः प्रत्यक्षज्ञाननियमात्। स्फोटज्ञा
नस्यैव प्रत्यक्षत्वात्। अर्थधियस्त्वप्रत्यक्षायामानांतरजन्मनो व्यक्ताव्यक्तोपजननो न वा स्यात्। न पुनरस्फुट न
इति नसमः समाधिः तस्मान्निष्पस्फोटरावद्वाचको न वर्ण इति मंदेतराचार्यदेशीयमतं। स्वमनमुपपा
दयन्नपाकरोति। वर्णा एवानुशब्द इति। एवं हि वर्णातिरिक्तः स्फोटोभ्युपेयते। यदि वर्णानां वाचकत्वेन
संभवेत्। सवानुभवद्युतिमध्यासीनदिधावाचकत्वं वर्णानां स्वाणीकत्वेनाशक्यसंगतिग्रहाद्वाप्य
स्तसमस्तप्रकारद्रूपाभावाद्वा। न तावत्प्रथमः कल्पः। वर्णानां स्वगीकत्वेमानाभावात्। ननु वर्णानां प्र राम॰

स्मारणमन्यत्वं स्वर्वेतन्न मिद्धं नप्रत्यभिज्ञानानुभवविरोधात् । तेनवासत्यप्येकत्वे ज्वालादिवत्साद
श्यनिबंधनमेतत्प्रत्यभिज्ञानमिति। सांप्रतं सादृश्यनिबंधनेनेमस्य बलवद्बाधकोपनिपाता
द्यस्थीयेतच्च विज्ञातादेर्व्यभिचारदर्शनाद्यात्तत्र च विज्ञानादेर्व्यभिचारदर्शनेन तद्वदेतस्यापानुप
तेरद्वैः स्वतः प्रामाण्ये वादिभिः उक्तमेतद्धि यो मोहाद्ज्ञातमपि बाधनोत्सर्गेष्वप्यहारेषु संशयात्मा
त्मयं प्रजेत इति। सिद्धं वित्तवेतरस्मादभिन्नोपकारेणकार्यान्तरे प्रत्यभिज्ञानं गवादिजातिविषयं न गवा
दिव्यक्तिविषयं। तासां प्रति नरं भेदोपलंभात्। अन्तरा चैव शाबलेये भेदोपलंभात् अन्तरा चैव शाबलेये भेदोपलंभाद्
न्यभेदकुत्रीयते। सोमशर्मो धीतेन विष्णुशर्मेति युक्तं पतोब्रह्म्युगकारमुद्धारमस्तु। तियुगमनुभवः प
रीक्ष्यतां पश्चाकालान्तरे वस्तुत्वस्मृतौ चेचयागौ ते सामान्यस्य व्यक्तिभेदप्रथा यां सत्यामेव तदनुगतमेकं
सामान्यं प्रथते। तथा किं गकारादिषु भेदेन प्रथमानेषु गत्वमेकं तदनुगतं चकास्ति किं वा पथ्यागौत्वमा
ज्ञानतदाकं भिन्नदेशपरिमाणसंस्थानमप्यन्यत्पुपधानभेदात्तु भिन्नदेशमिवाल्पमिवमहदिवदीर्घमि
२ ववामनमिवतथा गव्यक्तिराजन्नतराकापि चैकमेकमेत्रदर्पानुपातितोवप्रथनइति भवंतरावविदांकुर्वं
तान्नत्र गव्यक्तिभेदमंगीकुर्मि। विपोगत्वस्येकस्योपधानभेदकल्पनाप्रयासः सर्वत्र गव्यक्तावेवास्तु

प

किंमतंगेदुनागत्वेनाभ्युपेतेन यथा दुः। तेन यत्रा ध्यते जाते स्तद्ग्रहणे देवलस्य ते। व्यक्तिसंभवं तु नादेभ्य इति ग
त्वादिधीर्वृथा। न चस्वरूपिमंत्रादिवत् व्यक्तिभेदप्रत्ययः स्फुटः प्रत्युतोच्चारणमस्ति। तथा सति दश गका
रानुदचारीदेवदत्तः इति प्रत्ययः स्यात्तत्स्यादृशह्रस्वउदचारयद्गकारमिति। नचैवजात्यभिप्रायोऽभ्यासोप
याशनकत्वसित्रिरीतुपायुक्तं देवदत्त इति। अत्रहि सोरस्माईद्दतो पिगकरादिष्यकौत्लोकस्योच्चारणा
भ्यासप्रत्ययस्याविनिवृत्तेः। चोदकः प्रत्यभिज्ञानस्य बाधकमुपस्थापयति। कथं ह्येकस्मिन्काले बहू
नामुच्चारयतामिति यद्युगपद्विरुद्धधर्मसंसर्गवत्तन्नाना। यथा गवाश्वादिद्विशफैकशफकेसराल
कंबलादिमान् युगपद्देशान्तरानुरानादिविरुद्धधर्मसंसर्गवांश्चायं वर्णस्तस्मान्नानाभवितुमर्हतीति। न
चेह नादरूपो व्यंजकदृष्टधर्मा इति सांप्रतं व्यंजकान्यत्वस्य वाप वास्तेषामश्रावणत्वे कथं तद्धर्माः श्राव
णाः स्युः इदं तावदत्र वक्तव्यं। नहि गुणागोचरमिंद्रियं गुणिनमपि गोचरयति। माभूवन्नाकारस्यमश्रो
त्रग्राह्याः गंधरसशब्दगोचराणां नहि ततः पृथिव्यादिकोकाश गोचरा सर्वेच मानामम्लयुगोचरं श्रोत्रं तद्
णास्तु उदात्तादीन गोचरयिष्यति। ते च शब्दासंसर्गाग्रहाच्छब्दधर्मतेनाध्यवसीयते। न च शब्दस्य प्रत्य
भिज्ञानावधृतैकत्वस्यरूपत उदात्तादयो धर्माः परस्परविरोधिनो यथा येरासंभवंति। तस्माद्यथामुख राम०

स्यैकस्य मणिकृपाणदर्पणाद्युपधानवशान्नानादेशपरिमाणसंस्थानभेदविभ्रमः शब्दमेकस्या
पि वर्णस्य व्यंजकध्वनिनिबंधनोयं विरुद्धनानाधर्मसंसर्गविभ्रमो न तु स्वाभाविको नानाधर्मसंसर्ग इति
स्थितेऽस्तु पेत्यपरिहारमाह भाष्यकारः । अथवा ध्वनिकृत इति । अथवेति पूर्वपक्षं व्यावर्त्तयति । भवेतं
नाम गुणगुणिनामेकेन्द्रियग्राह्यतो तथाप्यदोषः । ध्वनीनामपि शब्दवत् श्रावणत्वाद्ध्वनिस्वरूपं प्रत्ययपू
र्वकं वर्णे भातीष्यत इति । कः पुनरत्र मिति । न चापुमानिर्धारितविशेषवर्णत्वसामान्यमात्रप्रत्ययो नतु
वर्णातिरिक्ततरभिव्यंजकध्वनिप्रत्यय इति सांप्रतं तस्यानुनासिकत्वादिभेदभिन्नस्य गादिव्यक्तिव
त्प्रत्यभिज्ञाभावात प्रत्यभिज्ञायमानस्य चैकत्वाभावेन सामान्यभावानुपपत्तेः । तस्माद्वर्णात्मको
वैष शब्दः । शब्दातिरिक्तो वा ध्वनिः शब्दव्यंजकश्रावणोऽभ्युपेयः । उभयथापि चात्र व्यंजनेषु च तत्र
ध्वनिभेदोपधानेनानुनासिकत्वादयो वर्णस्य मानाः तद्धर्माः शब्दे प्रतीयंते न तु स्वतः शब्दस्य ध
र्माः । तथा च येषामनुनासिकत्वादयो धर्माः परस्परविरुद्धा भासंते । भवंतु तेषां ध्वनीनां नाम नित्यता । न
हि तेषु प्रत्यभिज्ञानमस्ति येषु तु वर्णेषु प्रत्यभिज्ञानं न तेषामनुनासिकत्वादयो धर्मा इति नानित्याः
रावे च सति सालं वनाइति यद्येषपरस्याग्रहो धर्मिणः ग्रहमाणो तद्धर्मा न शब्दस्याग्रहीतुमिति । एवं

वा.
११२

नामाख्यात तथा तुष्यतुषनः तथाप्यदोषइत्यर्थः। तदनेन प्रबंधेन स्फोटाकले नवर्णो नाम शब्दसंगति अहृतया
यस्वाचकत्वमापादितं वर्णानां तत्र याकृते। यस्तु समस्तप्रकारदूषणासंभवेन यदासंजितं तत्त्रिराविकीर्ष्यराह। व
र्णोप्यश्रार्थप्रतीतेरिति। कस्मान्नाम मध्यमाख्याणकं देशमाहनकल्पयामीति। निराकरोतीति। नास्या श्रापिवु
द्धेरिति। निरूपयतु तावद्गौरेकं पदमिति धियमायुष्मान् किमिपं पूर्वानुभूतानाकारादीनेव सामस्त्येनाव
गाहते किं वा गाकाराद्यतिरिक्तं गव्यमिव वराहादिभ्यो विलक्षणं। पदि गकारादि विलक्षणमेवभास
यते। गकारादिरूषितः प्रमाणेनस्यात्तन हि वराहधीमहिषरूषितं वराहमवगाहते। पदतत्वमेकं प्रत्येक
मभिव्यंजयतो ध्वनयः प्रयत्नभेदभिन्नास्तत्स्थानकरणनिष्पाद्यतया मोन्यविसदृशत तत्पदव्यंजक
ध्वनिसादृश्येन स्वव्यंजनीयस्यैक पदतत्वस्यामिथो विसदृशानेकपदसादृश्यान्यापादयंतः सादृश्यो
पधानमेदादेकमप्यभागमपि नानेव भागवदिवमासयंति मुखमिवैकं नितवर्णपरिमाणस्थानसं
स्थानभेदैरपि ह्रपाणदर्पणयोः। नेकमनेकवर्णोपरिमाणसंस्थासंस्थानभेदाएवं वकल्पिता
रावास्य भागावर्णा इति चेत् नाकिमहानीं वर्णभद्रान्सत्यपि बाधके मिथ्येति वक्तुमध्यवसितोसि। ए
कधीरेवनानात्वस्य बाधिकेति चेत् तर्हि तास्मां नानावर्णाः प्राप्यंत इति नानात्वावभासएवैकत्वं कस्मा राम०

न बाधते। अथवा वनसेनादिबुद्धिवदेकत्वनानात्वेन विरुद्धे। नो खलु सेनावनबुद्धी गजपदातितुरगादी-
नां पलाशाशोककिंशुकादीनां च भेदमवबाधमाने उदीयेते अपि तु भिन्नानामेव सतां केनचिदेकेनोपाधिनाव-
च्छिन्नानामेकत्वमापादयन्तः। न चौपाधिकेनैकत्वेन स्वाभाविकं नानात्वं विरुध्यते। न ह्यौपचारिकमग्नित्वं
माणवकस्य स्वाभाविकं नरत्वं विरोधि। तस्मात्प्रत्येकवर्णानुभवजनितभावनानिचयलब्धजन्मनि नि-
खिलवर्णावगाहिनि स्मृतिज्ञानेऽस्मिन्नाभासमानानां वर्णानां तदेकविज्ञानविषयतयोपचारादेकार्थ-
धीहेतुतयोपचारादेकत्वमौपचारिकमवगन्तव्यं। न चैकार्थधीहेतुत्वेनैकत्वमेकत्वेन चैकार्थधीहेतुभा-
व इति परस्पराश्रयं। न ह्यर्थप्रत्ययात्पूर्वमेतावन्त एव वर्णा एकस्मृतिसमारोहिणो न प्रथन्ते तेन च तदर्था-
नन्तरं च तस्या अर्थधीरात्मीयते तदन्यपरत्वात्तु तेषामेकार्थधियं प्रति कारकत्वमेकमवगम्यैकपदत्वा-
वसानमिति नान्योन्याश्रयेणैकस्मृतिसमारोहिणां क्रमाक्रमविपरीतक्रमप्रयुक्तानामभेदो व-
र्णानामिति यथाकथंचित्प्रयुक्तेभ्योऽपरामृष्टेभ्योऽप्यर्थप्रत्ययप्रसङ्ग इति वाच्यं। उक्तं हि। यावन्तो यादृशा ये च यदर्थप्र-
तिपादने। वर्णाः प्रज्ञातसामर्थ्यास्ते तथैवावबोधकाः॥ इति। न तु पङ्क्तिबुद्धाविवैकस्याममक्रमायामपि वास्त-
मीशानादीनाम पङ्क्तिरिति तथैवमप्रयुक्तानां च निषिद्धवर्णानां नित्यानां विभूनां वास्तिवास्तवः क्रमः

प्रत्ययोपाधिरक्तभवेत्। सवैकइति कुतस्त्यः अहं मरामामि ति चेत्। न एकस्यामपि ... तौ वर्णौ रूपवत् क्र
११२ मवत्पूर्वानुभूततापरामर्शात्। तथा हि जारा राजेति प्रत्ययं यो स्य तिथियोः तत्र पि वर्णानां क्रमभेदाम
द्भेदः स्फुटतरं एवकास्ति। तथा वनाक्रमति मरि मक्रमपुक्ता भविशेषे स्य तिबुद्धावेकस्यां वर्णानां क्र
मयुक्तानोपयाङ्कः। पदावधारणे पापा ... हनिछ्ठति सूरयः। क्रमम्नानातिरिक्त ... स्वरवाक्यश्च तिस्म
ती रिति। शेषमतिरोहितार्थं दिङ्मात्रमत्र स... विस्तरस्तु ... तत्त्वबिंदावववगंतव्यः इति आलेवा नैया
यिके विवादेन संतत्वनित्यासवववर्णास्तथापि गत्वाध्वच्छेदेनैव संगतिग्रहो नादिश्च व्यवहारः सेन्सतीत्या
हा अथापि नामेति। अत एव च नित्यत्वं न नु भाष्यामेव मीमांसायां वेदस्य नित्यत्वं सिद्धं तत् किं पुनः साध्यत इ
त्यत आह। एतेन तत्र स्य कर्तुस्मरणादेवाच्छित्ते वेदस्य नित्यत्वं इति। न ह्यनित्यात् जगदुत्पत्तुमर्हति। तस्या
हे प्युक्तेति मतेन सापेक्षत्वात्। तस्मान्नित्यो वेदो जगदुत्पत्तिमत्वात् ईश्वरवदिति सिद्धमेव नित्यत्वमनेन द
ढीकृतं। शेषमतिरोहितार्थं। समाननामरूपता चाहत्र ... व्यविरोधो दर्शनात् ... शंकापदोत्तरत्वा
त्तत्र स्पर्शं कायरा निपठति अथापि स्यादिति। अभिधानाभिधेययाविच्छेदे हि संबंधनित्यत्वं भवेत्। एवमध्य
यकोध्येतपरंपराविच्छेदे वेदस्यानित्यत्वं स्यात् तन्निरन्वयस्य तु जगतः प्रविलयेऽपि तासत्तथा पूर्वसोत्पादे रामः

मिधानाभिधेयावत्यंतमुच्छिन्नाविति किमाश्रयः संबंधः स्यात् । अध्यापकाध्येतृसंतानाविच्छेदे च कि
माश्रयो वेदः स्यात् न च जीवास्तैस्तद्वासनावासिताः संतीति वाच्यं अंतःकरणाद्युपाधिकल्पिता हि ते
तद्विच्छेदेन स्थातुमर्हंति । न च ब्रह्मणस्तद्वासनातस्य विद्यात्मनः शुद्धस्वभावस्य तदयोगात् । ब्रह्म
णाश्च स्रष्टा रौद्रांतःकरणादयः तदवच्छिन्नाश्च जीवाः प्रादुर्भवंतीति न पूर्वकर्माविद्यावासनावंतो भा
वितुमर्हंतीत्यपूर्वत्वात् । तस्माद्विरुद्धमिदं शब्दार्थसंबंधवेदनित्यत्वं सृष्टिप्रलयाभ्युपगमेनेति । अभिधा
नग्रहणेनाध्यापकाध्येतृग्रहणेनाध्यापकाध्येतृपरंपराशंकां निराकर्तुं सूत्रमवतारयति तत्रेदम
भिधीयते समाननामरूपत्वादिति यद्यपि महाप्रलयसमये नांतःकरणादयः समुदाचरद्रूपाः सं
ति तथापि स्वकारणे निर्वाच्यायामविद्यायां लीनाः सूक्ष्मेण शक्तिरूपेण कर्मविक्षेपिकाविद्यावास
नाभिः सहावतिष्ठंत एव । तथा च स्मृतिः आसीदिदं तमोभूतमप्रज्ञातमलक्षणं । अप्रत
र्क्यमविज्ञेयं प्रसुप्तमिव सर्वतः इति । ते चावधिं प्राप्य परमेश्वरेच्छाप्रचोदिता यथा कूर्मदेहनिलीना
न्यंगानि ततो निःसरंति यथा वा वर्षापाये प्राप्तमृद्भावानि मंडूकशरीराणि तद्वासनावासित
तया घनाघनासारावसेकसुहितानि पुनर्मंडूकदेहभावमनुभवंति यथा पूर्ववासनावशात्पूर्वव

११८ माननामरूपाण्युत्पद्यन्ते यद्यपीश्वरात्प्रभवः संसारमंडलस्य तथापीश्वरः प्राणभृत्कर्माविद्यासहकारी
तदनुरूपमेव सृजति। न च सर्गप्रलयप्रवाहस्यानादितामंतरेणैतदुपपद्यत इति सर्गप्रलयाभ्युपगमे
पि संसारानादिता न विरुध्यत इति। न हीदमुक्तमुपपद्यते वाप्युपलभ्यते चागमत इति। स्यादेतत् भवत्वना
दिता संसारस्य तथापि महाप्रलयान्तरिते कुतः स्मरणं वेदानामित्यत आह। अनादौ च संसारे यथा स्वा
पप्रबोधयोरिति। यद्यपि प्राणमात्रावशेषता निःशेषतेति सुषुप्तिप्रलययोर्विशेषः तथापि
कर्मविक्षेपसंस्कारसहितलयलक्षणाविद्याशेषतासाम्येन स्वापप्रलययोरभेद इति द्रष्टव्यं
।ननु नायं पर्यायेण सर्वेषां सुप्तावस्था केषांचित्प्रबोधात् तेभ्यश्च सुप्तोत्थितानां ग्रहणसंभवात्
प्रायणकालविप्रकर्षेणापि वासनोच्छेदकारणाभावेन सत्या वासनायाः स्मरणोपपत्तेः। शब्दार्थ
संबंधे च व्यवहारानुच्छेदो युज्यते। महाप्रलये त्वपर्यायेण प्राणभृन्मात्रवर्त्ती। प्रायणकालविप्रक
र्षो वा संस्कारमात्रोच्छेदहेतुरस्त्विति कुतः सुषुप्तवत्पूर्वप्रबोधव्यवहारवदुत्तरप्रबोधव्यवहार इति वो
दयति। सादृश्यात्स्वापवदिति परिहरति नैष दोषः सत्यपि व्यवहारोच्छेदिनीति। अयमभिसंधिः। न तावत्प्राय
णकालविप्रकर्षोऽस्ति च संस्कारोच्छेदकोऽपूर्वाभ्यस्तस्मृत्यनुसंधानात् जातस्य हर्षभयशोकसंप्रतिपत्तेः मनु राम०

ष्यजन्मवासनानां चानेकजात्यंतरसहस्रव्यवहितानां पुनर्मनुष्यजातिसंपर्के केन क्रमेणाभिव्यक्त्य
भावप्रसंगात्। तस्मात्क्लिष्टविख्यापमपि पत्रसत्यपि प्रायणे कोलविप्रकर्षोऽपूर्ववासनानुहन्तिः तत्र
केवलं धापरमेश्वरानुग्रहेण धर्मज्ञानवैराग्यैश्वर्यातिशयसंपन्नानां हिरण्यगर्भप्रभृतीनां महर्षीणां प
थाच आमनुष्येभ्य आब्रह्मभ्यो ज्ञानादीनामनुभूयते विकर्षः। एवमामनुष्येभ्यश्चावभगवतो हिरण्य
गर्भात् ज्ञानादीनां प्रकर्षोऽपि संभाव्यते। तथा च तत्र ईश्वराभिवंदितो वेदस्मृतिवादाः प्रामाण्यमप्रत्यूहमश्नुव
ते। एवं चात्र भवतां हिरण्यगर्भादीनां परमेश्वरानुगृहीतानामुपपद्यते कल्पांतरसंबंधिनि खिले व्यवहा
रानुसंधानमिति सुगममन्यत्। स्यादेतत् अस्तु कल्पांतरव्यवहारानुसंधाने तेषामस्मानुरघाव त्वशाव
वेहाः अन्यथा वैचे यामथ्यः अन्यथा वर्णाश्रमाः धर्मो ह्यानर्थ्योर्थश्चाधर्मात्। अनर्थश्चेप्सितोऽर्थश्चानीप्सि
तः आपद्येत्, त्स्वर्गस्यात्। तस्मात् न मत्रकल्पांतरव्यवहारानुसंधानेनात्र किं विल्कुस्वात्। तथा च पूर्वे
व्यवहारिकशतशब्दार्थसंबंधश्चवेदस्वानितोऽप्रसत्त्वे यातामित्यत आह। ग्रामणीनां च सुखप्रामपर्द्द
ति यथा वस्तुस्वभावसामर्थ्यं अन्यथापितुमर्हतीति नहि जातु सुखं तत्त्वेन तद्धेतुस्यते दुःखं चोपादिस
ते न च जातु धर्माधर्मयोः सामर्थ्यविपर्ययो भवति। नहि स्मृत्यादानयोरेष्यदृष्टश्च तेभ्यो जायते तथा स्मृति

बलस्य सामर्थ्यानियमाभावात्सर्वेषां संभवेदिति पिपासुरपि दहनमाहृत्य पिपासामुपशमयेत् शीतार्तो वा
११५ तोयमाहृत्य शीतार्तिमिति। तेन स्पष्टमतरपि ब्रह्महत्यादिन घटते तुरर्थहेतुत्व यागादिरि त्यानुपूर्व्या सि
द्धा। एवं परावरे दा श्रास्मिन्कल्पे न एव कल्पांतरेत एव वेषामर्थोः। त एवं वर्णाश्रमादृष्टसाधर्म्यं संभवेत
वैधर्म्ये कल्पनमनुमानागमविरुद्धं आगमाच्च हि भूयांसो भाषाकारेणादर्शिताः श्रुतिस्मृतिपुराणा
द्वोस्तद्वक्तोयोन्यथा भवेत्। तस्मात्तु दृष्टं समाना नो भेरूपत्वाद्याद्दष्टत्रावप्यविरोध इति अग्निर्वीन्प्रका
नयते तिमावितीदान्त्रिमाश्रित्य यजमान एवाग्निरुच्यते। तस्येश्वैर्ये चितांतरमग्निरग्निम ध्वादिष्वसंभ
वादनधिकारं जैमिनिः। ब्रह्मविद्यास्वधिकारं देवर्षीणां ब्रुवाणः प्रष्टव्यो जातो किं सर्वासु ब्रह्मविद्यास्व
विशेषेण सर्वेषां किं वा कासुचिदेव केषांचित् यद्यविशेषेण सर्वासु तर्हि मध्वादिविद्यास्वसंभवः कथं
असौ वा आदित्यो देवमध्वित्यत्र हि मनुष्या आदित्यं मध्वध्यासेनोपासीरन् उपास्योपासकभावो हि भे
दाधिष्ठानो न स्वात्मनात्मादित्यस्य देवतायाः संभवति। न चादित्यांतरमस्ति प्राचामादित्यानामस्मिन्कल्पे
क्षीणाधिकारत्वात् पुनश्चादित्यस्य यायाघ्र यागी पंचरोहितादीन्युपक्रम्य ति। अथ मध्यः असौ वा आ
दित्यो देवमधु इति देवानां मोदनात्तमधिव मधु स्यामर मधुसारूप्यमाहास्य श्रुतिः। तस्मादित्यमधुनो यो एम०

रेवतिरश्रीनवग्रहाः अंतरिक्षं मधुपूपः आदित्यस्य हि मधुनो अपूपवस्थमंतरिक्षमाकाशे तत्रावलम्बमा
नात्पानिवसोमाद्यपपप्रभृत्तीमग्नौ हूयंते तान्यादित्यरश्मिभिरग्निसंचालितेरूत्वत्रपाकान्यस्मती
भावमापन्नान्यादित्यमंडलस्थ अत्र मधुपेनीयंते । यथा हि भ्रमराः पुष्पेभ्य आहृत्य मकरंदं स्वस्थानमा
नयंत्येवमत्र याभ्रमराः प्रयोगसमवेतार्थस्मरणादिभिः ऋग्वेदविहितेभ्यः कर्मकुसुमेभ्य आहृत्य त
न्निष्पन्नमकरंदमादित्यमंडले रोहिताभिरस्य प्राचीभिरश्मिनाडीभिरानयंति तस्मात्तद्वसवउपजीवंति
तथाअथअस्यादित्यमधुनो दक्षिणाभिरश्मिनाडीभिः शुक्लाभिर्यजुर्वेदविहितकर्मकुसुमेभ्यः आहृ
त्याग्नौहुतंसोमादिपूर्ववद्रसत्वभावमापन्नं यजुर्वेदमंत्रभ्रमरा आदित्यमंडलमानयंति तदेतद्रस्तेरु
त द्राउपजीवंति तथास्यादित्यमधुनः प्रतीचीभिरश्मिनाडीभिः कृष्णाभिः सामवेदविहितकर्मकुसुमेभ्य
आहृत्याग्नौहुतंसोमादिपूर्ववद्रसत्वभावमापन्नं यजुर्वेदमंत्रभ्रमरा आदित्यमंडलमानयंति तद्रस्म
तमादित्याउपजीवंति अथास्यादित्यमधुन उदीचीभिरतिकृष्णाभिरश्मिनाडीभिरथर्ववेदवि
हितेभ्यः कर्मकुसुमेभ्य आहृत्याग्नौहुतंसोमादिपूर्ववद्रसत्वभावमापन्नमथर्वांगिरसमंत्रभ्रमरास्त
थोर्ध्वमेव वावस्तोमयकर्मकुसुमादितिहासपुराणामंत्रभ्रमरा आदित्यमंडलमानयंति अथामेध

सामर्थं त्रस्तोत्र

वाक्स्तोमे च पारिप्लवं संतीति श्रवणादितिहासपुराणमंत्राणामप्यस्ति प्रयोगः तद्रस्तं मरुतउपजी
वंति अथास्य पाश्चादित्यमधुनडुधीरश्मिनाड्यो गोप्यास्ताभिरुपासनभ्रमरैः प्रशाखकुसुमादार
११६ सादित्यमंडलमानयंतिन्द्रस्तत्सुपजीवंति साध्याः तारगतास्त्रादित्यव्य पाश्चपाः पंचरोहितादः
पोरश्मिनाड्यः सर्गा हि संबद्धाः क्रमेणोपदिश्यते निमोहनारात्मदेवाम्नतेह सुडपलभ्य यथास्वं
समस्तैः करणैः पशस्तेन सदृप्यस्तीकस्य वीर्याक्तात्रायात्मम्मते। तदुपलभ्यादित्यमेतप्प्यंति तेनखल्व
म्नतेन देवानां च स्वादीनामोदनं विदधदादित्यो मधुरातरुकं भवति। न केवलमुपास्योपासक
भावेनाकुसीन्विरुध्यते अपि तु ज्ञातृज्ञेयभावश्च प्राप्यप्रापकभावश्चेति। तथा त्रिपाद इति
अधिदैवतं खत्वाकाशो ब्रह्मेत्याकाशो ब्रह्मदृष्टि विधानार्थमुक्तं आकाशस्य हि सर्वगतत्वरूपादि
हीनत्वं ब्रह्मणा सारूप्यं तस्य चेतस्याकाशस्य ब्रह्मणाण्डबोरः मादास्रमष्टादयो त्रिपाद इत्यादि
नोदर्शितायथाहि गोप्याद्यानराविपत्र्यंतेसव मग्रस्यपाप्याकाशेन सर्वगतेनोत्याकाशस्यपा
दातदेवमाकाशस्य सर्वतुष्यशो ब्रह्मदृष्टिं विधायस्वरूपेण पायुसंवर्गगुणकमुपास्यंविधातु
महीं करोति वायुर्वावसंवर्गः। तथा स्वरूपेणो वादित्यं ब्रह्मदृष्ट्योपास्यं विधातुमहीं करोति आदि राम०

त्योऽत्र श्येत्यादेशः। उपदेशः अतिदेशो हितार्थमन्यत्र। यद्युच्येत ना विशेषिताः सर्वे मां देवर्षीणां सर्वो सूत्रलक्षणे वि-
स्वधिकारः। किंतु यथासंभवमिति। तेनरस्मुपतिष्ठते। स्योतिवेभावाक्लौकिकौत्थ्यादिस्थादिशब्दप्रयोगश्चास्य
यात्स्योतिर्भइत्यादि पूहूहोनवे तेषामस्ति वेतन्य। न ह्येते सु देवरत्नादिवन्नरनुरूपाद्रूप तेषेहास्यादेतनमं
र्थार्थवादेतिहासपुराणलौकिकेभ्य इति। तत्र त्र ग्रन्थाते दर्ह्ले गामिइहस्तमिचकाशिंड्रोदइईति वाकाशि
मुष्टिः। तथा तु विश्रोवा वापोदनः सुबाहुरंधसो मसोइद्रो वज्राणीति प्रोतेरति विग्रहवत्वे देवता यामेवा
थवाशम्मिवेदति। तथा हविर्भोक्तृत्वे देवताया दर्शयति अद्धीद्रयेव चप्रास्थितस्मै त्वा रयः तपेशानं
इन्द्रो दिवइन्द्रईशे पृथिव्या इन्द्रो अपामिन्द्र इत्पर्वतानां। इन्द्रो वृधामिन्द्र इन्मेधिराणामिन्द्रः क्षेमे योगे हव्य इं-
द्र इति। तथेशानमस्य जगतः स्वर्दृशमीशानमिन्द्र तस्थुष इति। तथा वरिवसितारं प्रति देवतायाः प्रसा-
दं प्रसन्नायाश्च फलदानं दर्शयति आहुतिभिरेव देवान् हुतादः प्रीणाति तस्मै प्रीता इषमूर्जं च यच्छ-
न्तीति। तृप्त एवैनमिन्द्रः प्रजया पशुभिस्तर्पयतीति चाधर्मशास्त्रकारा अप्याहुः। तेऽदृष्टास्तर्पयन्त्येनं सर्व-
कामवरैः प्रभो इति पुराणवचांसि च भूयांसि देवताविग्रहादिपञ्चकप्रपञ्चभावकानि लौकिका अपि दे-
वताविग्रहादिपञ्चकं स्मरन्ति वा प्रवदन्ति वा। तथा हि यमं दण्डहस्तमालिखन्ति वरुणं पाशहस्तमिन्द्रं वज्र-

११७ हस्तेकृथपंतिन्वदेवनाह्वडिंभुक्तइति।तथेशमामिमामाहुः देवग्रामोदेवहस्तेऽग्रामिति।तथास्याप्रसादं
चप्रसन्नाधाःफलदानमाहुः प्रसन्नोस्यप्रभुपतिःपुत्रोस्यजातः प्रसन्नोस्यधनदोधनमनेनलब्धमिति
तेदेतत्पूर्वपत्नीदृष्टपातेनतुष्टतेनहितोलोकोनामेति। नखलुप्रत्यक्षादिव्यतिरिक्तोलोकोनामप्रमा
णान्तरम्।किंतुप्रत्यक्षादिमूलालोकप्रसिद्धिःसत्यतामश्नुते तदभावेतुविधपरंपरावत्तन्मूलाभावा
त्विप्लवतेऽनवर्तिग्रहणादौप्रत्यक्षादीनामन्यतमस्मिन्नपिप्रमाणंनवेतिहासादिमूलंभवितुमर्हति
तस्मात्पौरुषेयत्वेनप्रत्यक्षाद्युपेक्षणात्प्रत्यक्षादीनांवाचामभावादित्याह।इतिहासपुराणमपी
तिननूक्तंमंत्रार्थवादेभ्योविग्रहादिपंचकप्रसिद्धिरित्यतआहअर्थवादानपीति।विध्युद्देशेनैकवाक्य
तामापाद्यमानानामर्थवादानांविधिविषयप्राशस्त्यलक्षणापरानस्वार्थेप्रमाणंभवितुमर्हन्तीत्यर्थः।एवंशब्दस
शब्दार्थइतिदिशाद्रष्टव्यमपिवितृः प्रमाणान्तरेणतुयत्रस्वार्थोपिसमर्थ्यतेयथावायोःक्षेपिष्ठत्वंतत्रप्र
माणान्तरवशादेवोपपद्यते।नतुशब्दसामर्थ्यात्।यत्रतुनप्रमाणान्तरमस्तियथाविग्रहादिपंचकेतत्र
र्थःशब्दादेवावगन्तव्यः।अन्यपरत्वेपिशब्दानामवगमपितुमलमितितदवगमापाद्यन्तत्रापितात्पर्य
मभ्युपेतव्यं।नचैकवाक्यंद्वयंपरंभवतीतिनियतधावमतिवाक्यंभिद्येत।नवसंभवत्येकवाक्यत्वेवाक्य राम॰

त्वेनाक्यभेदापद्यते तस्मात्प्रमाणान्तरानधिगतविग्रहादिमंत्रार्थवादान्यपरत्वशब्दाद्देवतानामेवेति मनो
रथोमात्रमित्यर्थः। मंत्रास्तु श्रीत्वादिवद्धुत्वादिभिस्तत्र तत्र विनियुक्तमानाः प्रमाणाभावात्। ननु प्रवे
शितः कथमुपयुज्यन्ते तेषु तेषु कर्मसु विनियोगे तावत् दृष्टप्रकारे संभवति नादृष्टकल्पनोचितेति दृष्टश्च
प्रकारः प्रयोगसमवेतार्थस्मरणं। स्मृत्वा चानुतिष्ठति अनुष्ठातारः पदार्थान् अतो स्मारकीभावार्थ
परतापदार्थानामित्यवगते तत्प्रयोगसमवेतार्थस्मरणतात्पर्याणां मंत्राणां मानान्तरानधिगते विग्रहादा
वपि तात्पर्यं युज्यत इति न तेभ्यो विग्रहसिद्धिः। तस्माद्देवताविग्रहवत्त्वादिभावग्राहकप्रमाणाभावा
त् भावप्राधान्यप्रमाणागोचरतास्येति आशंकां अत्र वं आभिमिधीयते। भावं तु बादरायणोऽस्ति हि। तुशब्दः पू
र्वपक्षं व्यावर्तयति विग्रहादिमूर्तधारणादि तादिह देवतानामप्युपपद्यते इत्यन्तमतिरोहितार्थमंत्रार्थवादादि
अवहाराद्विविग्रहदर्शनेतिहासपुराणधर्मशास्त्राणां गच्छते मंत्रादीनां तु अवहारः प्रवृत्तिस्त
स्मादर्शनादितिपूर्वपक्षमनुभाषते परप्युक्तमिति एकदेशीमतेन तावत्परिहरति अत्र ब्रूम इति। नहि
त स्ववेपक्षेराणां मुख्योप्यदूषयति अथाह पूर्वपक्षी शास्त्री खल्विर्यं गतिर्येनात्परोधीनवृत्तित्वं नामन
न्यपरः शब्दोऽन्यत्र प्रमाणं भवितुमर्हति न हि श्वित्रि निर्णेजनपरं बोधयतीति वाच्यं। इतः सार

बैधवेदमनेनामपि तु महेति। न च नञ्वति महावाक्ये वान्तरवाक्यार्थो विधिरूपः शक्यो वक्तुं न च प्र
थममात्रान्सो प्यर्थो स्यन्नवति तन्मात्र पयस्यमोति त्वात्तत्पुनः प्रत्यक्षादीनामिव गतिर्न त्वदुद्दकाह
रणार्थेनादृष्टरूपेनापोन्मीलितं च स्तु घेटपटो वा पटं वा केवलं नोपलभते न हेवमेवं दृष्टेति पुंवेप
त्तिरगादृष्टित परमसिद्धान्त वा। हि अत्रोच्यते विधमउपन्यासइति। अयमभिसंधिः लोके विशिष्टा
र्थप्रत्यायनाय पदानि प्रयुज्यन्ते तेषु तेषु स्वार्थमात्रस्मरणे पर्यवस्यन्ति नहि स्वार्थस्मरणमात्र
पलोके पदानां प्रयोगो दृष्टपूर्वः वाक्यार्थेऽनुदृश्यते। न चैतान्यस्मारितार्थानि सामान्याद्वाक्यार्थं प्रत्याय
यितुमीशत इति स्वार्थस्मरणे वाक्यार्थमिति पदानामव्यापारः कल्पितः पदानामनवपर्यस्थपतन्तते न
विनायपर्यवस्यतीति न स्वार्थमात्राभिधाने पर्यवसानं पदानां। न च नञ्वति वाक्ये विधान पर्यवसानं
तथा सति नञ् परमनर्थकं स्यात्। यथाह सांत्वाद्यपि कुर्वन्ति पदार्थप्रतिपादनं वर्णास्तथापि ने
तस्मिन्पर्यवस्यन्ति निष्फले वाक्यार्थे। मितपैतेषां प्रवृत्तौ नान्तरीयकपाकेऽन्यालेवकाष्ठानां पदार्थप्रति
पादनमिति सेयमेकस्मिन्वाक्ये गतिः यत्र तु वाक्यस्यैकस्य वाक्यान्तरेण संबंधस्तत्र लोकानुसारतो भू
तार्थव्युत्पत्तौ वा सिद्धायामेकैकस्य वाक्यस्य तत्र द्विविधार्थप्रत्यायने न पर्यवसितं तदात्रिनः प्रथ्याकुतं एन०

ध्विद्धेतोः प्रयोजनान्तरापेक्षा पामन्वयः कल्प्यते यथा वायुर्वै क्षेपिष्ठा देवता वायुमेव स्वेन भागधेयेनो
पधावति स एवैनं भूतिं गमयति । वायव्यं श्वेतमालभेत भूतिकाम इत्यत्र इह हि तु स्वाध्यायाध्ययनविधिः स्वाध्याय
शब्दवाच्यवेद[illegible] राशि पुरुषार्थतामन्येष्वन्ततो भूतार्थमात्रपर्यवसितानार्थवादानां विधिवदुद्देशेनैक
वाक्यतामगमिष्यन् । तस्मात्स्वाध्यायविधिवशात्कैमर्थ्याकाङ्क्षायां हि प्राप्तादिगोचराः संतः स्तुत्युपपन्न
द्वारेणा विधेयप्राशस्त्यं लक्षयन्ति । न पुनरविधि । ते न स्वार्थपरा एव तत्र ह्युच्चरणप्रभवेति । तथा स तिल
क्षणोपनभवेत् अभिधेयाविनाभावस्यान्वयीग्रस्याभावात् अन्नतरावयं गायाद्यो यद्यपि त्रयं गाशब्दः स्वा
र्थसंबद्धमेवतीलेखयन्ति न तु समुद्गतीरं ॥ तत्कस्य हेतोः स्वार्थप्रत्यासत्त्यभावात् । न चैतत्सर्वे स्वार्थ
विवक्षायां कल्पते । अत एव यत्र प्रमाणान्तरविरुद्धोऽर्थो वादादृश्यते यथादित्यो वै यूपो यजमानः प्रस्त
र इत्येवमादयः तत्र यथा प्रमाणान्तराविरोधो यथा चास्तत्स्वार्थता तदभपाविरोधे सिध्यर्थे गुणवाद इति
सिद्धान्तकृद्भिरभिवास्त्रयन्ते मिनि । तस्माद्यत्र सोऽर्थोऽर्थवादानां प्रमाणान्तरविरुद्धः तत्र गुणवादेन प्रा
शस्त्यलक्षणेति लक्षितलक्षणा यत्र तु प्रमाणान्तरसंवादः तत्र प्रमाणान्तरादेवार्थवादादपि सोऽर्थः प्र रु
सिध्यतीद्वयोः परस्परानपेक्षयोः प्रत्यक्षानुमानयोरिवैकत्रार्थे प्रवृत्तेः प्रमाणापेक्षयात्वनुवादकत्वम

मानान्तराद्युत्पन्नः प्रथमं यथा प्रत्यक्षादिभ्योऽर्थमवगम्य इति न तथाम्नायतस्तत्र मुख्यापेक्षत्वान्न तु प्रमा
णापेक्षया अनुवादता द्वयोः स्वार्थे नपेक्षत्वादित्युक्तं ननु एवं मानान्तरविरोधेऽपि कस्माद्गुणवादो भवति
यावता शास्त्रविरोधे मानान्तरमेव कस्मान्न बाध्यते वेदान्तैरिवाद्वैतविषयैः प्रत्यक्षादयः प्रपञ्चगोच
राः कस्माद्वा अर्थवादवत् वेदान्ता अपि गुणवादेन न नीयन्ते अत्रोच्यते लोकानुसारतो हि विधौ हि
विषयः शब्दानां द्वारतस्तात्पर्यतश्च पर्यवस्मिन्वाक्ये पदानां पदार्थो द्वारतो वा वाक्यार्थश्च तात्पर्यतो वि
षयः। एवं चावान्तरैकवाक्यतानामपि यथेदं देवदत्तीयां गामानयैतदपेक्षं वाक्यं तत्र बहुक्षीरेत्यपरं। तद
स्य बहुक्षीरत्वप्रतिपादनं द्वारं। तात्पर्यं तु केवलमिति वाक्यान्तरार्थे तत्र पदद्वारतः प्रमाणान्तरविरोधे अन्यथा
नीयते यथा विषं भक्षयेति वाक्यं मा अस्य गृहे भुंक्ष्वेति वाक्यान्तरार्थपरं सत् यत्र तु तात्पर्यं तत्र मानान्त
रविरोधे पौरुषेयम् प्रमाणमेव भवति वेदान्तानां पौर्वापर्यालोचनया निरस्तसमस्तभेदप्रपञ्चब्रह्मप्रति
पादनपरा अपौरुषेयास्ततः सिद्धतात्त्विकप्रमाणभावः सतः तात्त्विकप्रमाणाभावात् प्रत्यक्षादीनि प्र
त्या व्यवसो वा व्यवहारिके तस्मिन्नुपपद्यन्ते न चादित्यो वै यूप इति वाक्यं आदित्यरूपत्वप्रतिपादनपरं स
अपि तु यूपस्तुतिपरं। तस्मात्प्रमाणान्तरविरोधे द्वारीभूतो विषयो गुणवादेन नीयते यत्र तु प्रमाणानां राम॰

तरविरोधकं नास्ति यथा देवताविग्रहादौ तत्र ह्याकारतोपि विषयः प्रतीयमानो न शक्यस्त्यक्तुं न च गुणवादि
नत्वे तु को हि मुख्ये संभवति गौणमाश्रयेदिति प्रसंगात् । तथा सत्यनधिगतविग्रहादिप्रतिपादकत्वात्प्रमि
ण्वेतेति चेत् अन्य उपाभिक्रमेवैन ह्याख्या । तथा सति तात्पर्यभेदोपीति चेत् । न ह्याकारतोपि तदवगतो तात्पर्यो
तरकल्पनोपाश्रयोगात् । तच्च यस्य यत्र न तात्पर्यं तस्य तत्राप्रामाण्यं तथा सति विशिष्टपरं वाक्यं वि
शेषणांशेष्वप्रमाणमिति विशिष्टपरमपि वाक्यं न विशेषणांशविषयत्वात् न विशिष्टविषयत्वेन तु न तात्प
र्येपरस्परांश्रयत्वात् आसेयात न विशेषणांशप्रतिपत्तौ सत्यां विशिष्टविषयत्वं विशिष्टविषयत्वाच्च तस्मात्
त्रेयः । तस्माद्विशिष्टप्रत्ययपुरेभ्योपि परेभ्यो विशेषणानि प्रतीयमानानि तस्यैव वाक्यस्य विषयत्वेनाति
ष्ठन्ताम्भुमेयानि यथा । तथा पुरेभ्योप्यर्थवादेभ्यो देवताविग्रहादयः प्रतीयमानाः श्रुतिप्र
माणान्तरविरोधेन प्रत्याख्यातुं । नहि मुख्यार्थसंभवे गुणवादो युज्यते । न च भूतार्थमप्ययोरुषेयं वा
मानान्तरायत्तं स्यादिति येन मानान्तरासंभवेप्यर्थवादेदेव प्रमाणान्तराग्ने स्यादेतत्तात्पर्ये त्वेपि पदं वाक्यं चाभेदक
थं तत्त्वेकार्थतादेकं वा कथं ना तत्र तत्र पृथक्स्वं तत्र तत्पदार्थविशिष्टैकपदार्थप्रतीतिपर्यवसानं संभवा
त् सत्तु पदार्थान्तरविशिष्टः पदार्थो वाक्यार्थः स्याद्विद्वारभूतः स्याद्विद्वारीत्येतावानविशेषः । नन्वेवं सत्यो हतं

१२

वा.प्र. भुक्त्वा ग्रामं गच्छतीत्यत्रापि वाक्यभेदप्रसंगः। अन्यो हि संसर्ग ओदनं भुङ्क्त इति। अन्यस्तु ग्रामं गच्छतीति न एकत्र
१२० प्रतीतेरपर्यवसानात् भुङ्क्ते इति हि समानकर्तृकता पूर्वकालता च प्रतीयते। न चैवं प्रतीतिरपरकालक्रियां त
रप्रत्ययमन्तरेण पर्यवस्यति। तस्माद्धावतीति पदसमूहे ये स्वाहिताः पदार्थास्तत्परः पर्यवस्यन्तीति तावदेकोऽयं ग
मर्थो वाक्यवाच्येचैताः पर्यवस्यन्तीति विनैव विधिवाक्यविशिष्टार्थप्रतीतेः। न च द्वाभ्यां द्वाभ्यां पदाभ्यां वि
शिष्टार्थप्रत्ययपर्यवसानात्। पचति पश्यति वा देवदत्तोऽस्मिन्नानात्वप्रसंगः। नानात्वेऽपि विशेषणानां वि
शेष्यस्यैकत्वात्। तस्य च संदृष्टस्य प्रधानभूतस्य गुणभूतविशेषणानुरोधेनावर्त्तनायोगात्। प्रधान
भेदे तु वाक्यभेद एव। तस्माद्विधिवाक्याद्यर्थवादवाक्यं मन्यदिति वाक्ययोरेव स्वस्ववाक्यार्थप्रत्ययावसि
तयोः पारार्थ्यं पश्चात्कुतश्चिद्धेतोः परस्परान्वय इति सिद्धं। अपि वेंद्रादिदेवतात्यागोऽति देवतामुद्दिश्य
हविस्त्यक्त्यस्य च तद्विषयस्त्वत्यागः इति हि यागशरीरं। न चैवं तस्य ना लिखता देवतोद्देशश्च आनस
स्वरूपरहिताचेतनत्वे शक्यत आलेखितुमिति यागविधिनैव तदुपाये। हि राग प्राह्यमन्त्रपदेभ्योपि
मंत्रार्थवादेभ्यः तदुपमवगम्यते तदभ्युपेयते। रूपांतरकल्पनायां प्रमाणाभावात्। मंत्रार्थवादयोः स्वतंत
परोक्षत्वे तु प्रसंगाच्च यथा हि ग्रावा त्वात्मस्तोमेन नमते इति ग्रावस्वरूपायेत्यापां यः स्तापितापि तामः राम०

होतासोमंनपिबेत्सव्रात्यइतिसिद्धवत्व्रात्यस्वरूपमवगतेव्रात्यस्तोमविधयो। तेतस्मिन्हिविधिप्रमाणात्वे
भवतियथावास्वर्गस्वरूपमलौकिकंस्वर्गकामोयजेतेतिविधिनायो। तेतस्मादर्थवादतोवगम्यमानेवि
धिप्रमाणके। तथादेवतारूपमपिननुदेशोरूपस्तानमयोस्तेनेनपुनारूपस्तत्रामपिदेवतानाम्। समारोपे
णापिचरूपज्ञानंसुपपद्यते इतिसमारोपितमेवरूपंदेवतानांमंत्रार्थवादेरुच्यतेसतत्स्वरूपज्ञानमपदे
तो। तज्ज्ञानंतोसंभवेनमंत्रार्थवादेभ्यराज्ञातस्यतुरूपस्यासतिबाधकेनुभवारूढंतथाभावंपरित्यज्या
न्यथात्वमनुभूयमानेमस्यापृतेकस्यापितु। तस्माद्विध्यपेक्षितेमंत्रार्थवादैरन्यपरैरपिदेवतारूपंबुद्धावुप
निधीयमानंविधिप्रमाणमेवेतिपुरूक्तंस्यादेतत्तत्विध्यपेक्षायामन्यपराद्पिवास्वादेवगतोर्थस्वीक्रियते
तदेपक्षेवतनाक्लिशदस्वरूपस्यदेवतान्भावनतेस्वचमानान्तरवेद्यतादित्यतआह। ननुशब्दमात्रमितिनके
वलंमंत्रार्थवादस्तोविग्रहादिसिद्धिः अपित्वितिहासपुराणाल्लोकस्मरणात्मोमंत्रार्थवादमूलेभ्योवामूले
ऽन्तरादिमूलेभ्योवेत्याह इतिहासेतिकेष्यतेयुज्यते। निगदस्मात्रव्याख्यातमेतत्। तदेवंमंत्रार्थवादादि
द्देवताविग्रहादेरवगतेरिप्पूजावद्देवतापूजात्मकोयागोदेवताप्रसादाद्दिष्टादृष्टफलायावकल्प्यतोऽ
चेतनस्यतुपूजामप्रतिपद्यमानस्यतदनुपपत्तेः। नचैवंपूजकमेवादेवतोशक्तिपुराणभावान्नदेवतात=

फलोत्पादेयागभावनायाः श्रुतेफलवत्त्वंयागस्यैवतांप्रतितत्फलांशेबाधप्रतिष्ठितेकरणत्वेहातव्ये।यागभाव
नायाश्चाहफलवत्त्वायागलक्षणस्वकारणावांतरव्यापारत्वादेवतानाभोक्तृत्वप्रसङ्गहानौ।कृषिकर्म
णइवतन्त्रदेवांतरव्यापारस्यसस्यादिगमसाधनत्वेआग्नेयादिनामितोत्पत्तिपरमापूर्वावांतरव्यापारग
भवनमतेस्वर्गसाधनत्वमुभयत्रमिन्नापिमन्त्रेसमाने।ननुदेवतायाविग्रहादिमत्त्वा.प्राधान्यमितिनधर्म
मीमांसायाः स्वत्रेअपिवाशब्दपूर्वत्वात्यज्ञकर्मप्रसाधनंगुणत्वेदेवताश्रुतिरितिविरुध्यते।तस्मात्सिद्धे
देवतानांयागेणब्रह्मविद्यास्वधिकारइतिशुगस्यतदनादरश्रवणात्तदाद्रवणात्सूच्यतेहि।।अवां
तरसंगतिंकुर्वन्नधिकरणतात्पर्यमाह।यथामनुष्याधिकारेति।शंकाबीजमाहतत्रेति।निरपेक्षतिवि
लानुपयोगश्चेतिकेअग्निदेकस्यनाम्नवेतनस्यार्थितानालिपेनार्थितायाअभावात्शूद्रोनाधिक्रि
यतेतानाप्यस्यब्रह्मत्वात्तसामर्थ्याभावः द्विविधंहिसामर्थ्यंनिजंवागंतुकंच।तत्रद्विजातीनामिवशूद्रा
णामप्यवणादिसामर्थ्यंनिजमप्रतिहतं।अध्ययनाधानाभावात्वागंतुकसामर्थ्याभावेसत्यनधिका
रइतिचेत्।हंताधानाभावेसत्यग्न्यभावादग्निसाध्येकर्मणिमाभूदधिकारः।नचब्रह्मविद्यायामग्निः
साधनमितिकिमितिअनादिहितायुपोनाधिक्रियंतेनवाध्ययनाभावात्साधनाभावेनधिकारो एम०

ब्रह्मविद्यायामिति सोऽप्रवृत्तेः यतोपुक्तं। यदाहवनीये जुहोतीत्याहवनीयस्य होमाधिकरणत्वं तत्र पावि(?)ध्या
नात्मत्वरूपस्यालौकिकत्वया नारभ्याधीतवाक्यविहिताद्धानादन्यतो नाधिगमात् आधानस्य द्विजातिसंबं
धितया विधानात् तत्साध्योऽग्निरलौकिकोन शूद्रस्यास्तीति नाहवनीयादिसाध्ये कर्मणि शूद्रस्याधिका
र इति। न च तथा ब्रह्मविद्यायामलौकिकमस्ति साधनं यच्छूद्रस्य न स्यात्। अध्ययननियम इति चेन्न
विकल्पासहत्वात्। तदध्ययनं पुरुषार्थं वा नियम्यते। यथा धनार्जने प्रतिग्रहादिः क्रत्वर्थं वा यथा व्रीही
नवहन्तीत्यवघातः। न तावत् क्रत्वर्थं न हि स्वाध्यायोऽध्येतव्य इति कंचित् क्रतुं प्रकृत्य पठ्यते यथा दर्श
पौर्णमासं प्रकृत्य व्रीहीनवहन्तीति। न चानारभ्याधीतमप्यव्यभिचारितक्रतुसंबंधतया क्रतुमुपस्थापय
ति येन वाक्येन क्रतुना संबध्येताध्ययनं। न हि यथा जुह्वाद्यव्यभिचारितक्रतुसंबद्धमेवं स्वाध्याय इति त
स्मान्न क्रत्वर्थो नियमः। नापि पुरुषार्थो पुरुषस्याधीनाप्रवृत्तिर्हि पुरुषार्थो भवति यथा फलं तदुपा
यो वा। तदुपायो हि विधितः प्राकृ(?)मामान्यरूपा प्रवृत्तिः पुरुषेच्छानिबंधनैवा इति कथं तासु तु सामा
न्यतो विशेषतश्च प्रवृत्तिर्विधिपराधीनैव। न ह्यनधिगतकारणभेद इति कर्तव्यतासु घटते। तस्मादध्य
धीनप्रवृत्तिस्तया अध्ययनाक्रत्वर्थता क्रतुरिति हि विधिविषयेण विधिपरामृश्यते विषयिणा तेनाध्येतव

१४

वा॰ प्र॰ यदीक्षितोपनेयइति क्तस्य थः। नचाध्ययनं वा स्वाध्यायो वा तदर्थज्ञानं वा प्राग्विधेः पुरुषार्थो नाप्रवृत्तिर्येन पु
१२२ रुषार्थः स्यात् यद्यप्यध्ययनेनैवार्थावबोधरूपं तिचम्पेतनतोमानांतरविरोधः। तद्रूपस्य विना ध्यय
नंपुस्तकादिपाठेनाप्यधिगमात्। तस्मात्सुवर्णं भार्यमिति वदध्ययनादेव फलं कल्पनीयं। तथा
चाध्ययनविधेर्नियामकत्वात्। शूद्रस्याध्ययने न वा पुस्तकादिपाठेन वा सामर्थ्यमस्तीति सोपि ब्रह्म
विद्यायामधिकृतः। माभूद्वाध्ययनाभावात्सर्वत्र ब्रह्मविद्यायामधिकारः संवर्गविद्यायां तु भविष्यति अ
हहारेत्वा शूद्रेति शूद्रं संबोध्य तस्याः प्रवृत्तेः। नचैष शूद्रशब्दः कयाचिदवयववृत्त्या शूद्रवर्णनीयः अ
वयवप्रसिद्धितः समुदायप्रसिद्धेरनपेक्षतया बलीयस्त्वात्। तस्माद्यथानधीयानस्येष्टौ निषादस्थप
तेरधिकारो वचनसामर्थ्यादेवं संवर्गविद्यायां शूद्रस्याधिकारो भविष्यतीति प्राप्त एवं प्राप्ते ब्रूमः। न शूद्
स्याधिकारो वेदाध्ययनाभावात्। अयमभिसंधिः। यद्यपि स्वाध्यायोध्येतव्य इत्यध्ययनविधिर्न किंचि
त्फलवत्कर्मारभ्याम्नातो नाप्यव्यभिचारिक्रतुसंबंधः परार्थगतः। ननूक्तादेव तत्स्वाध्यायो व्यभिचारि
तक्रतुसंबंधः। तथापि स्वाध्यायाध्ययनं संस्कारविधिरध्ययनस्यापास्ते तोपायतामवगमयतु किंपि
ज्ञापयेत्स्वयं स्वर्गं वा सुवर्णं भार्यमिति वदर्थवादिकं वा फलं कल्प्यमपि त्वार्थनियोगभंगेन स्वाध्यायेन। राम॰

धीयीतेत्येवमर्थः कल्प्यतां किं वा परप्रयुक्ततया प्यन्यतोपि । सिद्धं तमधिगम्य नि दृष्टैर्णोत्विति विशयो न च दृष्टद्वारे
णापरेणयुक्त पाप्यन्यतोपि सिद्धं प्रतिलंभे च यथाश्रुतविनियोगोपपत्तौ च संभवत्यां श्रुतविनियोगभंगेना
ध्ययनादेर्वाश्रुतादृष्टफलकल्पनोचिता । दृष्टश्च स्वाध्यायस्याध्ययनसंस्कारः तेन हि पुरुषेण स प्राप्य
ते । प्राप्तश्च फलवत्कर्मब्रह्मावबोधमभ्युदयनिःश्रेयसप्रयोजनमुपजनयति न तु सुवर्णधारणादौ दृष्टद्वारे
णापरंपरया प्रयुक्तत्वं सिद्धं पुरुषस्याप्तं तस्माद्दृष्टार्थत्वान्नाहाद्वारेणादृष्टविनियोगभंगेन फलं कल्प्यते य
दावाध्ययनसंस्कृतेन स्वाध्यायेन फलवत्कर्मब्रह्मावबोधाभावमानोऽभ्युदयनिःश्रेयसप्रयोजनं इति दृष्टं
पितेन तस्य स्वाध्यायनं तस्यैव कर्मब्रह्मावबोधोऽभ्युदयनिःश्रेयसप्रयोजनो नान्यस्याध्ययनपतादिसं
स्कारस्तस्यैवाध्ययनस्य द्विजातीनामेव तु उपनयनाभावे नाध्ययनसंस्काराभावात् नपुक्तकादिपतित
स्वाध्यायजन्योऽर्थावबोधः शूद्राणां न फलाय कल्पत इति शास्त्रीयसामर्थ्याभावान्न शूद्रो ब्रह्मविद्याया
मधिक्रियत इति सिद्धं । यात्तेऽत्र न वक्तव्यमस्तीति यत्तत्र रैक्वस्य उपलक्षणार्थं विद्यायामनवक्लृप्तत्वा हरेत्विपि शू
द्रेत्यामिद्धवदभिधानस्यन्यायपूर्वकत्वात् तस्यायस्य चोभयत्रसाम्यात् हि तीययूर्वपक्षमनुजानत पुन
नः संवर्गविद्यायामिति । दूषयति नन्विति गंकुत्सायामाभावात् ननु तावच्छूद्रः संवर्गविद्यापासनायां चोप

तेन पठितेनाप्यनिषादस्थपतिन्यायेपि दितिनिषादस्थपतिः किंत्वर्थवादगतोपमद्रशब्दैः सवासनः सिद्धमर्थ
मवद्योतयति न तु प्रापयतीत्यध्वरमीमांसकाः। अस्माकं त्वस्मयरार्द्रपिवावादे सति बाधके प्रमाणे तदर्थो
वगम्यमानो विधिना व्यापेक्षितः स्वीक्रियत एव न्यायपक्षा। भिन्नार्थेऽक्तौ बाधकः। न च विध्यपेक्षा सिद्धिज्ञा
नधिकारिप्रतिलंभेन विधेः पर्यवसानात् विध्युद्देशगतत्वेन त्रैवर्णिकान्वयो योग्यत्वे वचनबलान्निषादस्थ
पतिवत् न त्वेष विध्युद्देशगत इत्युक्तं। तस्मान्नार्थवादमात्राच्छूद्राधिकारसिद्धिरिति भावः। अपि च
किमर्थवादस्वलीन विद्यामात्रेऽधिकारः शूद्रस्य कल्प्यतां संवर्गविद्यायां वा न तावद्विद्यामात्र इत्याह का
मं वा पुमिति न हि संवर्गविद्यायामर्थवादः इः अक्रतो विद्यामात्रेऽधिकारिणमुपनयति अतिप्रसंगात् अ
तर्हि संवर्गविद्यायामेव शूद्रस्याधिकार इत्यत आह अर्थवादस्थतावेति। तत्रिमेवैतच्छूद्रपदं प्रमेन्न
णीतमेवेत्युक्तं तुल्यं हि सांप्रदायिकमित्यत आह शक्यते वा पंर्व इति शोभूद् इति एवं किला नौपाख्याय
ते जानश्रुतिः पौत्रायणः। श्रद्धादेयो बहुदायी बहुपाक्यः स पाति ग्रविवेभूवसवतेषु तेषु ग्रामनगरशृं
गाटकेषु विविधानामन्नपानानां पूर्णानि अतिथिभ्य आवसथान्कारयामास समन्नपानं मे ष्ठावसथेषु
मान्नपानमश्रिन उपयोक्ष्यन्त इति। अथो हंसा राज्ञो दानवीर्यगुणगरिमसंतोषिताः संतो देवर्षयो हं रामः

सद्रूपीमास्थाय तदनुग्रहाय तस्य निशाघसमये दोषाहर्म्यतलस्थस्योपरिमाला मावध्नात्तमुः
तेषामग्रेसरं हंसं संबोध्य स्पृष्टवती अजन्नेकतमो हंसः साहूतमभ्युवाचाभो भो विमल्ला स्वभावा से
ज्ञानमत्रान्तरस्य यो न्यायरास्याद्यु निवेद्य लोके आपतेत न्मा प्रेसौ स्वौमैत्त वाधासीदिति तमेव मुक्तवेन
मग्रगामी हंसः प्रत्युवाच। कमुत्तरान्तमेतत्तेन सयुग्वानमिर्वरैघ मायमध्यायमर्थः। कं वरइति
सोपहासमवदन्माहा अथ वावरो वराकोयं ज्ञातश्रुतिः कुमितास्ते पे पुस्माद्यं वराकः तस्मात्कम
नेकिंभूतमेनं संतं प्राणीमात्रं रैक्कमिव सयुग्वानमात्य युग्वाग त्रीशकटी तया सह वर्तते इति सयुग्वा
रैक्कः तमिव कमेनं प्राणिमात्रं ज्ञातश्रुतिमात्य रैक्कस्य हि ज्योतिरस्तद्यन लोके तस्य प्राणिमात्रस्य त
स्य हि भगवतः पुराण ज्ञानसमारसंयुक्तस्य रैक्कस्य ब्रह्मविरोधमैत्रैलोक्योदरखण्डप्राणिमात्र धर्मोनि
भवति। न पुनारैक्कधर्मैकलोकस्य च विद्वन्मोवगाह्नतइति अथो घई सब वनादात्मनोत्पेत निकर्षमुक्त
घैकाङ्गावरैक्कस्योपश्रुत्य विविधमानसो ज्ञानश्रुतिः किंतवरवास्यपराजितः यौनःपुन्येन निश्व
सन्नुद्वेलकंथं कथमिति निर्णीथमतिवाह पावभूवा ततो निशावसानेपि भुवनवंदारुर्वृदश्रावस्वलक
ति संहसनसंवलितमंगलतूर्यनिर्घोषमाकर्ण्य तल्पतलस्थ एव राजा सकपरैपैतारस्माद्दृपारिः

वा०प्र० शरैकं अस्य विदमेकं तरंतिसयुग्वानामिति विविक्ते पूतेषु विपिनवनगनिकुंजनदीपुलिनादिप्रदेशेष्वात्वि
१२४ ष्वप्रमत्तोस्माभ्यमाव स्वेति स च तत्र तत्रैत्यविष्यक्ष चिरंति विविक्ते देशे शकटस्याधस्ताभ्यामानेकेंडुपमा
तं अस्मद्रागायुनमद्रीसीत् तद्दृष्ट्वा च रैक्वो यं भवितेति प्रतिभाव्य पितुरुपविश्य सविनयमप्राक्षीत् त्वमेवासि हे
भगवन् सयुग्वा रैक्व इति तं स्वैव रैक्वः स्मवानुमतिं च ते सत्यैरिंगीते गौर्हे स्मोधो ऽधनापाचोन्नीय वंनारा
शेतिवेदयामासारत्नानुमं निशम्य गवांषट्शतानि निष्कं च हारं वाश्वतरीरथं वादाय स त्वरं रैक्वं प्र
तिचक्रमे गतान्चा भुवाद हे रैक्व गवांषट्शतानीमानि धनिष्कं हारं ख्वाश्वमश्वतरीरथ रातानादत्स्व
अनुशाधि मां भगवन्निति अथैनमुक्तवैनं प्रतिसाटोपं च सस्मिहं चोवाच रैक्वः अहहारे त्वा शूद्र तवैव सह
गोभिरस्त्विति। अहेति निपातः साटोपमामंत्रणो हारे त्वा युक्ता इत्वा गत्वीरथः हारेत्वा गोभिः सह तवैवा
स्तु किमेतन्मा वेश्या मनेन कल्पवन्नीनो गार्हस्थ्यप्रसक्तिर्वोहानुपयोगिनेति भावः अहहरेत्वेतितु
पाठो ऽनर्थकः तथा च गोभिः सहेत्यत्र प्रतिसंबध्येऽपादाने आवापेषु षितः तदस्मा माख्यापिकायोष्ण
यः अहशाह्वेनजानश्रुतौ राजन्यो पुत्रवपक्रमंस्तुलत्वा व कुसहरैक्वः पर्यत्तततो विख्यायापिसुरामनो
जानश्रुतेः अहूडेति शुचस्य च या मासा कथं पुनः अहूशाह्वेनशुश्रुषत्रास्त्व्यत इति। उच्यते। तदाह वुला राम०

त्तान्यधीमहे। ध्रुवमसि दृढ्हावजानश्रुतिः ध्रुवं प्राप्नवानीत्यर्थः ध्रुवा वा जानश्रुतिर्द्दुवे ध्रुवा प्राप्नुय
थे। अथवा सुवारैक्वं जानश्रुतिर्दुरागतवानुतस्मात्तु शाद्र वर्णादिति छान्दोग्येन भुवा जानश्रुतिर्वा
रैक्वो वा परामृश्यतइत्युक्तं। क्षत्रियत्वगतेश्चोत्तरत्र चैत्ररथेन लिंगात्। इतश्च न जातिशूद्रो जानश्रुति
यत्कारणं प्रकरणनिरूपणे क्रियमाणे क्षत्रियत्वमस्य जानश्रुतेरवगम्यते चैत्ररथेन लिंगादिति
व्याचष्टे। कारणः प्रकरणं निरूपयति उत्तरत्र संवर्गविद्यावाक्यशेषे चैत्ररथेनाभिप्रतारिणा लिंगात् क्ष
त्रियत्वेन समानायां संवर्गविद्यायां समभिव्याहारात् लिंगात् संदिग्धस्य क्षत्रियभावो जानश्रुतेः क्षत्रि
यो निश्चीयते। अथाह शौनकं च कापेयमभिप्रतारिणं च काक्षसेनिं सूदेन परिविष्यमाणौ ब्रह्मचारी बि
भिक्षे इति प्रसिद्धयाजकत्वेन कापेयेनाभिप्रतारिणो योगः प्रतीयते। ब्रह्मचारिभिक्षया चास्यापोद्दतमव
गते। नहि जातु ब्रह्मचारी शूद्रात् भिक्षते। याजकेन च कापेयेन योगाद्याज्योऽभिप्रतारी क्षत्रियत्वं वा
स्य चैत्ररथित्वात्। तस्माच्चैत्ररथिर्नामैकः क्षत्रपतिरजायतेति च नात चैत्ररथित्वं वास्य का
पेयेन याजकेन योगात् एतेन वै चित्ररथं कापेया अयाजयन्निति हि छन्दोगा द्विरात्रे श्रूयते। तेन
चित्ररथस्य याजकाः कापेयाः। अपि चाभिप्रतारी चित्ररथादन्यः सन्नेव कापेयानां याज्यो भवति। प्रायि

बा.प्रत० त्ररथिः स्यात्। समानानां हि याज्यानां प्रायेण समानानामेव याजका भवंति। तस्माच्चैत्ररथित्वादभि
प्रतारी काक्षसेनिः क्षत्रियस्तेन समभिव्याहाराज्जानश्रुतिः क्षत्रियः संभाव्यते। इतश्च क्षत्रियो जा
१२५ नश्रुतिरित्याह। अनन्तरं परस्परैश्वर्ययोगाच्च। क्षत्तृप्रेषणाद्यर्थसंभवेन तादृशस्य बहुदायस्य बहु
पाक्यस्यैश्वर्यं प्रायेण क्षत्रियस्य हस्त्यश्वपृथिव्यादिवदिति। संस्कारपरामर्शात्तदभावाभिलापाच्च। न के
वलमुपनीताध्ययनविधिपरामर्शेन शूद्रस्यानधिकारः किं तु तेषु तेषु विद्योपदेशप्रदेशेषूपनयन
संस्कारपरामर्शात् शूद्रस्य तदभावाभिधानात् ब्रह्मविद्यायामनधिकार इति। नन्वनुपनीतस्यापि
प्रत्नोपदेशाः श्रूयन्ते तान्हानुपनीयैवेति। तथा शूद्रस्यानुपनीतस्यैवाधिकारो भविष्यतीत्यत आह।
तान्हानुपनीयैवेत्यपि प्रदर्शिते नोपनयनप्राप्तिः प्राप्तिपूर्वकत्वात्प्रतिषेधस्य येषामुपनयनं प्राप्तं तेषा
मेव तत्प्रतिषिध्यते। तच्च द्विजातीनामिति द्विजातयस्तेषु विद्योपनयनाद्यधिकृतं न शूद्र इति। न
रभावनिर्धारणे च प्रवृत्तेः सत्यकामो ह जाबालः प्रमीतपितृकः स्वां मातरं जबालामपृच्छदिह
माचार्यकुले ब्रह्मचर्यं चरिष्यामि तद्ब्रवीतु भवती किंगोत्रोऽहमिति सा ब्रवीत्त्वज्जननकपरिचरणा
परतपानाहमज्ञासिषं यद्गोत्रं त्वमिति स त्वाचार्यं गौतममुपससार उपसद्य चोवाच भगवन्ब्रह्मच राम०

र्यमुपेयां त्वयीति· स होवाच नाविज्ञातगोत्र उपनीयत इति किंगोत्रोसीति। अथो वाव सत्यकामः
नाहं वेद स्वं गोत्रं स्वां मातरं जबालामपृच्छं सापि न वेदेति तदुपश्रुत्याभ्यधायि गौतमः। नाहि तन्मन
आर्जवयुक्तमीदृशं वचस्तेनास्मिन्नब्र इसंभावनास्तीति हि ज्ञातिजन्मानमुपनेष्य इत्युपनेतुमनु
शासितुं जाबालं गौतमः प्रवृत्तः तेनापि न शूद्रस्याधिकार इति विज्ञापते। न सत्यादगा इति न सत्य
मतिक्रान्तवानसीति। श्रवणाध्ययनार्थप्रतिषेधात्स्मृतेश्च निगदव्याख्यातेन भाष्येण व्याख्यातमत्र
तिरोहितार्थमस्य तत्कंपनात्· प्राणवज्ज्ञक्तिबलाद्याकारप्रकरणांत्तु भक्त्या वायुपंचवृत्तिरध्यात्मि
कौ वाह्यश्चात्र प्रतिपाद्यः। तथा हि प्राणशब्दो मुख्यो वायावाध्यात्मिके वज्रशब्दश्चाशनौ अशनिश्च
वायुपरिणाम वायुरेव हि वात्याधूमज्योतिः सलिलैः सवलितः पर्जन्यभावेन परिणतो विद्युत्स्तनयि
त्नुवृष्ट्यशनिभावेन विवर्त्तते। यद्यपि वसर्वं जगदितिवत्स्ववायुकं प्रतीयते· तथापि सर्वशब्द आपे
क्षिकोपि न स्वाभिधेयं जहाति किंतु संकुचितवृत्तिर्भवति प्राणवज्रशब्दौ तु प्रसिद्धविषयत्वे स्वार्थमे
वत्यजतः। तस्मात्स्वार्थत्यागाद्वरं वृत्तिसंकोचः स्वार्थलेशावस्थानात्। अस्मत्शब्दोपि मरणाभा
वचचलो न सार्वकालिकं तत्स्वभावं ब्रूते। ज्योग्जीवतृतपापित्तदुपपन्नं यथा अस्मता रेवा रति। तस्मा

प्राणवद्ब्रह्मत्वानुरोधाद्वायुरेवात्र विवक्षितो न ब्रह्मेति प्राप्ते एवं प्राप्त उच्यते। कंपनात् स वायुः कृत्स्नज
गतः कंपनात्परमात्मैव शब्दात्प्रमित इति। मेरुकृशानुस्थानुषज्यते ब्रह्मणो हि बिभ्यदेतज्जगत्स्वव्यापारे
नियमेन प्रवर्त्तते न तु मर्यादामतिवर्त्तते। एतदुक्तं भवति। नह्यत्र श्रुतिसंकोचमात्रेऽप्यर्थपारतागेहे
तुः अपि तु पूर्वापरवाक्यैकवाक्यताप्रकरणाभ्यां सबलितः श्रुतिसंकोचः। तदिदमुक्तं पूर्वापरयोर्ग्र
थभागयोः ब्रह्मैव निर्दिश्यमानमुपलभामहे इहैव कथमंतराले वायुं निर्दिश्यमानं प्रतिपद्येमाहि
ति नरनेन वाक्यैकवाक्यता दर्शिता प्रकरणादपीति भाष्येण प्रकरणमुक्तं। यत्त्वस्तु शब्दं तदेव प्रश्ना
नं प्रतिवक्तव्यमिति तस्य प्रकरण एवाद्वस्मिन्सूच्यमाने शास्त्रमप्रमाणं भवेदसंबद्धप्रलापत्वान्नत्वा
युविज्ञानात्कि विरुद्धतत्त्वमाभिहितमापेक्षिकं तदेति श्रप पुनरर्ष्ट त्वजयतीति श्रुत्या ह्युपसृत्य वि
जयतेऽकोनवमुत्स्युविजयदृत्यापेक्षिकत्वात्तच्चात्रैव प्रकरणान्तरकरणेन हेतुना न केवलमुपक्र
त्वात्तदापेक्षिकमिति पितुपरमात्मानमभिधायतोऽन्यद्वान्नमिति वा पादरात्रेत्वाभिधानात्मनत्वा
तोऽभ्यासाद्वाज्ञो भवतीति भावः। ज्योतिर्दर्शनात्। अत्र हि ज्योतिःशब्दस्य तेजसि मुख्यत्वाद्ब्रह्मणि ज
घन्यत्वात्प्रकरणाच्छ्रुतेर्बलीयस्त्वात्। एवं च श्रुतिसंकोचस्य चात्र भावेन प्रस्तुतब्रह्मज्योतिः परोक्ता। राम॰

ऋतेः पूर्वकालतायोपपादनप्रसंगात् । समुत्थायात्र ऋतेः श्रुते तरावुज्योतिः । तथा हि समुत्थानमु
त्क्रमणमुच्यते न तु विवेकविज्ञानं उत्क्रमणं च तेजः पक्षे अर्चिरादिमार्गेणोपपद्यते । आदित्स आविर
पेक्षयापरज्योतिर्भवतीति तदुपसंपद्य तस्य समीपे भूत्वा स्वेन रूपेणाभिनिः पद्यते कार्यब्रह्मलो
कप्राप्तौ क्रमेण मुच्यते । ब्रह्मज्योतिः पक्षे तु ब्रह्मभूत्वा कापरा स्वरूपनिष्पत्तिः । न च देहादिविवेकब्रह्मस्व
रूपसाक्षात्कारो निवृत्तिरूपो निष्पत्तिः साहि ब्रह्मभूयात् प्राचीना न तु पराचीना सेव मुपसंपद्येति
त्वा ऋतेः पीडा तस्मात् त्रिसृभिः श्रुतिभिः प्रकरणबाधनात् तेजः शब्दात्र ज्योतिरिति प्राप्ते एवं प्राप्ते अभिधी
यते परमेव ब्रह्मज्योतिःशब्दकं कस्मात् दर्शनात् । तस्य ही प्रकरणेनुवृत्तिर्दृश्यते यत्स्वतुप्रतिज्ञाय
ते य आत्मा अपहतपाप्मेत्यत्र ज्योतिःशब्दो मात्रमपि धापिनो नन्न र्थवो प्रसंगात् प्रकरणादेव तद्वगते
रहंतु स्वार्थसंसर्गात् परत्वेनोक्तदोषसंभवइति पो यपर्ययपालो चनया प्रकरणानुरोधात् दूरमपि
पूर्वकालतामपि परित्यज्य प्रकरणानुगुणा ज्योतिः परं ब्रह्म प्रतीयते यत्तूक्तं मुमुक्षुणादित्य प्राप्ति
रभिहितेति नास्या वात्यन्तिको मोक्षः किंतु कार्यब्रह्मलोकप्राप्तिरिति चक्रमभ्युत्तथा भिप्रायं स्वेनरूपेणा
भिनिष्पद्यत इति वचनं न चैतत्प्रकरणोक्तब्रह्मतत्त्वविदुपयोगतया कीर्तितः तथा चक्रतिनतस्मा

त्वाणाद् अक्षो मंतीतीति अत्रैव समवनीयंत इति तच्चेत द्वारेणाक्रममुक्तिश्चार्चिरादिमार्गस्य हि कार्यब्रह्म
१३) लोकप्रापकत्वं न तु ब्रह्मभूयहेतुभावः जीवस्य तु नित्यपाधिनित्यमुद्बुद्ब्रह्मभावस्याला त्कारहेतुके
मोक्षे क्रमत मर्चिरादिमार्गेण कार्यब्रह्मलोकप्राप्त्याश्च त्रापि ब्रह्मविदेहत्तदुपपत्तेः तस्मान्नज्योतिरादि
त्यमुपघसंप्रसादस्य जीवस्य स्वेन रूपेणापारमार्थिकेन ब्रह्मणाभिनिष्पत्तिराजसीतिश्रुतेसौत्तत्रा
पिक्लृशः आपिनयरज्योतिः स उत्तमः पुरुष इतीहैवोपरिष्टाद्दिशेषणान्तेजसो व्यावृत्ते पुरुषविषयत्वे
नावस्थापनात् ज्योतिः परस्य परमेव ब्रह्मज्योतिर्नतु तेज इति सिद्धं ॥ ६॥ आकाशोऽर्थान्तरत्वादिव्यपदे
शात्॥ यद्यप्याकाशस्तल्लिंगादित्यत्र ब्रह्मलिंगदर्शनादाकाशः परमात्मेति प्रत्यादितं तथापि तद्द्रश्च
परमात्मलिंगदर्शनाभावान्न नामरूपनिर्वहणस्य भूताकाशेप्यवकाशदानेनोपपत्तेः अकस्मात्तत्रू
ढिपरित्यागस्यायोगात् नामरूपे अंतरा ब्रह्मेति च नाकाशस्य नामरूपनिर्वहितुरंतरालत्वमाहात्पितु ब्र
ह्मणः तेन भूताकाशो नामरूपयोर्निर्वहिता ब्रह्म चैतयोरंतरालंमध्यं सारमिति यावत् न तु निर्वोढैव
ब्रह्म अंतरालं वा नित्वोढ तस्मात् प्रसिद्धभूताकाशमेवाकाशो न तु ब्रह्मेति प्राप्ते एवं प्राप्त उच्यते परमेवा
काशं ब्रह्म कस्मादर्थान्तरत्वादिव्यपदेशान्नामरूपमात्रनिर्वाहकमिहाकाशमुच्यते भूताकाशं च वि राम०

भाष्य स्थूलतः सत स्थिति [illegible] वैनाका [illegible] क्रांतो भेदेन [illegible] संसारि प्रतिपादनात् ॥
कारत्वेन नामरूपात्मतः पातिसत्कथमात्मानमुद्वहेत नहि सुषुप्ते लीनोपि विज्ञानी स्वस्कंधेनात्मानं वो
ढुमुत्सहते न च नाममूर्तिरविशेषतः प्रदृष्टा भूताकाशवत्तु नामरूपान्तरे संकोचयितुं संभवेत्सं
युतेन चानतिवोढकत्वेन तु आत्मवपुषि मे ब्रह्मलिंगं कथंचित श्रीन परतंत्रेनेतु मुचितं अनेन जीवेनात्म
नानुप्रविश्य नामरूपे व्याकरवाणीति च वस्तुस्थूलत्वमति स्फुटं ब्रह्मलिंगमत्र प्रतीयते ब्रह्मरूपतया च
जीवस्य व्याकर्तृत्वे ब्रह्मणा सह व्याकर्तृत्वमुक्तं संबंधतिर्वेहितुरेव चोत्तरत्र यथा जीवोऽप्यात्मनो निर्वे
नात्मस्वस्वान्तरात्मनि स्वार्थे भेदकल्पनापि न फलतः तथा च तेनाम रूपे परमाकाशमन्तरेत्य पदार्थान्तर व्यपदेश
उपपन्नो भवत्याकाशस्यान्तरस्मादर्थान्तरव्यपदेशात् तत्त्वे रैथ्य संदर्भे मचेतत्रैव परोऽपते संसार्येव नात्र हात्मा
अहंकाराश्रयस्त्वे श्रवणादिपरीतः सर्वजनसिद्धत एव व्यपदेश विज्ञानमयः प्राणेष्विति ह्यादिस्फतिसंदर्भ आदि
मध्यावसाने सुष्णाभ्यस्तीति तदनुवादपरो भवितुमर्हतीति एवं संसार्यात्मैव किंचिदपि स्य महासंसार
स्य वाना दिनानादित्वाद जड्यत्वोपनेतुं तदनरतीतिरिक्तः कश्चिन्नित्यशुद्धबुद्धमुक्तस्वभावः प्रतिपाद्य:
प नुसुषुप्त्युत्क्रांत्योः प्राज्ञेनात्मना परिष्वक्त इति भेदमन्यस्येनात्मभेदः किंतु ये आत्मशब्दः स्वभाववचनः
नि०प० न तैवसुषुप्त्युत्क्रान्त्यवस्थायाविशेषैश्च वा न च पिंडितम्प्रेनात्मना स्वभावेन परिष्वक्तो न किंचिद्वे

त्यभेदेपिभेदवदुपचारेणायोजनीयंयथाहुःप्राज्ञःसंपरिष्वक्तइतियत्तादुपश्रुतायाःसंसारित्वेनैवकार्यं
११८ करणसंघातात्मकस्यलिंगतोजीवकर्मोक्तितत्तयातद्योग्यतयाचयोजनीयाःतस्मात्संसार्येवान्य
तिनतुपरमात्माप्रतिपाद्यतइतिप्राप्तेएवंप्राप्तेउच्यतेसुषुप्त्युत्क्रान्त्योर्भेदेनव्यपदेशादित्यत्तुतुउक्तेन्तेन्नम
नाभिसंधिकिंसंसारिणोन्यःपरमात्मानास्तीतिस्यात्संसार्यात्मपरंयोयंविज्ञानमयःप्राणेष्वितिवाक्यं
आहोस्वित्तद्व्यतिरेकेणपरमात्मनोनुकीर्तितत्वात्संसारिणआदिमध्यावसानेषुव्युत्पन्नमशो
तुसंसार्यात्मपरंनतावत्संसार्येवेतिशक्यंस्वतत्वाभावस्तत्वमितियादिकाद्दिशनतश्चआगमाईस्वतेनोशंकं
गतिसामान्यादित्यादिभिःसूत्रसंदर्भैरुपपादितानन्वायमपिसंसारेपितिरिक्तपरमात्मसंकीर्तनाभावःसु
षुप्त्युत्क्रान्त्योस्तत्संकीर्तनात्तन्नचप्राज्ञस्यपरमात्मनोजीवाद्भेदेनकीर्तनेनगतिसंभवेराहोशिरइति
वदौपचारिकंयुक्तंनचप्राज्ञशब्दःप्रज्ञाप्रकर्षशालिनिरूढवृत्तिःकथंचिदज्ञविषयोव्याख्यातुमुचितः
नचप्रज्ञाप्रकर्षोसंकुचतवृत्तिर्विदितसमस्तवेदितव्यात्सर्वविदोन्यत्रसंभवतिनचैवंभूतोजीवा
त्म त्मातस्मात्सुषुप्त्युत्क्रान्त्योर्भेदेनजीवात्प्राज्ञस्यपरमात्मनोव्यपदेशात्योयंविज्ञानमयइत्यादिनाजीवा
त्मानंलोकसिद्धमनूद्यतस्यपरमात्मभावोनधिगतःप्रतिपाद्यतेनतुजीवात्मानुवादमात्रपरतापेता राम॰ १

सा

निवृत्तां चास्मिन्ननधिगतार्थबोधनपरं हि शास्त्रं प्रमाणं नानुवादमात्रमिति भवितुमर्हतीति अतएव च संसा
रिणां परमात्मभावविधानाय दिमध्यावसौने घ तु बाधनपावमर्श उपपद्यते एवं च महत्त्वं चात्मत्वं च सर्व
गतस्य नित्यस्यात्मनः संभवन्त्यापेक्षिकं कल्पयिष्यते परमात्मधर्मे बुद्धौ तावदवस्थोपन्यासादिति
नानेनावस्थात्वे विवक्ष्यते आपेत्तवस्थानामुपजनापायधर्मकत्वेनतरतिस्थितम् अवस्थारहितं पर
मात्मानं विवक्षति परितनवाक्यसंदर्भालोचनादिति ॥ पत्यादिशब्देभ्यः । सर्वस्य वशी वशः सामर्थ्यं
सर्वस्य जगतः प्रभवत्यप्रत्यूहावस्थानं सामर्थ्यं इति अतएव सर्वस्येशानः सामर्थ्येन त्यपस्तु येन सर्व
स्येहितदिच्छानुविधानाज्ञ्ज्ञानेन अतएव सर्वस्याधिपतिः सर्वस्य लिपंतानुपमीति यावत् किं च स एव
वं भूतो हृद्यन्तर्ज्योतिः पुरुषो विज्ञानमयो न साधुना कर्मणा भूयानुहृछोर्वं भवतीत्येवमाद्युः अतपो
संसारिणं परमात्मानमेव प्रतिपादयंति तस्माज्ज्योतिरात्मानं मानान्तरसिद्धमनूद्य तस्य ब्रह्मभावप्रति
पादनपरो मोयं विज्ञानमयः इत्यादिर्वाक्यसंदर्भ इति ॥ ३ ॥ इति श्रीवाचस्पतिमिश्रविरचिते शारीरक
भाष्यविभागे भामत्यां प्रथमस्याध्यायस्य तृतीयः पादः ॥ जयति गणाधीशः ॥ आनुमानि
कमप्येकेषामिति चेन्न शरीररूपकविन्यस्तगृहीतेर्दर्शयति च स्यादेतत् ब्रह्मजिज्ञासां प्रतिज्ञाय ब्र

रीरेभ्य कारणकापि विभागाद्दवि मेभागाद्देख्वरूपस्य कारणातमस्याव्यक्तमिति न च महतः पर
मव्यक्तमिति प्रकरणपरिशेषाभ्यां शरीरगोचरं शरीरस्य श्रोतत्वोर सूक्ष्मरूपशाखाद्यात्मत्वेना
व्यक्तात्वानुपपत्तेः तस्मात्प्रधानमेवाव्यक्तमुच्यते इति प्राप्त उच्यते नैतदेवं न ह्येतत्काठकंवा
क्यमिति लौकिकी हि प्रसिद्धिर्वैदार्थनिरूपणनिमित्तं तद्यापात्वानूपपाहुः यस्य लौकिकाश
ब्दस्य वैदिकात्स्य तेषामर्थो इति नु परीक्ष्य काणादिमापिकीये रूपेयी हि सा न वेदार्थनि
रूपणनिबंधनासिद्धीवाधादिवावस्तु तस्मादुष्टि नस्तावन्न प्रधानं प्रतीपते योगस्तात्र्यमन्या
पितुल्यं तदेवमव्यक्तमत्र्य नावस्थाप्य सिद्धा पा प्रकरणपरिशेषाभ्यां शरीरगोचरोपमव्यक्तश
ब्दः यथा चास्यानुरीचरत्वमुपपद्यते तथाग्रे दर्शयिष्यते नमु शरीरादिकुमयो विषयानूतद्धे
वरानुपिद्धि पथाम्बोधानमालव्यचलातिसवमिंदिपद्याः स्वगोचरमालेव्येति आत्माभोक्ते
ते त्याहुर्मनीषिणः कथमिन्द्रियमनोयुग्योगपद्याभवेति इन्द्रियार्थमनः सन्निकर्षेणात्मनः
धाहीनाभोक्ता प्रधानस्याकोनावतो वचनप्रकरणाभिति गतव्यं विशेषुरमपदं प्रधानमि
तितराकोत्सामवताग्रपातीत श्रींद्रियादिभिरसंपतेरिति असंयमाभिधानव्यतिरेकमुखेनसं

प्रमावदातीकरणाय पुरुषः श्रेष्ठवचनः मन्वानेः त्वेन परिश्रेष्ठत्वेन देहेन्द्रियाणामेव बाह्येभ्यो गंधादिभ्यः
१२० श्रेष्ठत्वं स्यादित्यत आहार्था पि शब्दादय इति नान्तरत्वेन श्रेष्ठत्वमपि तु प्रधानत्वपानत्त्वविवक्षाधीनेग्रहेभ्य
इन्द्रियेभ्यो ऽति ग्रहत्वाया ऽर्थानां प्राधान्यं श्रुत्यापि विवक्षितमिति इन्द्रियेभ्यो ऽर्थानां प्राधान्यात्परत्वं भवति घ्राण
जिह्वावाक्चक्षुः श्रोत्रमनोहस्तत्वचो हीन्द्रियाणि स्पष्टोग्रहा इत्युच्यन्ते ति वशीकुर्वन्ति वल्लेका
तिपुरुषपशुमिति नचैनान्ति ह्यतो वशीकर्तुमुत्सहन्ते यावद्दस्यपुरुषपशुर्वे गन्धरसनामरूपशब्दका
मकर्मस्पर्शान्नोपहरन्ति अत एते वगोधार्थिपाविति ग्रहाणामुपहारेणाग्रहाणां ग्रहत्वापत्ते नदिदमुक्तं
इन्द्रियाणां ग्रहत्वं विषयाणामतिग्रहत्वमिति श्रुतिप्रसिद्धेरिति ग्रहत्वेनेन्द्रियेभ्यः साम्येपि मनसः स्वगतेन
विशेषेणार्थेभ्यः परत्वमाह विषयेभ्यश्च मनसः परत्वमिति कस्मात्पुनः राणोबोप ले ओग्न
आहोक्षशब्दादेरिति तन्मूलमभिज्ञानात्मपर्थः श्रेष्ठत्वे हेतुमाह भोक्तृत्वमिति तदुक्तेन विषयात्मना स्वामिनमा
हानुजत्रधुवोऽस्त्रुति स्मृतिभ्यां हिरण्यगर्भबुद्धिरात्मशब्देनोच्यत इत्याह वाति पूरितिभोग्यजात
स्य बुद्धिरधिकरणमिति बुद्धिः एतदेवं सर्वासां बुद्धीनां प्रथमजं हिरण्यगर्भबुद्धौ कनीदैवापाहिरण्य
गर्भबुद्धेर्महत्त्वव्यापनात्सामत्वे चोत्तस्यैव बुद्धिमात्रा पृथकूकरणमुपपन्नं नन्वेतस्मिन्नस्ते हिरण्य राम ०

गार्भेबुद्धेरात्मत्वान्नरथिन आत्मनो भोक्तुरत्रोपादानमिति निरस्थमात्रं परिशिष्यते अपि तु रथवानपीत्य
त आह एतस्मिन्नुपन्यासे इति यथा हि समारोपितेन प्रतिबिंबान्तरवस्तुतो भिद्यते तथा न परमात्मनो वि
ज्ञानात्मा वस्तुतो भिद्यते इति परमात्मैवात्र रथवानिहोपात्तः तेन रथमात्रं परिशिष्टमिति अथ रथादिरूपकल्प
नायाः शरीरादिषु किं प्रयोजनमित्यत आह शरीरेन्द्रियमनोबुद्धिविषयवेदनासंयुक्तस्य हीति वेदनासुखा
द्यनुभवः प्रत्यग्भवतीति प्रत्यगात्मेह जीवोभिमतस्तस्य ब्रह्मावगतिर्नच जीवस्य ब्रह्मत्वमानांतरासिद्धे
नात्र नागमापेक्षेति स्यात् तथा चेति वाणीति छान्दसि द्वितीयालोपः शेषमतिरोहितार्थं पूर्वपक्षे सानुशय
बीजनिराकरणपरं सूत्रमस्य तुत्तरहेतात्॥ प्रकृते विकाराणामनन्यत्वात् प्रकृतेरव्यक्तत्वे विकार उपचर्य
ते यथा गोभिः श्रीणीतेति गोशब्दस्तद्विकारे पयसि अव्यक्तात्कारणाद्विकाराणामनन्यत्वेनाव्यक्तशब्दार्हं
ते प्रमाणमाह तथा च श्रुतिरिति। अव्याकृतमव्यक्तमित्यनर्थान्तरं नन्वेवमपि प्रधानमेवाभ्युपेतं भवति सुख
दुःखमोहात्मकं जगदेवं भूतादेवकारणाद्भवितुमर्हतीति कारणात्मकत्वात्कार्यस्य प्रपञ्चस्य सुखात्मकत्वं तस्य
ज्ञातस्यात् सुखात्मत्वं तदुक्तं प्रपञ्चनस्य मोहात्मत्वं नन्वभ्युपगत्या चाव्यक्तं प्रधानमेवाभ्युपेतमिति शंकां निराकर
णार्थं सूत्रं॥ तदधीनत्वादर्थवत्प्रधानं हि सांख्यानां स्वतन्त्रमनीश्वरणावाईश्वरतन्त्रत्वेन्न ते भ्यो वाचक्त

नो भिन्नं शक्यं निर्वक्तुं ब्रह्मणोऽस्ति यस्माद् विद्याशक्तिर्मायादिशब्दवाच्यानशक्या तत्त्वेनान्यत्वेन वा निर्वक्तुमि
१२९ दमिति वास्या अव्यक्तत्वम् युक्तमिति वीर्यत्वेनासंसोपमव्याकृतत्वाद् स्य प्रधानवाच्याद्भेदः अविद्याशक्तेश्चेश्वरा
धीनत्वं तस्याश्च प्रत्यात्मं च इत्यमात्रमशक्तं कार्यापालमिति शक्तेरर्थवत्त्वं तदिदमुक्तमर्थवदिति स्यादेतच्च
दि ब्रह्मणोऽविद्याशक्त्या संसारः प्रजापतेरिह तन्मुक्तानामपि पुनस्तत्प्रसंगः तस्याः प्रधानवत्तादवस्थ्यात् नूनं हि नाशे वा
समस्तसंसारोच्छेदस्तन्मूलाविद्याशक्तेः समुच्छेदादित्यत आह मुक्तानां च पुनर्बन्धस्यानुत्पत्तिः कुतः विद्यया त
स्या बीजशक्तेर्दाहात् अयमभिसंधिः न वयं प्रधानवदविद्यां सर्वजीवेष्वेकामाचक्ष्महे येनैवमुपालभेमहि किं
त्वियं प्रतिजीवं भिद्यते तेन यस्यैव जीवस्य विद्योत्पन्ना तस्यैवाविद्यापनीयते न जीवान्तरस्य भिन्नाधिकरणयो
र्विद्याविद्ययोरविरोधात् तत्कुतः समस्तसंसारोच्छेदप्रसंगः प्रधानवादिनां त्वेष दोषः प्रधानस्यैकत्वेन तदु
च्छेदे सर्वोच्छेदः अनुच्छेदे वानकस्यचिन्मुक्तिरिति अनिर्मोक्षप्रधानाभेदेऽपि चित्तविवेकख्यातिलक्षणाविद्यास
दसत्त्वनिबंधनौ बंधमोक्षौ न हि कृतं प्रधानेन अविद्यासद्भावाभावाभ्यामेव तदुपपत्तेर्नैर्वा विद्योपा
+धिभेद इति परास्पराश्रयापादनमपासिद्धेरिति सांप्रतं अनादित्वाद्बीजांकुरवदुभयसिद्धेः अविद्यात्वमात्रेण वैक
त्वोपचारोऽव्यक्तमिति चाव्याकृतमिति चानन्येव मवि धेव जगद्बीजमिति कृतमीश्वरेणेत्यत आह परमेश्व राम॰
+धिभेदाज्जीवभेदो जीवभेदाधीनस्याविद्योपा

१ तदन्यप्रेरितेन हचेतनेन चेतनानधिष्ठितं कार्यमुपपद्यते इत्यभिहितं तत्कार्यं दृष्टं परमेश्वरे निमित्ततया योजितानन्तरमाश्रय १
1 पातेप्रपंचविभ्रमस्यहीश्वराधिष्ठानत्वमहि विभ्रमस्य परस्वाधिष्ठानत्वेन यथा शुक्तिविभ्रमोरजतरूपाद्य
नस्वेव प्रपंच विभ्रम ईश्वरोपादानः तस्मा जीवाधिकरणाप्यविद्या निमित्ततया विषयतया चेश्वरमाश्रय
तेइतिईश्वराश्रयेत्यच्यतेनत्वाधारतयाविद्यास्वभावे ब्रह्मणीति तदनुपपन्नेरिति तस्याहयस्यास्वरूपप्र
तिबोधरहिताः शरीरेसंसारिणोजीव इति यस्यामविद्योपासमाश्रितेजीवाः जीवानांस्वरूपंवास्तवंब्रह्म
वहोधरहिताः शरीरतरतिलयउक्तः संसारिण इति विशेषउक्तः अस्यस्याधीनत्वाज्जीवभावस्येतियद्यपि
जीवाव्यक्तयोरनादित्वेनानिपततयोर्योर्यपैत्रथाप्यव्यक्तस्यपूर्वत्वेविवक्षितेतदुक्तंसमपिशरीरवदि
द्रिपादीनामितिजीववदीश्वरदेहत्वमाचार्येरशोपमन्यमाहान्योन्विततेतत्त्वपतितैर्नितिप्रकरणा
पारिशेष्याद्योरभ्युपगन्तुमुत्पन्नत्वाद्वेवाग्रहणानिपमहेतुरस्तीतितोकनेआत्मानस्यार्थमितिअव्यक्तपदमे
वस्थूलशरीरव्याहृतिहेतुः अव्यक्तत्वात्तस्येतिशंकार्थः निराकरोतिनेत्यव्यक्ततदधीनत्वादितिप्रकृतहाना
प्रकृतप्रसक्तिपाप्रसंगेनेकवाक्यत्वेसंभवतिनवाक्यभेदोयुक्तस्तेनचाकांक्षातिनैकवाक्यत्वमुभयोश्चप्रक
तभिन्नमपेक्षायाहेतोर्हतोनस्तीत्यवाभिधायकमपिपदंशरीरद्वयपरंनाचमुख्यपातूस्थानत्परापि
सोपपाधारिकंभवतियथोपहेत्स्मात्रनिराकरणकोत्सापाकाकयपरंप्रयुज्यमानंप्रादिसर्वोपिहेत्यचरवि

ज्ञापनिपथ्याहुः काकेभ्यो रस्य नामन्नामितिवो लोपिनोदितः उपधात प्रधानत्वान्न श्रादिभ्योनरस्वतीति
 ननु शरीरद्वयस्यात्राकाला किंतु दुःशोधत्वात्सूक्ष्मस्यैव शरीरस्य न तु ष्मा कि कस्य स्थूलस्य एतद्धि
स्य दृबीभत्सतया सुकरं वैराग्यं विषयत्वेन शोधयितुमित्यत आह नचैव मेतव्यमिति विष्णोः परमं पद
मव गमव गमय्यापितु यर मन्त्र प्रतिपाद्यत्वेन प्रसक्ततं तु वैराग्या पशोधनमित्यर्थः अलं वा विवादेन भ
वतु सूक्ष्ममेव शरीरं परिशोध्यं तथापि न सांख्याभिमतमत्र प्रधानं परमित्यभिप्रेत्याह सर्वथा नेति॥ ज्ञे
यत्वावचनाच्च॥ इतोपि नायमव्यक्तशब्दः सांख्याभिमतप्रधानपरः स्यात् सांख्यैर्हि खलु प्रधानाद्विवेकेन पुरुषं
निश्रेयसाय ज्ञातुं च विभूत्यै च प्रधानं ज्ञेयत्वेनोपादीयते न चेह तानीयादिति चोपासीतेति वा विधि वि
ते भक्तिरस्ति किंत्वपि यमकथयत्मात्रेन चैतावता सांख्यसम्मति प्रत्यभिज्ञानं भवतीति भावः ज्ञेयत्वावचन
स्यासिद्धिमाशंक्य परिहरति सूत्रं तास्तिद्धिप्रदर्शनार्थं सूत्रं॥ ५ वदतीति चेन्न प्राज्ञो हि प्रकरणात्॥ निर्गुणा
त्मा तमस्य भाव्यं॥ त्रयाणामेव चैवमुपन्यासः प्रश्नश्च वरप्रदानोपक्रमादिमन्मनचिकेतः संवादरू
पायां कासं हृति ज्ञानसमाप्ते करवल्लीनां त्रयस्यतं मकरन् नचिकेतसि कुपितेन पित्रा प्रहिता यमेतुष्ट त्रीन्व
रान् प्रदत्ते न चिकेतास्तु प्रथमेन वरेण पितुः सौमनस्यं वव्रे द्वितीयेनाग्निविद्यां तृतीयेनात्मविद्यां वरे रा.म०

शात्मविषवरस्तृतीय इतिवचनात् ननु तत्र वरप्रदाने प्रधानगोचरैस्तः प्रश्नप्रतिवचनेन तस्मात्कथंवत्यो
पुत्रप्रजीवपरमात्मपरैवसाकांक्षेति न त्वप्रक्रांतप्रधानपरा भवितुमर्हतीत्याह तत्स्थेन प्रधानस्यावक्त
श्रुत्वा वाच्यत्वमिति हि तत इदं प्रवक्ष्यामि गुह्यं ब्रह्म सनातनमित्यनेन व्यवहिते जीवविषयं यथा मरणं प्रा
प्यात्मा भवति गौतमेत्यादि प्रतिवचनमिति ॥ तिपोजनान्नम्नत्राह नोदकः किं जीवपरमात्मनोरेक एव प्रश्नः
किंवा योऽयं जीवस्य येयं प्रेते मनुष्य इति प्रश्नो नाश्च परमात्मनोऽन्यत्र धर्मादित्यादिः एकत्वे सत्र विरोधस्तु पा
रागमिति भेदे तु पितुः सौमनस्यादौ वा ख्यमग्न्यात्मज्ञानविषय वरत्रयप्रदानात्तभावोऽन्यत्र धर्मादि ना
दिप्रश्नस्य तृतीयवरांतरकल्पनापाताप्तीमर इति बाधप्रसंगः वरप्रदानानंतर्भावो प्रश्नस्यतद्
न प्रधानाख्यानमप्यनेवर्भूतं वरप्रदाने स्तु महतः परमव्यक्तमित्यालेयः परिहरति अत्रोच्यते नै
वं वयमि हेति वस्तुतो जीवपरमात्मनोर भेदात्तु प्रश्नस्याभेदेनैक एव प्रश्नः अत एव प्रतिवचनम
१ प्येकं सूत्रं त्वत्रास्तु वभेदाभिप्रायेणावस्तुतो जीवपरमात्मनोरभेद इत्यत्र अपन्यासेन भगवता भाष्य
कारेणा दर्शितं तत्र यथा जीवविषयस्यास्तित्वनास्तित्व प्रश्नस्ये त्यादि येयं प्रेते इति हि नचिकेतसः प्रश्नमुप
श्रुत्य न कामविषयमलोभं वास्य प्रतीत्यम्भ विद्याभीप्सिनं नचिकेतसं मन्ये इत्यादिना नचिकेतस

वा·प्र

१२२

प्रशस्य प्रश्नमपि तदीयं प्रशंसन् अस्त्यस्मिन् प्रश्ने ब्रह्मैवोत्तरमनुवाचत्वं दुर्दर्शमिति यदि पुनर्जीवात्मा सोऽभिधे
तजीवगोचरः प्रश्नः प्राक्तगोचरश्चोत्तरमिति किं केन संगच्छेत अपि च यद्विषयं प्रश्नमुपक्रान्तमस्य फलेनैव
प्रशंसितो नचिकेताः पदक्तमेवमप्रपृष्टे ते दूमरे चावदध्यात् ततः प्रश्नोत्साद्द्याद्यां स्यात् प्रश्नान्तरेत्व
स्या वस्तुस्थाने प्रसारिता सत्यदृष्टार्थीस्यादिता हृयत्यस्मिन्नितिधास्मिन् प्रश्नोपन्यास इत्येषमतिरोहितार्थं
महद्वच्च अनेन सांख्यप्रसिद्धेः वैदिकप्रसिद्ध्याविरोधात् न सांख्यप्रसिद्धिर्वैदव्याद्तव्ये त्यक्तं सांख्याभा
महतोऽत्वं सत्तामात्रं पुरुषार्थक्रियाक्षमं सत् तस्य भावः सत्ता तन्मात्रं महत्तत्त्वमिति यावत् पुरुषार्थक्रिया
शब्दाद्युपभोगलक्षणा सत्त्वं पुरुषान्यताख्यातिलक्षणा सा च सर्वा महति बुद्धौ समाप्यते इति महत्
तत्त्वं सत्तामात्रमुच्यते इति चमसवदविशेषात्॥ अजामेकां यद्यपि छागायारूढस्तथाप्यध्यात्मावि
द्याधिकारान्न तत्र वर्तितुमर्हति तस्मादुक्तेर आक्षेपरसंभवाद्योगेन वर्तयितव्यस्तत्र किं स्वतन्त्रं प्रधा
नमनेनमंत्रवर्णेनानूद्यतामुत पारमेश्वरी मायाशक्तिस्तेजोबन्नरूपाकिंपाकारणमुच्यतां किं ता
वत्प्राप्तं प्रधानमेवेति तथा हि यादृशं प्रधानं सांख्यैः समर्पितं तादृशमेवास्मिन्नन्यूनातिरिक्तं प्रतीयते त
हि प्रधानलक्षणा प्रकृतिर्नेतायुत इत्यजा चसकाचलोहितशुक्लकृष्णा च यद्यपि लोहितत्वादयो रामः

वर्णो न रजः प्रभृतिषु संनितथापि लोहितं कुसुंभादि रंजयति ओपि रंजयतीति लोहितं एवं प्रसेत्रपाथः
मुक्तं सत्त्वमपि प्रसन्नमिति मुक्तं एवमावरकं प्रियादिरूपं ज्ञानमो प्यावरकमिति कृष्णं परेणापि गौणा
व्याकृतस्य स्वरूपेणालोहितत्वादिपो गत्वास्थेपः किंतु तत्कार्यस्य तेजोब्रन्ने रोहितत्वादिकारणेऽपचर
ऊ णीयं कार्यसोप्युपीकारणो कस्यनीयं तदस्मा[illegible]कमपि ईतु स्यं अजोत्ये कोतु षमाणो नुशेतेतहास्पे
नोभुक्तभोगा जहत्येनां इति त्वात्मभेदश्रवणात् सांख्यस्मृते रेवात्र मंत्रवर्णोपस्थापितज्ञानं तत्र ब्याख्यानत्र
भेर त्रिणापाः तस्याभेका त्स्याभ्यकृयाभेनात्मभावात् तस्मात्स्वतंत्रं प्रधानं शास्त्रमिति प्राप्ते पोसाध्याचक्षा
वयवधर्मैरिति अवयवाः प्रधानस्यैकस्य सत्त्वरजस्तमांसि तेषां धर्मो रोहितत्वादयः तैरिति प्रज्ञास्त्रैगु
ण्यान्विता रतिसुखदुःखमोहात्मिकाः तथाहि मैत्रस्य रे सुनमेदा यां मैत्रस्य सुखं तत्कस्य हेतोस्तं प्रति
सत्त्वसमुद्भवात् तथा तेस्य पत्नीनां दुःखं तत्कस्य हेतोस्तां प्रति रजःसमुद्भवात् तथा चैत्रस्य तामवि
दतो मोहो विषादः स कस्य हेतोस्तं प्रति तमःसमुद्भवात् तेन भैरवापां च सर्वे भावा व्याख्याताः ते त रिद्
त्रैगुण्यान्वितत्वं प्रजानां अनुशोत इति व्याचष्टे तामेवाविषये तिविषयादिशब्दादयः प्रकृतिविकाराः त्रै
गुण्येन सुखदुःखमोहात्मानः इंद्रियमनो हंकारप्रनादिकया बुद्धिसत्त्वमुपसंक्रामति तेन बुद्धिसत्त्वप्र तर

२६

धानविकारस्तु सुखदुःखमोहात्मकं शब्दादिरूपेण परिणमते चितिशक्तिस्तु परिणामिन्यप्रति[redacted]संक्रमा
१२४ पि बुद्धिसत्त्वात्सात्मनो विवेकमबुद्ध्यमाना बुद्धिवृत्त्येव विषयासेनाविषया बुद्धिस्था सुखादीन्नात्मन्यभि
मन्यमाना सुखादिमती भवतीन रदिह भुंक्ते सुखी दुःखी मूढोऽहमित्यविवेकितया संसरत्येकः सत्वपुरुषान्य
ताख्यातिसमुन्मूलितनिखिलवासनाविद्यानुबंधस्त्वन्यो जहात्येनां प्रकृतिं न दिदं मन्यं पुनरिति भुक्तभोगा उर्क
मिति याचष्टे कृतभोगापवर्गा शब्दाद्युपलब्धिर्भोगः गुणपुरुषान्यताख्यातिरपवर्गस्तावुपहृत्य तेहि तपा
पुरुष इति एवं प्रागभिधीयते न तावदजो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोन्य इत्येत
दात्मभेदप्रतिपादनपरमपि श्रुतिमिदमात्मभेदमनूद्य बंधमोक्षौ प्रतिपादयति स्म चात्र निरर्थिभेदः एकोदे
वः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतान्तरात्मेत्यादिश्रुतिरित्यात्मैकत्वप्रतिपादनपरा मिथि विरोधात्का
न्यतिक्रीवतिष्ठते तथा च न सांख्यप्रक्रियाप्रत्यभिज्ञानमित्यजावाक्यं च म सबाधकत्वपरिशिष्टमोचनं
नस्वतंत्रप्रधाननिश्चयापयमाप्नुत इदमुक्तं सूत्रकृतावमसवद्विशेषादिति उक्तं रसूत्रमवतारापि
तुशोकतेन्नाविदं तत्स्थिर इति सूत्रमवतारयति अत्र क्रमः स्पोतिरूपक्रमान्तु तथात्मुधीयत एके॥ स
र्वेशाखाप्रत्ययमेकं त्वाह्मेति स्थितेऽशाखांतरे ज्ञानाद्दितोदि [redacted] गुणापोमीनीतेजोबन्नलक्षणान्तरए एम०

मुमोनुज्ञस्वेदजोद्भिज्जचतुर्विधभूतग्राममत्र कृतिभूतेपमजाप्रतियन्तव्यारोहि नमुक्तसूपमितिरोहितो
हृदिरूपतपात स्यापवप्रत्यभिज्ञानानूननुसोख्यपरिकालिना प्रकृतिं तस्याश्च आमारीकतपाकृतड
त्यक्तकल्पनाप्रसंगान्तरं जनाचिरोहितापकृपचारेस्य सति मुख्यार्थसंभवे पोगान्तनदिदभुक्तं रोहितादि
नाशज्ञानामिति अजापरस्य च समुदाय प्रसिद्धिपरित्यागेन नजायत इत्य व यव प्रसिद्धिं श्च परागो पप्रसं
गात्तत्रानुरूपकल्पनपासमुदाय प्रसिद्धेर्वा नपेक्षाया: स्वाकारानन्यापिचाप मत्पेक्षतिक न्यायोक्त
दर्शनानुगुणोनसाख्यस्यानुगुणत्वाहन्तयोहापीति किंकारणं प्रधानस्य पक्रमेति ब्रह्मस्वरूपं नावध्ये
ग्यकारणं न भवति विशुद्धत्वात्तस्य यथाहु: पुरुषस्य च शुद्धस्य नाशुद्धा विकृतिर्भवेत् इत्याशंक्य वतीव
क्ष्यति: एच्छति किं कारणं वक्ष्यामन्न ब्रह्मणो नगरादुत्पत्ति: तत्किं कारणं ब्रह्मेत्यर्थ: तेब्रह्मतेद: ध्यानयोगे
नात्मानेगमना: प्रशान्त्र पश्यन्ति ति पोजनयाथो नियोतिमिति अविद्याशक्तिपोनि: सा च प्राज्ञे जीवं नानेम
र्को अतोवाक्योपन्यासो पमतिरोहितार्थस्त्रीनरमवतार्थ्यत्रंशकते कथं पुनरीति अजा रूतिजाति:तं
जीव न्ये चुनास्ति नचनेतो वन्यानो जन्मभ्रवृणारजन्मति मिनो प्यजाशङ्कसंभवति त्याहनेजीवन्यानाम
तिसूत्रमवतारयति अतउत्तरं पठति कल्पनोपदेशाच्च मध्वादिवदविरोधनं नुकिंआगतोहि नमुक्तशस्ले

वत्वन्याहश्रीनामपिछागादीनामुपलंभादित्यतआहयस्मिन्पेति बहुवचनेनबहुत्वांशेषेनिगद्यत्वा
१२५ ख्याते॥ नसंख्योपसंग्रहादपिनानाभावादतिरेकाच्च॥ अवांतरसंगतिमाहसर्वंयदिष्टेपीतियत्त
नोइतिहिसमासार्थः पंचसंख्ययासंबध्यतेनचद्विर्वक्तव्योस्तिज्ञापामितिसमासविधानान्नमनुक्तेषुनिरू
३ ढोयंपंचजनशब्दइतिवाच्यंतथाहिपंचमनुजाइतिस्यात्सर्वेषांत्मनिपंचमनुष्याःसामाकाशाश्चपंचप्र
तिष्ठानमितिनिस्तान्पंचसर्वस्यैवप्रतिष्ठानात्तस्माद्दिदेशसंभावात्त्यागेनात्रयोगआश्लिष्टपंचजनश
ब्दप्रकृत्यंचित्तत्वेषुव्याख्येयः तन्नापापिकिंपंचप्राणादयोवात्वगशोषगताविवक्ष्यतामुतन्नइतिरिक्ता
अन्येषवकेचिनतत्रपीवोयर्वयर्णोनोचनयाकारत्वमाख्येदिनवाकयोविरोधात्स्मत्रहिज्ञोतिघाप
चतेत्वमन्नेनेतरस्तत्रतन्चघोडशीग्रहणग्रहणावद्विकल्पसंभवोनुष्ठानंहिविकल्प्यतेनवस्तुकथंपंचानमूल
नुष्ठानकथाविध्यभावात्तस्मात्कानिचिद्देवतत्वानिइहपंचपंचप्रत्येकंपंचसंख्यायोगीनिपंचविंशतित
त्वानिभवंतिसांख्यप्रसिद्धमहत्यादीनिपंचविंशतितत्वानिसमर्पंतइतितान्येतानेनमंत्रेणोच्यंतइतिनाप
द्दपुप्रधानादिनवाधारत्वेनआत्मनोव्यवस्थानात्स्यात्मनिचाधाराधेयभावस्यविरोधात्आकाशस्य
चव्यतिरेचनानत्रपोविंशतित्वजनाकत्वेस्यान्नपंचपंचजनाइतिवाच्यंसप्तव्याकाशात्मनोर्व्यतिरेचनेमूलरम०

लप्रकृतिभागैः सत्वरजस्तमोभिः पंचविंशतिशब्दोपपन्नेस्तथात्तत्वात्मकानामप्यासप्तविंशतिस्त
त्वानां पंचविंशतिस्तत्वानीति स्वासिद्धांतव्याकोप इति चेन्न मूलप्रकृतित्वमात्रेणैकीकृत्य सत्वरजस्तमां
सि पंचविंशतितोपपत्तेः हिरण्यगर्भावेन तु तेषां समप्रविशतित्वाविरोधात् तस्मान्नाशाङ्क्षी सांख्यस्थिति
रिति प्राप्ते मूलप्रकृतिः प्रधानं नास्यान्यस्य विकृतिरिति अपि तु प्रकृतिरेव तदिदमुक्तं मूलेति महदहंका
रतत्वे महतो विकृतिः प्रकृतिश्चान्तरेव नाम संस सन् पंचतन्मात्राणां तदेव सात्विकस्तत्प्रकृतिरेकादशें
द्रियाणां पंचतन्मात्राणि चाहंकारस्य विकृतिः आकाशादीनां पंचानां प्रकृतिः तदिदमुक्तं महदाद्याः प्र
कृतिविकृतयः सप्त षोडशकस्तु षोडशसंख्यावच्छिन्नो गणो विकारस्तत्पंचभूतानि एकादशेंद्रिया
णि इति षोडशको गणः यद्यपि पृथिव्यादयो घटादीनां प्रकृतिस्तथापि तत्पृथिव्यादिभ्यः तत्वांतर
मिति न प्रकृतिः तत्वांतरोपादानत्वे चेह प्रकृतित्वमभिमतं नोपादानमात्रत्वमित्यविरोधः पुरुषस्तु कू
टस्थनित्योपरिणामी न कस्यचित्प्रकृतिर्नापि विकृतिरिति एवं प्राप्तेभिधीयते न संख्योपसंग्रहादपि
प्रधानादीनां श्रुतिमत्त्वाशेषाकर्जे आकस्मात् नानाभावात् न नानात्वेनानि पंचविंशतितत्वानि नैवोप
संग्रहः पंचशः साधारणो धर्मोस्ति न खलु सत्वरजस्तमो महदहंकाराणामेकः पंचकः पावागुणो वाद्रव्येषु

१३६ जातिर्वाधर्मंपंचतन्मात्रादिभ्यो आरब्धं सत्वादिगुणानुगतः कश्चिदस्ति नापि पृथिव्यामेव गन्धो वायुप्राणा
नांमापिरसनं च स्तु स्वकश्रोत्रवाचां नापि पाणिपादपायूपस्थमनसां येनैकेना साधारणो नो कश्ची
नां पंचपंचका भवितुमर्हेति पूर्वपक्षैकदेशी नन्वस्तु त्वायापति अथो च्येत पंचविंशति संख्यैव पामि
तिपद्यपि परस्परं संख्यापामवोतरसंख्याद्वित्वादिकानातितथापि तत्पूर्वं न स्यात् मं भवामो वापि पंच
सं स्वानां पापामास्नापरसंख्यालक्षणा पूर्वं संख्योपन्यस्त इति दूषयति अपमेवास्मिन्नास्ते दोष इति न
वपंचशब्देन शब्देन समस्तो समस्तः शक्यो वेत्तु मिमाह पर आत्र पंचश इति ननु म वत्तु समा
सः तथापि किमितस्तत्र द्रस्वमस्तत्वा अनवीप्सान्त्रापि च वीप्सायां पंचद्वयग्रहणं दशेवंतत्वानीति
न संख्यास्मतिप्रत्याभिज्ञानमित्य समासमप्येमाह नयंच करूपग्रहणं पंचपंच चेति नचैकायं
चसंख्या पंच संख्यांतरसात्रा का विशेषं पंच शब्दस्य संख्यापसज्जेन द्रव्यवचनत्वेन संख्याया उपस
र्जनत्वाविशेषणं नासंयोगादितोहि कस्यांपचसंख्यापा इति तदेव पूर्वपक्षैकदेशी निषितेपरम
पूर्वपक्षैराम मुच्छापयति नन्वापत्रपंचसंख्याका जनाः पंचेति अत्र तावन्न रूढो समासो न योगः संभव
तीति व्यस्ते तथापि लोगके पंचजनशब्द समप्रयोगे दूषयति पुंजेपु चपूली शब्दस्येति पंच पूली पद्र
पद्र

त्यत्र पञ्चापि पृथग्द्वित्वादिकार्थसमवायिनी संख्यावच्छेदिकास्ति तथापि द्रव्ये समुदायिनो वाच्ये न त्वित्तु
समुदायेऽसमासे समभ्यत्र तत्तदात्मकत्वेन समुदायार्थत्वमपेक्ष्यायोपदानं राभिहिता पंचसंख्यासंबध्यते
पंचेति पंचत्वलना इत्यत्र तु पंचसंख्यापोत्यात्रिंशिघ्यपात्त नानाम वृष्टित्रत्वा समुदायस्य च पंचपूली
वदन्त्राप्रतीतिः नपदांतराभिहिता संख्यासंबध्यते स्यादेतत् संख्येयपञ्चनानां माभूत्कद्वान्तरवा संसं
ख्यावच्छेदः पंचसंख्यायास्तत्तयावच्छेदोऽभिधीयते नाहि साप्यवच्छिन्नेत्यत आह भवदपीदं वि
शेषणमिति तूक्तोत्र दोषः नत्वघूपसर्जने विशेषणान्वयस्तेन पञ्चशब्दस्य यावत् संख्येयोपस
र्जनसंख्याभाद्द्रविशेषत्तत्पंचत्वना इत्यत्र समासे विशेषणापेक्षायां तु न समासः स्याद सामर्थ्या
त्न हि भवति ऋद्धस्य राजपुरुष इति न त्वोपसर्जने समासोपि तु पदवृत्तिरेव ऋद्धस्य राज्ञः पुरुष
इति सापेक्षत्वेनासामर्थ्यादित्यर्थः अतिरेकाङ्क्षेतिन्यभ्यच्चुपमात्रं पदिस त्वरजस्तमांसि त्र
पक्षेपो यौगपद्यमन्यथा ॥ नीलाभासस्य हि चित्तस्य नीलादालंबनप्रत्ययात् ॥
नीलाकारता समनन्तरतो समनन्तरप्रत्ययात्पूर्वविज्ञानाद्बोधरूपता चेद्रूपा ३

धिपतिप्रत्ययात्वग्रहण प्रतिनियमः आलोकाद्याहकारिप्रत्ययात् तेषां स्पर्शार्थतागृह्येत सुखादीनामपि
चैतानां चित्ताभिन्नहेतुजानां चक्षुरादेरतान्यपरकारणानि सेंस प्रतिज्ञा चतुर्विधान्न हेतवः प्रतीत्य चि
त्तचैतानुत्पद्यते तत्स्वभावकारणत्वेऽपरूप्येता आपाजरद्वातो तान्नया वद्वर्तते इति ॥ उप
५७ मिश्रेष्वसाताद्भीवाहाभिन्ना तथा चक्षुरादि नलहानिरिति प्रतिज्ञाहानिः ॥ प्रतिसंख्या प्रतिसं
ख्यानिरोधः प्राप्तिरविशेषात् ॥ भावप्रतीत्याया संख्या बुद्धिः प्रतिसंख्या तया निरोधः प्रतिसं
ख्यानिरोधः ॥ संतमिमं ज्ञानं तेन कर्मोत्पत्तिवमाकारहानेबुद्धेर्म्यव प्रतीयत्वं ते नाप्रति
संख्यानिरोधोपि व्याख्यातः सतालम्बचेरो वा विरोधः संतानिद्दारोगो चेरो वानतावत्सं
तानस्यानिरोधः समवतिहेतुफलभावेन निव्यवस्थिताः संतानिनः एवोदयव्ययधर्मी क्ष
णः संतानं तत्रयोद्यावत्पः संतानीयनिरोधात्संतानोच्छेदे न भावितव्यं सर्वि फलवैचि
तार्थमतेनवा आरभतेचेत्तो ता ॥ तथा च न संतानोच्छेदः कृतानारंभे तु भवेदयः किं तुस्या
दिसतः ॥ कार्यक्रियाकारितायाः सत्वालंदाणस्याविरहत्वात् तद्भावे तत्र नकमप्यत्र नकलेना

सदित्यनेनक्रमेण संतानः सर्व एव संतानिनः इति तत्संतानो नितरामसन्निवृत्तिकस्य प्रतिसंख्या
नानिरोधः॥ ननु सभागानां संतानिनां हेतुफलभावः संतानस्य स्याद्विभागो स्याद्धि निरो
धः विसभागोत्पादक एव लक्षणः संतानस्यान्त्यः इति वाच्यं॥ तथा सति अपविद्धान प्रवा
हेन सादि विदानो त्पत्तौ संतानोच्छेदप्रसंगः॥ तथापि सत्यान्त्ये वा विसभागे ष्वपि ततः स
भागादभीति न संतानोच्छेदः तदनेनायं संख्याय विनाहत मेवेयापि संतानेषु संतानि
नामवच्छिन्ने न हेतुफलभावेन संतानविच्छेदस्यासंभवादिति॥ नापि भावगोचरो सं
भवतः प्रतिसंख्याप्रतिसंख्यानिरोधौ॥ अत्र तावदुत्पन्नमात्रापवृत्तस्य भावस्य न प्र
तिसंख्यानिरोधः संभवति तस्य पुनरप्रयत्नोपेहाभावादित्यकस्यैव दूषणं। तथापि दे
शान्तरसम्भयस्थिनापि निरोधे द्रुते॥ नहि भावानामिति॥ यतो निरन्वयो विनाशोऽनसं
भवत्यतो निरुपाख्योऽपि न संभवति॥ तेनान्वयिनारूपेण भावस्य नष्टस्याप्युपाख्ये
यत्वात् निरन्वयविनाशाभावे हेतुमाह सर्वोऽपि च व्यवस्थास्य इति यदन्वयिरूपं तन्

तदसमार्थ्यमसद्भावः अवस्यान्तविरोधो रचयातुपजनानापादधर्मीणः तासां सर्वासामनिर्वचनीयतया
ख्यातो न पदसार्थ्यसत्वमन्यथैव तेन रूपेनानंतत्वे तस्य च प्रत्येकमभावस्यानवस्थापत्तिभिन्नाप
मानत्वाद न विनाश इति ॥ अवस्थावतो ऽविनाशानो भावस्यानंतनिरन्वयो विनाश इति ।
नानंतत्वस्यान्वयिनः सर्वत्राविच्छेदात् स्यादेतत् ॥ मान्विउसद्द्रसमतपालादिषु सर्वत्र
मृतत्वस्य प्रत्यभिज्ञानानुवृत्तेर्वं ॥ न सोपलब्धलब्धवति ननष्ट स्यात् द्विविधः किमस्ति रूपमन्
न्वयि प्रत्यभिज्ञाय मानेयेनास्य न निरन्वयो विनाशः स्यादित्यत आह अन्यथा प्रत्यभि
ज्ञायमानान्वयीति तत्रापि ततो पते जसामा ते उमउलमंतुदत्यापनीयते इति ऽनुमेयं ॥
मतदीनामन्वयिनामविच्छेदः नाता ॥ [illegible] लत्वेव तु ॥ उदविदैव क्ति धौ तोपमाको नाभि
५२ ध्यते । विनष्टे [illegible] अपि तत्ते विदेवास्ति तस्यान्वयो ऽदुधो । तस्मान्न कश्चिदपि निरन्वयो
नाश इति सिद्धं ॥ उभयथा च दोषात् ॥ चरिनरः सामग्रीन सम्हतानसा यमनियमा
दिः अवणमननादिस्त्रमार्गी हेतोर्ज्ञानेन तत्पादिभावनात्र तिकेहितमन्पत ॥ आकाश

चाविशेषात् ॥ यच्च तेषामिति ॥ विशेषगुणे निष्प्रतिपन्नो न च प्रतिशब्दगुणानुमेयत्वमाकाश
स्य वक्तव्यं ॥ तथा हि जातिमत्त्वेन सामान्यविशेषसमवायेभ्यो विभक्तस्य शब्दस्यास्प
ते र्शवत्वेनाभिमतसतिबाह्यैकेन्द्रियग्राह्यत्वेन गन्धादिवद् गुणत्वमनुमितेन चायमात्मगुणो
बाह्येन्द्रियगोचरत्वात् ॥ गन्धादिवदत एव न मनसो गुणः ॥ तद्गुणानामप्रत्यक्षत्वात् ॥
न च पृथिव्यादिगुणः तद्गुणगन्धादिनाशे च योनुपलब्धेः ॥ तस्माद्गुणोऽन्यत्वे गन्धादिव
दसाधारणेन्द्रियग्राह्यो द्रव्यमनुमापयतीति तदाकाशं पञ्चमं भावं किंचिति ॥ अपि चा
वरणाभावमाकाशमिच्छत इति ॥ निषेध्यनिषेधाधिकरणनिरूपणाधीननिरूपणो
निषेधो नाम सत्यधिकरणानिरूपणे शक्यो निरूपयितुं तथा चावरणाभावाधिकरणमा
काशं वक्तव्यमिति ॥ अतिरोहितमन्यत् ॥ अनुस्मर्तव्य ॥ विभज्यते अपि च वैनाशिकः स
र्वं क्षणिकमिति ॥ यदृच्छसत्त्वे अस्मिन्ननुपलब्धे स्मर्तारन्यत्वेऽपि समानाधारसंततौ का
र्यकारणभावात् स्मृतिरुपपद्यत इति मन्यमानो न परितुष्यतीति तं प्रति प्रतिभिज्ञा

समाख्यातं प्रत्यक्षविरोधमाह। अपि च दर्शनस्मरणयोः कर्तैरीति ततोऽहमद्राक्षमिति प्रतीयादिति ॥ अ
हं स्मरामी अन्यत्तद्द्राक्षीदित्यर्थः ॥ प्रत्यभिज्ञाप्रत्यक्षविरोध प्रपंचयन्नुत्तरः आजन्मन आचोत
मादुष्ठामात् आमरणादित्यर्थः ॥ न चास्मादृश्यनिवेद्यं प्रत्यभिज्ञानं दृष्टापरदर्शनदर्शिन एकस्या
तो भावे तदनुपपत्तेः ॥ शंकते नैकदर्शनदर्शमिति ॥ प्रत्ययान्तरमिति ॥ अयमर्थो विकल्पप्रत्ययो यदि
कल्पस्स्वाकारं वास्तवतया व्यवस्यति ॥ ननु ततः पूर्वापरौ दर्शनौ तयोः साक्षिप्रत्ययात् इति तत्वाप
मेकस्यानेकदर्शिनः स्थिरस्य प्रसज्ज्येत निराकरोति नैतन्नेदमिति ॥ अन्नोपदर्शीपादानादि
तिनानापदार्थसंभिन्नो वा व्याप्यावभासः तावदुच्च विकल्पः प्रत्ययेत तत्रैते नानापदार्थीन प्रत्यय
न इति ब्रुवाणः स्वसंवेदनता धते चैकस्य ज्ञानस्य नानाकारत्वे संभवति ॥ एकत्वविरोधात् ॥ न [illegible]
चतावद्वत्येव ज्ञानानामिति पुक्ते तथापि प्रत्याकारे ज्ञानानां समाप्ते: तेषां च परस्परवार्ता ज्ञाना
भावात् ॥ नानात्वे च नस्यात् तस्मात् पूर्वापरदर्शनत्वात् इत्यपरगोचरत्वे ज्ञानस्य वक्तव्यं ॥ न चैत
त्पूर्वापरदर्शनस्यापि नैकं ज्ञानाकारं विनेति दाए भंग भंगप्रसंगः ॥ यत्तु चैत ॥ अन्येतम्मि

वा॰ रा॰
२५

न्विकल्पेतेनेदंसदसत्त्वमिति पदद्वयप्रयोगो न विहन्यते नेदंतास्पदे पदार्थे तयोरसत्त्वमिति विवक्षितम
पित्वेवसाकारतावानस्यकल्पितेति॥ तत्राह यदाहि लोकप्रसिद्धः पदार्थ इति॥ एकाधिकरणे न विप्रतिपित्सुध
र्मद्वयाभ्युपगमो विवादः॥ तत्रैकस्य पक्षे साध्यत्वमन्यस्य तत्साधनं दूषयति न चैतत्सर्वमसत्प्रति
कल्पनानां वाच्यालेवनत्वे सति च लोकप्रसिद्धपदार्थत्वे भवितुमर्हति॥ ज्ञानाकारत्वे हि विकल्पप्रति
भासिनां नित्यत्वानित्यत्वादीनामेकस्यापि विषयत्वाभावात॥ ज्ञानानां च धर्मिणामेकान्तविरोधः॥
न चात्मनि त्वं च बुद्धेर्नित्यत्वं च बुद्धयो विप्रतिपद्येते॥ न चालोकेऽपि नानित्यशब्देनात्मनि वि
भुत्वं विवक्षितं लोकः॥ नित्यशब्दप्रयुञ्जानो लौकिकोऽपि नित्यशब्दमात्मनि प्रयुञ्जानेन विप्रतिपद्यते
तस्मादनेन स्वपक्षे प्रतिष्ठापयिषता परपक्षसाधनं च निराचिकीर्षता विकल्पानां लोक
सिद्धपदार्थकता च वाच्यालेवनता च वक्तव्या॥ यदुच्येत हि विधो हि विकल्पानां विषयो न स्वरूप वि
मध्यवसेयस्य॥ तत्रेष्वाकारेण्योऽध्यवसेयवस्तु वापि॥ तथा च पदद्वयप्रतिपादितेनाह लोक
विप्रतिपत्तिः प्रसिद्धपदार्थकत्वे चोपपद्यत इत्यत आह एवमेवेदोषं इति॥ निश्चितपदं देनेच

नर्म
६

वेत्त्यं तेतोन्यद्दुःखमानं बहुप्रलापितमात्मनः केवलेरव्यापयेत् ॥ अथ समागम संदि ॥ केयमध्यवसेयपता
वासिस्यापदिग्धास्पितान हैविध्यंरूपान्यासो च्यतानन्ते तैरेवस्वप्रतिभासेनार्थावसायेन प्रवृत्ति
रिति अपविकल्पाकारस्यबोधमर्थावसायः ॥ किंकरणमहोस्विद्योजनमुतादोषोमिति ॥ नताव
त्करणंनस्मिन्सतकार्यशक्यंनहिजातुमहत्समपिशिल्पिनःकटंपटयितुमीशते नचांतरेणयोजन
योजयितुं ॥ अपिचतपास्वतिपुक्ते इति प्रत्ययः स्यान्न चास्ति आरोपोपि किंतत्स्यमारोपेणास्येतराग
नि पिमारोपदापितत्स्यमारोपितदाकिंवैतल्पेनाहोस्वित्तत्समयजेनाविकल्पकेननतावन्निर्विकल्पोनि
लापसंस्मर्जीयोग्यजोचरः अथसविकल्पापसमर्थस्वलक्षणदेशकालानन्तुगतोगोचरयितुम
र्हति ॥ यथाहुरशाक्यसमयोः स्वात्मास्वरवादीनामनन्यभाव ॥ तेषामतःस्तु साविनिर्नाभितत्पान्तुं
गृहीति ॥ नचतत्समयभाविनाविकल्पेनस्वलक्षणमारोपंवास्येविकल्पेनागृहीतेतत्राविक
ल्पः स्वाकारमारोपयितुमर्हतिनहिरजततानाप्रतिभासि निपुणोवाचेनिविकल्पनिरजतदेशाने
नैरयंरजतमारोपयितुमर्हतस्वमारोपेनुवास्येस्वाकारेतेवेस्मात्तनवास्येइति। तथाचनानारोपः

ऽपि चाद्वैतरूपः स्वसंवेदने सं तं विकल्पयित्वा स्वसंवेदं तत्राकारं गृहीत्वा पश्चाद् समारोपयत्येवं वा यदा
त्स्याकारं गृह्णाति तदैवार्थमारोपयति न तावत्तत्रावनतयाक्रमविरहिततोत्तान स्वप्नमनर्हिनीग्रहणाको
परोक्तत्वेन तस्यापदैवतस्याकारमर्थमनर्पीगृह्णाति तदैवार्थमारोपयतीति वक्तव्यं न चैवं युज्यते॥
स्वाकारो हि स्वसंवेदनप्रत्यक्षतयाऽनुभूतिविषये वा स्याद्वा रोप्यमाणं मथिपदं स्वरूपतः स्वतो न
देवस्याकारस्याकारः समारोपितो न च भेदाग्रहमात्रेण समारोपात्प्रधाने वेशयावेशपरूपयो
भेदग्रहस्याकृत्वात् अपि च अकृतस्वमात्रे चेद्भूप्येत वा स्यात् स्वलक्षणादेकग्रहणेन तदा भ्रमत्वा
प्रवृत्तिः हेतत्रैलोक्यतयोनेनमेदोगृह्णात इति यत्र कचन व नैतावि शेषादेतेन ज्वाला
कोरस्यैवालीकस्यापि वा प्यतिसमारोपः प्रत्युक्तः॥ तस्मात्स्वरूपं तत एतान्पृच्छामानेव तु प्रलापितं
मात्रेण नः स्यादपेरिति॥ अपि च समानाद्रूप्यनिबंधनं संव्यवहारं स्वेनैव कार्यतोऽस्मि त्येवमाकारबुद्धि
निबंधनो भवेन्नोनुतदेवेदमित्याकारबुद्धिनिबंधनइत्याह नेवं समादृश्यानां व्यवहारइति।
नेनुज्वालादिसादृश्यादन्यत्वामपि सादृश्यबुद्धोतद्भावीप्रमनिबंधनः संव्यवहारो दृश्यते यथा

तथेहापि भविष्यतीति चेन्नापरितो येणाहं भवेदपि करानिविष्टदेवकुलानीति ॥ तथाहि विविधज
नसंकीर्णगोपुरेण पुरं विविशमानेन नरांतरेभ्यस्तान्निर्द्धारणात्प्रवारणानि हविद्यत
मुपलभंते पापश्रुपतेरपयज्ञनाइति ॥ नासतोऽदृष्टत्वात् ॥ इतश्चानुपपन्नो वैनाशिकसम
यइति अस्थिरात्कार्योत्पत्तिर्निमिष्टतो वैनाशिकानामभावादेव भावोत्पत्तिमाहुः उक्तं
तद्ध्यस्तात् ॥ निरपेक्षात्कार्योत्पत्तौ पुनः खकुमिवैषम्यापत्तेः तथा च हेतुरुपमेष ते
नोपहतत्वानुपहतत्वानुपपत्तेः ॥ अनुपकारिणि चापेक्षानुपपत्तेरनेकत्वप्रसंगः उभावात्
नापेक्षत्वं न पेक्षत्वयोरन्यतरनिषेधस्यान्यतरविधाननांतरीयकत्वेन प्रकारांतरा
भावान्नास्थिरात् भावाद्भावोत्पत्तिरिति तदेतत्प्रत्येयादि भावाद्भावोत्पत्तिः परिहियत इत्य
र्थः ॥ न केवलमसतो न पद्यते ॥ दर्शयति च नानुपमृद्य प्रादुर्भावादिति ॥ एतद्धि मनुते वि
नष्टाल्लिल्लेति किल कारणे निष्पन्नं कूटस्थाज्जोत्कारणात्कार्यमुत्पद्यते तापि सर्वं सर्वत
उत्पद्येत अप्रममभिमतादि ॥ कूटस्थाद्धि कार्यं तत्र न समभावो वा स्यात् अत एव भावो ना

बौ १०२१

३१

सचेत्कार्यजनजनकभावः॥ ततो यावदनेन कार्यं कर्त्तव्यं तावत्सहसैव कुर्वीत समर्थस्य हे
पायोगात्॥ अत तस्य भावत्वेलुन कदाचिदपि कुर्वीत यद्युच्येत समर्थोपि क्रमवत्सहका
रिसचिवक्रमेण कार्यं करोतीति तदयुक्तं॥ विकल्पासहत्वात्॥ किमस्य सहकारिणः
किंचिदुपकारमादधति नवा अनाधानेनुपकारिणो नापेक्ष्येरन्॥ आधानेपि भिन्नमभि
न्नं वोपकारमादध्युः॥ आभेदे तदेवाभिहितमिति कौटस्थ्यव्याहन्येत भेदे तदुपकारस्य त
स्मिन्सति कार्यस्य भावादसति तस्मिन्सत्यपि कौटस्थ्ये कार्यस्यानुत्पादादन्वयव्यतिरेका
भ्यामुपकारएव कार्यकारी न भावइति नार्थक्रियाकारी भावः॥ तदुक्तं॥ वर्षातपाभ्यां किं व्यो
मश्चर्मण्यस्ति तयोः फलं॥ चर्मोपमश्चेत्सोऽनित्यः खतुल्यश्चेदसत्फलइति॥ तथा
चाक्षणिकत्वादपि चेत्कूटस्थात्कार्यं जायते कृत्स्नं सर्वं सर्वस्माज्जायेतेति स्मर्त्तं॥ उपसं
हरति तस्मादभावग्रस्तं भाव इति॥ तत्रेदमुच्यते॥ नासतोऽदृष्टत्वादिति नाभावात्॥
कार्योत्पत्तिः कस्माददृष्टत्वात्॥ नहि शशविषाणादंकुरादीनां कार्याणामुत्पत्तिर्दृश्यते यदि

त्वभावाद्भावस्योत्पत्तिः स्यात्ततोऽभावत्वाविशेषात् शशविषाणादिभ्योऽप्यङ्कुरोत्पत्तिः न ह्यभावो विशेष्यते॥
विशेषणयोगे वा सोऽपि भावः स्यान्न निरुपाख्यत्वम्॥ विशेषणयोगमङ्गीकृत्य स्यात् अङ्गीकृत्याह नाप्य
भावः कस्यचिद्धेतुरिति अपि च यद्युपादानान्वितेन तत्तस्य विकारो यथा घटशरावोदञ्चनादेर्यथाहे
म्नानन्विता न हेमविकाराः॥ अनन्विताश्चेत् विकारा अभावेन तस्मान्नाभावविकाराः किन्त्वि
कारा भावस्य तेनान्वितत्वादित्याह अभावाच्चाभावोत्पत्ताविति॥ अभावकारणवादिनो वचनेन स्य
न्वेभाष्य दूषयति यदुक्तमिति किञ्चेदोऽपि भावः अभवत्कोहकारि सम्भवत्यानात् क्रमेण कार्यो
त्पत्तौ कोऽपि न चानुपकारकः सहकारिणः सत्त्वास्य सहकारिभूतस्याप्युपकारोऽनाभ्यन्तरो
नाप्यन्तः किं त्वनिर्वाच्य एव जातिर्वाच्यानुकार्यमप्यनिर्वाच्यमेव जायते॥ नचैतावतास्थिर
स्याकारणत्वं तदुपादानत्वात् कार्यस्य तदुपादानत्वमिव भञ्जगस्य त्वङ्गं॥ तथा चाकृतिः॥ स्व
तिर्वै सत्यमिति॥ अपि च येऽपि सर्वतो विलक्षणान्निस्वलक्षणान्निवस्तु सत्॥ अपि च तेषा
मपि किमिति बीजजातीयेभ्योऽङ्कुरजातीयान्येव जायन्ते कार्याणि न तु अमेलकजातीयानि॥ न

का. शा.२
३२

हिबीजाङ्कुरोतरस्या वा क्रमेलकस्य वा स्यात वेलक्षण्ये कस्माद्विशेषः ॥ न च बीजांकुरत्वेन सामान्ये
परमाण्वेसतीयेनैतयोर्भिन्नः कार्यकारणभावो भवेत ॥ तस्मात्कालत्वनिकारेव मलकोत्पाद
नाङ्कुरजातीयात तथाविधस्येवांकुरजातीयस्योत्पत्तिनियमश्च स्यादेतन्यथा कार्यहेतुकानु
मानोच्छेदः प्रसंगः ॥ किञ्च सर्वत्र सत्त्वे प्रपंचवतस्तु प्रसतेव समीहा न्यायकालिकायोः कतद्
तिनेह प्रवर्त्यते विसंवादभयात ॥ ३ तस्मीनानामपि नैवेसिद्धिः ॥ भाष्यमस्य सूत्र से ॥ नाभाव
उपलब्धेः ॥ न कदाचिद्वेरलप्यतेमाहलवग्राहि ॥ वास्यार्थवादिन्योविज्ञानमात्रवादिनोस्य गता
प्रेतन्यथाविशेषमाहके प्रांचितिलोति ॥ कायप्रमाता प्रमाणं प्रमेयं प्रमितिरिति हि चत
सृष्वपिविधासुतत्वपरिसमाप्तिरासामन्यतमाभावे पितत्वस्याव्यवस्थानात तस्मात
तेनविज्ञानस्कंधमात्रे तत्वव्यवस्थापयतां चतस्रोपि विधाः प्रेषितव्याः ॥ तथा च न विज्ञान
स्कंधमात्रे तत्वं न स्फुरति संभवः विज्ञानमात्रेण चतस्रो विधाः स्वीकृताहतस्मिन्नपि ज्ञान
वादे उद्धारटैनम्पैरीति ॥ यद्यप्यनुभवान्नान्योनुभाव्योस्यो नुभविता नुभवितानुभवने

वतथापि तद्भारूढेन बुद्धिकल्पितेनांशेन तस्य एव प्रमाणप्रमेयफलव्यवहारः प्रमाताश्चेत्यपि द्रष्टव्यं न
पारमार्थिकमित्यर्थः॥ एवं च न चित्राद्वैतसाधनं नहि ब्रह्मवादिनो नीलाद्याकारो विभिन्नमभ्युपगच्छंति
किंत्वनिर्वचनीयं नीलादीति॥ तथाहि स्वरूपं चित्तानं स्यात्तत्स्वाकारपुर्नः प्रमेयप्रमेयपक्षकोश न प्रमाण
फलं न तस्य कासाने शक्तिः प्रमाणना स्वकादिनोरपि द्वैभाष्यिकमेवांत्तिकयोः फलनिरूपवप्रमाणफ
लव्यवहारो ग्रस्मत इत्याह तत्परिकार्यार्थ इति॥ भिन्नाधिकरणत्वेहि प्रमाणफलयोः कुठारो न स्या
त न हि खदिरस्थे चरे परशौ पलाशे द्वैधीभावो भवति तस्मादेनयोर्नैकाधिकरणमेव कथं तथापि च तद्भा
वतिर्यद्विज्ञानस्यैव प्रमाणफले भवतो न बाह्यानं स्वालद्वलम्बनेऽशाभावः कृत्स्न सद्गाप्रज्ञाते तदेव ज्ञा ११७
नमहानव्याद्यरूतिकल्पितहानलांशं फलं कर्मासिव्यावृत्तिपरिकल्पितात्मज्ञानस्य प्रकाशनं शंपेः
प्रमाणं प्रमेयत्वं स्पष्टस्वमेव॥ एवं सौत्रांतिकमतमपि ज्ञानस्यापि साकारप्यमनीलाकारव्यावृत्त्याक
ल्पितनीलाकारत्वं प्रमाणं कर्मव्यवस्थापनहेतुत्वात्॥ ज्ञानव्यावृत्तिकल्पितं च ज्ञानत्वं फले व्यवस्था
प्यत्वात्॥ तथा चाह॥ नहि वित्तिसत्तैव तद्वेदना युक्ता तस्याः सर्वत्राविशेषात्॥ किंतु साकारूप्यमाविशन्त

३२२ रूपपरत्वत घटयोरितिप्रसङ्गः सर्वकार्याभावउपपत्तेः कथं पुनरवगम्यतइतिसहितविज्ञानालंबनत्वा
भ्रमतो वा सोपि परमाणुसमावलंबं भवति एवं स्थूलनीलाभासं हि ज्ञानं नपरमाणुसमपरमाणवाभा
संनवाप्याभासमनुगोचरं भवितुमर्हतिअतिप्रसंगेनसर्वगोचरतया सर्वसर्वज्ञत्वप्रसंगात् ॥ न
चप्रतिभासधर्मः स्थौल्यमितियुक्तं विकल्पासहत्वात् ॥ किमयं प्रतिभासस्य ज्ञानस्य धर्मउतप्रति
भासमानकालेऽर्थस्य धर्मः यदि प्रथमः कल्पो ज्ञातथा सति स्थौल्यालंबनमेवविज्ञानमभ्युपेतं भव
ति एवं च कः प्रतिकूलो भवत्यनुकूलमाचरति ॥ द्वितीयइति चेत् ॥ तथाहि रूपपरमाणव एव निरंतर
मुत्पन्ना एकविज्ञानोपारोहिणः स्थौल्यं न चात्र कस्यचिद्भ्रांतता नहि ते रूपपरमाणवो नच न नि
रंतरमुत्पन्ना नचैकविज्ञानानुपारोहिणः ॥ तेन माभूत् नीलत्वादिवत्परमाणुधर्मः प्रत्येकं परमाणु
ष्वभावात् ॥ प्रतिभासदशापन्नानां तु तेषां भविष्यति बहुत्वात्तेहि वस्तासूत्रं स्थौल्यं ॥ यथाहुः ॥ ज
हेऽनेकस्यचैकेनाकिंचिद्गृह्यते ॥ सोरतंप्रतिभासस्य तदेकात्म्येन संभवात् ॥ नतद्दर्शनेभ्रां
तं नाना वस्तुग्राहपतः सोरतं रहत्वं नान्तत न च वक्तुं स्तं ग्राह्यभ्रमइति तन्नैरंतर्यावभास

सम्भ्रोतत्वात् गंधरससमर्पपरमाएवंतरिताहितेष्वपरमाणवोनानिरंतरास्तस्मात्तस्मात्तेरेषुर
दृष्टेषुघनत्वेनप्रसयवरेष्वस्थूलप्रत्ययः परमाणुषु तेरेषु भ्रांतिरेवेतिप्रयामः। तस्मात्काल
नापेक्षत्वेपि भ्रांतत्वात् घटादिप्रत्ययस्य पीतरां सर्वादिज्ञानवत्प्रत्यक्षता परमाणुगोचरत्वाभ्यु
पगमे तदिदमुक्तं नतावत्परमाणवः स्तंभादिप्रत्ययपरिच्छेद्या भवितुमर्हंतीति नापि तत्का
र्यतामंतं भाद्यपि ज्ञवयविनः तेषामभेदे परमाणुभ्यः परमाणव एव तत्र चोक्तं दूषणं। भेदे तु
गवाश्वस्येवात्यंतवैलक्षण्यमिति न तादात्म्यसमवायश्चानिरूपणत इति। एवं भेदाभेदवि
कल्पेन जातिगुणकर्मादीनपि प्रत्याचक्षीत तस्माद्घटस्मृतिभ्रांतो तस्य सर्वस्य विचारा
सहत्वात् अप्रतिभासमानस्य दृष्टेव प्रमाणाभावात् न बाह्यालंबनाः प्रत्यया इति। अ
पि च न तावदिंद्रियजानितमर्थं प्रत्यक्षयितुमर्हति। न हि चक्षुरिंद्रियमर्थं विषयी
कृत्य ज्ञानमुत्पादयेव विज्ञानमपरं विज्ञानं ज्ञानमितुमर्हति। तत्रापि समानत्वात् न योगस्य ज्ञा
नवस्यापि संगता। न चाधाराधारभावयुलक्षणं फलमाध्यातुमुत्सहते। अतीतानागतेषु

वा॰ २।२। रतेभवात॥ न चेक्ति तेभवो प्रत्युत्पन्नो धर्मी धर्मिण्यास्य प्रत्युत्पन्न इति॥ तस्माद्भूलन[illegible] प्रत्यव
तैवार्थप्रत्यक्षतामुपेयात ज्ञानाकारैस्मदाज्ञानतो भेदाभावात अपमर्थभेदं व्यवस्थापयेदिति
३४ एतद्भेदं व्यवस्थापनायाकारभेदोस्य वचितव्यः। तदुक्तं॥ न हि वित्तिसत्तैव तद्वेदना युक्ता तस्याः
सर्वत्राविशेषात्तां तु सारूप्यमाविशत्सरूपयन्तत् घटयेदिति एवं ज्ञानमाकारो नुमेयो
सन्नेव हि ज्ञानस्य नापि सदृशेकिं च न प्रमाणमसत्तो ऽपोह ज्ञापि चानुभवमात्रेण साधारण
त्वेनोदानस्येति ज्ञापि च सहोपलंभनियमादिति। पक्षेन नियतसहोपलंभनेन तत्ता
भिघातेयपेन सा चेद्रूपमसो हि नीय चेद्रूमानियतसहोपलंभस्यापि ज्ञानैति व्यापकविरु ने
द्धोपलब्धिः॥ निबध्यो हि भेदः सहोपलंभानियमेन व्याहो यथा भेदतावस्थि नो नाविषयस
होपलंभे तो कारणविरद्धाप्रिधाने ज्ञान्यतरस्यैक स्योपलब्धेः सोपमिहि भेदव्यापकानि
यमविरुद्धो नियमः उपलभ्यमानस्तद्व्याप्यं भेदं निवर्तयतीति॥ तदुक्तं॥ सहोपलंभनियमा
दभेदो नीलतद्धियोः॥ भेदश्च भ्रांतिविज्ञानैर्दृश्येतेंदाविवाद्वय इति स्वप्नादिवज्ज्ञेदेदृश्यं चे
३४

यः प्रत्ययः समनंतरो वा स्यान्नालंबनो यथा स्वसमनंतरादिप्रत्ययः तथा चैष विकाराश्रितः प्रत्ययः
इति स्वभावहेतुर्वा स्यालंबनता हि प्रत्ययत्वमात्रानुवेधिनी दृष्टे तेषां दिशा कालमात्रानुवेधि
नीति तन्मात्रानुवेधिनि तिरालंबनत्वमापे भवति प्रत्ययत्वे स्वभावहेतुः अंत्रांतरे नोक्तोऽपि
तः चौरः यदि कथं तु नरसनादिवादिषे नीलमिदं पीतमिदं मित्यादिप्रत्ययनैचित्र्यमुपपद्यते न
हि मने येयस्मिन्नसत्यपि कादाचित्कास्ते सर्वे तदातिरिक्तहेतुसापेक्षाः यथाऽविवद्धत्पत्तिग
मिष्यति मयि नवनगमनप्रतिभासाः प्रत्ययास्तु तत्समनंतरसापेक्षाः तथा च विका
दाश्रिताः मत्यया लयादि वा नके तानेष उपि प्रवृत्तिप्रत्यया इति स्वभावहेतुः पश्चा
मावालयविज्ञानकेतनातिरिक्तः कादाचित्कप्रवृत्तिज्ञानभेदहेतुः सवासोपद इति वास
नापरिपाकप्रत्ययकादाचित्कत्वात् कदाचिदुत्पत्त्या इति चेन्नालंबनतात् पतिनाना विशेषः
मालयविज्ञानानो तत्प्रवृत्तिविज्ञानजननशक्ति वासनात्मस्याश्च स्वकार्योपजनने प्रतिन्या
भिमुख्ये परिपाकः तस्य च प्रत्ययः स्वसंतानवर्ती पूर्वक्षणः सत्ता नोत रापेक्षानभ्युपग

वा॰मे॰ २५

मात्॥ तथा च सर्वेषामालयविज्ञानसंतानपातिताः प्रतिपादितेन वे भवेयुः नवानस्मिद्ध्यालय
संतानोत्पातित्वाविशेषात्॥ हेतुभेदात्स्थितिभेदेनास्य च कादाचित्कत्वात् कार्यकादाचित्कत्व
मिति चेत् न न्वेवमेकस्यैव नीलज्ञानोपजननसामर्थ्यं नत्वन्यस्याधिकसामर्थ्यं चेति हेतुत्वान्तरस्य
तत्ज्ञस्यात् सत्वेनाकस्य हेतुभेदात् स्वसामर्थ्यभेद इत्यालयसंतानवर्त्तिनः सर्वे समर्था
इति समर्थहेतुसन्निधावेकार्थदेशानुपपत्तेः॥ स्वसंतानमात्राधीनत्वे तु विषयस्य कादाचि
त्कत्वस्य विरुद्धं सदातनत्वे तस्योपलब्धिकादाचित्कत्वनिवर्त्तमाने तैरनायेदाले व्याव
तिष्ठत इति प्रतिबंधसिद्धिः॥ न च तानसंतानोत्तरनिबंधनत्वं सर्वत्राभिधीयते प्रवृत्ति
विज्ञानानां विज्ञानवादिभिः रपि तु कस्यचिदेव विच्छिन्नागमनवचनप्रतिभास
स्य प्रवृत्तिविज्ञानस्य अपि च सन्तानान्तरसंतानोत्तरानिमित्तत्वे तस्यापि सदा सन्नि
धानात्कादाचित्कत्वं न स्यात्॥ न हि सन्तानान्तरसंतानस्य देशतः कालतो वा निप्रकर्षः
संभवो विज्ञानवादिभिः ज्ञानादिति तिरस्कारे स्यानभ्युपगमात् सर्वत्र चाविज्ञानानामदेशा

प्रवृत्ति

त्मकत्वात्संस्कारस्यादिमत्वप्रसंगेनानादिर्वासनाप्रादुर्भावानुपपद्यमानेन कालेनापि विप्रकर्षसं
भवः॥ तस्मादस्ति बाह्योर्थः प्रत्ययवैचित्र्यानुपपत्तेरन्यथानुमानिको बाह्योर्थ इति सौत्रान्तिकाः
प्रतिपेदिरे नान्तरिकाः केचित्॥ वासनावैचित्र्यादित्याह विज्ञानवादी॥ इदमत्राकूतं॥ स्वसंता
नमात्रप्रभवत्वेपि प्रत्ययकादाचित्कत्वोपपत्तेः सदृशविपक्षव्यावृत्तिकत्वेन हेतुरनैकां
तिकः॥ तथाहि बाह्यनिमित्तत्वेपि कदाचिन्नीलसंवेदनं कदाचित्पीतसंवेदनं बाह्यनीलपी सं
तसंनिधानासंनिधानाभ्यामिति चेत्॥ अपपीतसंनिधानेपि किमिति नीलज्ञानं न भवति
पीतज्ञानं वा भवति॥ तत्र तस्य सामर्थ्यात् अन्यसामर्थ्याद्वेतरस्मिन्निति चेत् कुतः पुनरयं सा
मर्थ्यासामर्थ्यभेदहेतुभेदादिति चेत्॥ एवं तर्हि ज्ञानानामपि स्वकारणभेदनिबंधनः शक्ति
भेदो भविष्यति॥ संतानिनो हि ज्ञानाः कार्यभेदहेतवः ते च सति कार्यं भिद्यंते॥ न च संतानो ना
मकश्चिदेक उत्पादकः ज्ञानानां यद्भेदात् ज्ञानानामभेदोस्तु॥ नन्वेतेन ज्ञानभेदाभेदाभ्यां प्रा
क्तिभेदाभेदौ॥ भिन्नानामपि ज्ञानानामेकसामर्थ्योपलक्षणे चैक एव ज्ञानो नीलज्ञानजन नप

वा॰ १२।२
३६

न समर्थ इति न भयो नीलज्ञानानि जायेरन्। न तत्समर्थस्यातीतत्वात् तत्क्षणेन तत्क्षणाच्चासाम
र्थ्यात् तस्मात् क्षणभेदेपि न सामर्थ्यभेदः॥ संतानभेदे तु सामर्थ्यं भिद्यत इति॥ तन्न यदि हि भिन्ना
नां संतानानां नैकं सामर्थ्यं हन्त तर्हि नीलसंतानानामपि मिथो भिन्नानामेकमस्ति नीला
काराधानसामर्थ्यमिति कल्पितेनापि नीलसंतानांतरस्य न नीलज्ञानमुपजायेत तस्मात्सं
तानांतराणामिव क्षणांतराणामपि स्वकारणभेदाधीनोपजननानां केषांचिदेव सामर्थ्यभेदः
केषांचिन्नेति वक्तव्यं। तथा चैकालयविज्ञानसंतानपातिषु कस्यचिदेव ज्ञानक्षणस्य सतादृशः
सामर्थ्यातिशयो वासनापरनामा स्वप्रत्ययात् आदितो यतो नीलाकारं प्रवृत्तिविज्ञानं जायते
न पीताकारं कस्यचित्तु सतादृशो यतः पीताकारं ज्ञानं न नीलाकारमिति वासनावैचित्र्यादेवस
मप्रत्ययासादितात् ज्ञानवैचित्र्यसिद्धेर्न तदतिरिक्तार्थसद्भावे किंचनास्ति प्रमाणमिति प
रमार्थः॥ आलयविज्ञानसंतानपतितस्यैवासंविदितज्ञानवासनातो हेतुवैचित्र्यात्तु नीलाद्यनु
भववैचित्र्यं एवं नीलाद्यनुभववैचित्र्याच्च वासनावैचित्र्यमित्यनादितानयोर्विज्ञानवासन २

योः तस्मात्परस्परात्र्यपदेशस्संभवो बीजांकुरसंतानवदिति॥ अन्वयव्यतिरेकाभ्यामपि वासना
वैचित्र्यस्यैव ज्ञानवैचित्र्यहेतुता नार्थवैचित्र्यस्येत्याह अपि चान्वयव्यतिरेकाभ्यामिति॥ ए
वं प्राप्ते ब्रूमः॥ नाभाव उपलब्धेरिति॥ न खल्वभावो बाह्यस्यार्थस्याध्यवसातुं शक्यते कस्मादुपलंभा
भावाद्ध्यवसीयते तत्तु उपलंभे तस्य बाह्यविषयताभावाद्वा सत्त्वाच्चिबाह्यविषयत्वव्या
पिबाधकप्रमाणसद्भावाद्वा न तावत्सर्वथोपलंभाभाव इति प्रथमं दर्शयन्नाह कस्मादुपलब्धेरि
ति॥ न हि स्फुरतरे सर्वज्ञानीने उपलंभे सति तदभावः शक्यो वक्तुमित्यर्थः॥ द्वितीयं पदमा
लंबते॥ ननु नाहमेवं ब्रवीमीति॥ निराकरोति नाहमेवं ब्रवीमीति उपलब्धिग्राहिणस्साक्षि
णोपलब्धिर्दृश्यमाणा बाह्यविषयत्वेनैव गृह्यते नोपलब्धिमात्रमित्यर्थः॥ अतस्त्रेति वदन्
माणोपपत्तिपरामर्शः॥ तृतीयं पदमालंबते ननु बाह्यार्थस्यासंभवादिति॥ निराकरो
ति नायं साधुरध्यवसाय इति॥ इदमत्राकूतं यदपदाद्यो विहि स्फलाभासं तेन तु परमसत्
दभाः॥ तत्रैके नानादिगेकदेशव्यापित्वेन लक्षणस्यास्य प्रतिबध्य पिंडानाकारत्वेनावरणो नाव

ना॰रा॰रौ॰
२१

रणत्वहानेन विरुद्धधर्म्मसंसर्गेण युज्यते ज्ञानोपाधेरनारूढत्वादेव तथापि तद्देशत्वातद्देशत्वकं
पाकंपत्वरक्तत्वारक्तत्वलक्षणो विरुद्धधर्मसंसर्गैरस्य नानात्वप्रसज्यमाने ज्ञानाकारत्वेपि न श
क्येन निवारयितुं व्यतिरेकाव्यतिरेकरं निविकल्पेकत्वपरमाणोरेशवत्वे चोपपादितानि वैशे
षिकपरीक्षायां॥ तस्माद्रूपस्यापि बाह्यज्ञानेपि स्थौल्यसंभवो॥ न च तावत्परमाण्वाभासमेकं ज्ञान
मेतस्य नानात्मत्वानुपपत्तेः आकाराणां च ज्ञानेन तादात्म्यादेकत्वप्रसंगात्॥ न चैवावतस्याकारो
नावेत्येव तानानितावतो ज्ञानानामिपोवार्त्तानाभिइतनपा स्थौल्यानुभवाभावप्रसंगात्॥ न च
तत्प्रत्येकं भावी कमस्तज्ञानाकारस्य कल्पनात्मकः स्थौल्यविकल्पो विडंभनइति संप्रते॥
तस्यापि साकारतया स्थौल्यायोगात्॥ तथा हि धर्मकीर्त्तिः॥ तस्मान्नार्थे न विज्ञाने स्थूलाभासस
दात्मनः॥ एकत्रप्रतिषिद्धत्वाद्बहुष्वपि न संभव इति॥ तस्माद्ब्रवतापि ज्ञानाकारे स्थौल्ये सम
र्थ्यमाने न प्रमाणप्रवृत्त्यप्रवृत्तिपर्वकौ संभावासंभवावास्थेयौ तथा चेदं तास्य समदाये
ज्ञानाद्भिन्नेबाह्यमपह्नोतुइतियज्ज्ञानस्य प्रत्यक्षत्वव्यवस्थापे विषयसारूप्यमाश्रित्य तं न

तेन निषेधोपि हेतुरशक्यः॥ असत्यर्थे तस्मात्स्वरूपस्य तद्भवस्याद्यस्यानुपपत्तेरित्याह न चेत्थं तस्य वि-
षयमात्रस्याहेति॥ यच्च सहोपलंभनियमादभेदः सोपि विवेकेन न सहते॥ यदि ह्यानार्थयोः साहित्ये-
नोपलंभः तदा विवक्षा हेतुर्नाभेदं साधयितुमर्हति। साहित्यस्य तद्विरुद्धभेदव्याप्तत्वात्॥ अ-
भेदे तदनुपपत्तेः॥ अथैकोपलंभनियमः न एकत्वस्याभावात् सहशब्दः। अपि च किमे-
कोपलंभकालेनोपलंभः अथ हेतुकोपलंभो ज्ञानार्थयोर्न तावदेककालमेकलेनोपलंभइतिप्राह
वहिरुपलब्धेरविविषयस्य॥ अथैकोपलंभनियमस्तत्राह असत्यपि सहोपलंभनियमो विप्र
त्यय विषययोरुपायोपेयभावहेतुको नाभेदहेतुरित्यवगंतव्यः॥ यथा हि सर्वेषां हृदं प्र
मा धूमेन तु वह्निबुद्धिर्यो नियमेन तमनु जैरुपलभ्यते न चैतावता घटादिरूपं प्रमाणमात्मनः
वृत्तित्वेन प्रमेयोपायत्वान्नियमाच्च सिद्धान्ति ज्ञानमन्यादिकानुभवोपायत्वात् स्वीकृत्वे कोपलंभ
नियमइति॥ अपि च यत्रैकविज्ञानेनो चरौ घटपटौ तत्रार्थभेदे विज्ञानाभेदे चाध्यवसायति
प्रतिपत्ताविनेन्नैतदैकात्म्यकाल्यलंदइत्याह अपि च घटज्ञानं पटज्ञानमिति॥ तथा भेदेपि

ना॰ २१२१ नितानप्मे ६६र्शे नाक्तविलानात्मकत्वमर्थस्येत्याहतप्पाचपटदृशीतेपटस्मरणामिति॥ अपिच
३८ मकूपसात्रयर्पवासितेज्ञानेज्ञानांतरवाजौनमितमितियथोमेदरेकहूनगृहीतेइतिमेदोपि
तङ्कोनगृहीतएवंज्ञानकस्तन्मानात्मकत्वादयोप्यनेकप्रतिज्ञाहेतुदृष्टांतज्ञानभेदसाध्याः
एवंस्वमसाधारणमन्यतोव्यावृत्तेलक्षणंवस्यतदपिपक्षावर्त्ततेयतश्चव्यावर्त्ततेतदने
कज्ञानसाध्यंएवंसामान्यलक्षणमपिविधिरूपमन्योपोहरूपंवाऽनेकज्ञानगम्यं॥ एवं
वास्यवासकभावोनेकज्ञानसाध्यएवसविवेपाश्लेववदेनयतस्तदसद्धर्मःलयथानी
लमितिसद्धर्मोनरविषाणमीश्वरइत्यसद्धर्मः॥ अनर्त्तमितिसदसद्धर्मः शाब्दंहिज्ञान
विषाणमसमर्त्तवस्तुशाब्दंचविज्ञानमसमर्त्तवस्तुयथोक्तेमनादिवासनोद्भूतविकल्पपरि
निष्ठितः॥ कदापिस्त्रिविधोधर्मोभावाभावोभयात्मकइति॥ एवमेकप्रतिज्ञावयोमुच्यते
यतश्चयेनमुच्यतेतदनेकज्ञानसाध्या एवंविप्रतिपन्नोप्रतिपादयितुंप्रतिरेतियत्प्रति
पादयतियेनप्रतिपादयतियश्चउरथःप्रतिपाद्यतेयस्मैप्रतिपादयतितदनेकज्ञानसा

ध्येतिश्चेत्तत्रैकस्मिन्ननेकार्थज्ञानप्रतिसंधातरि नोपपद्यते तत्सर्वविज्ञानस्य स्वांशालंबन
त्वेऽनुपपन्नमित्याह अपि च धर्मिज्ञानस्य पूर्वोत्तरकालयोरिति ॥ अपि च भेदाश्रयं कर्मफ
लभावो नाश्रितोऽज्ञाने भवितुमर्हति ॥ नो खलु छिदा छिद्यते किं तु दारु नापि पाकः पच्यते अपि
तु तंडुलाः तद्वदिहापि न ज्ञानेनाश्रयेण ज्ञेयमात्मा निवृत्तिविरोधात् अपि तु तद्व्यतिरिक्तो घटः पा
कपाइवत्तंडुलाः पाकातिरिक्ता इति भिन्नस्य च नापवेक्ष्य माहवि चान्यादृग्ज्ञानमित्यभ्युप
गच्छतेति चोदयति नन्वेवं विज्ञानस्य स्वरूपातिरिक्तस्याभावात् इति ॥ अपमर्षः ॥ स्वरूपाति
रिक्तमर्थं चोद्धि ज्ञानं न गृह्णाति तत्तत्स्वप्रत्यक्षं सन्नार्थप्रत्यक्षं भवितुमर्हति न हि च दृष्टे विव
र्तिलीन मर्थिकं च नातिशयमाधत्ते येनार्थमप्रत्यक्षं सत्प्रत्यक्षयेत् किं तु तत्प्रत्य
क्षतैवार्थप्रत्यक्षतेत्याह ॥ अप्रत्यक्षोपलंभस्य नार्थदृष्टिः प्रसिध्यतीति तज्ज्ञा
नेनानंतरेण प्रतीयेत तत्प्रतीतं नार्थविषयं ज्ञानमपरोक्षयितुमर्हति ॥ एवं तत्तादित्यनव
स्थातस्मादनवस्थायावि भूपतावरं स्वात्मनि वृत्तिविरोधस्थिताग्न्यपि च यथा प्रदीपोऽन प्रदी

प्रा॰ १।५।१ पांतरमपेक्षेत तदेवं ज्ञानमपि न ज्ञानांतरमपेक्षते किंतु सहैव तेन मत्वादिति तदेतत्परिहरति नद्वभय
मप्यसत् विज्ञानत्वं हि लग्नमात्रमेव विज्ञानमाश्रित्य हि ग्रहणाकांक्षानुत्पादेनवस्थाशं
२८ कानुपपत्तेः॥ अयमर्थः सत्यमप्रत्यक्षोपलंभस्य नार्थदृष्टिः प्रसिध्यति। न तूपलं
भं प्रति तस्य स्वसंवेद्यत्वादुपलंभांतरं प्रार्थनीयं॥ अपि तु तस्मिन्निंद्रियार्थसंनिकर्षादि
तः करणविकारभेदरूपत्वान्मात्रमेव प्रमातुरर्थस्योपलंभस्य प्रकाशो भवतः॥ अर्थो हि
निलीनस्वभावः प्रमातारं प्रति स्वप्रकाशत्वाभावात् करणविकारभेदमनुभवमपेक्षते
अनुभवस्तु जडोपि स्वच्छतया चैतन्यप्रतिबिंबग्रहणाय नानुभवांतरमपेक्षते येना
नवस्था भवेत्॥ न ह्यनुभवो नुभव उत्पन्नस्य न प्रमातुः प्रत्यक्षो भव
ति यथा नीलादि ज्ञानस्य यथा छेत्ता छिदया काष्ठं वृक्षादि व्याप्नोति न तु छिदिं छिदंतरेण
नापि छिदेव छेत्री किंतु स्वत एव देवदत्तादिः यथा वा पक्ता पाकक्रियया पाक्यं व्याप्नोति न तु पाकं
पाकांतरेण नापि पाक एव पक्ता किंतु स्वत एव देवदत्तादिः एवं प्रमाता नमेयं नीलादिः

य

प्रमेयापेक्षया ज्ञेयेति॥ प्रमात्रेतरापेक्षया मानत्वस्याभावेऽतरात्तस्मात्स्वरूपेण ते विज्ञानग्रहणमात्रए
व विज्ञानसाक्षिणः प्रमातुः कूटस्थनित्यचैतन्यस्य ग्रहणं कौशलानुत्पादादिति॥ यदुक्तं सम्मत्वा
वेभास्वावभासकभावानुपपत्तेरिति तत्राह साक्षिप्रत्यक्षेऽस्मत्स्वभावं वेद्यमादुपलब्धुपलम्भका
कोपपत्तेः॥ मामेतत्ज्ञानयोः स्वामिन ग्राह्यग्राहकभावो ह्यज्ञानयोस्तु वेद्यस्यादुपपद्यत एवं ग्रा
ह्यत्वेन ज्ञानस्य ग्राहकक्रियाजनितफलशालितया यथा वाद्येस्यापीस्य फले फलांतरानुत्पत्तेरपी
षाहुः॥ न संविद्विषये फले फलत्वादिति॥ अपितु प्रमातारं प्रति स्वतः सिद्धप्रकटतयाऽग्राह्योप्य
पि॥ प्रमातारं प्रति सत्यां संविदि पिप्रकटा यथा हरन्ते॥ नास्याः कर्मभावो विद्यत इति॥ स्यादेत
त्॥ पत्नप्रकाशनेतरन्येन प्रकाश्यते॥ यथा ज्ञानार्थी तथा च साक्षीति नास्ति प्रत्ययसाक्षिणो वैय
ल र्थ्यमित्यत आह स्वयंप्रकाशस्य च साक्षिणोऽप्रत्यक्षेऽपत्वात्॥ तथा च स्वसाक्षिणः सदात्मं
दिग्धाविपरीतस्यान्निसाक्षात्कारतानागन्तुकप्रकाशत्वे घटेनेतपाहि प्रमाता संदिग्धो नापि असं
दिग्धो विपर्यस्तश्च विपरीतः परोक्ष इत्यनुमित इत्यादि पपत्तेः स्वात्मन्यनुभाविकः प्राग्

मन्मात्रस्य नचैतदन्याधीनसंवेदनत्वेघटते। अनवस्थाप्रसंगश्चोक्तः तस्मात्स्वयंसिद्धं
तातस्यापि छताप्यप्रत्याख्येया प्रमाणमार्गीयातत्वादिति॥ किंचोत्तेनैव क्रमेण ज्ञानस्य स्वय
मवगतत्वाभावात् प्रमातुरनभ्युपगमे चघटादिपदार्थज्ञानमवभासकं तदनिरपेक्षं स्वय
मेव प्रपतइति प्रवर्ताप्रमाणगम्यं विज्ञानमनवगतं तत्कमित्युक्तं स्यात् शिलाघनमध्यस्थ
प्रदीपसहस्रप्रथनवदनवगतस्वेलस्य चिदचिनप्रकाशनेकृतमवगमेन स्वयंप्रकाशेन
तिचविज्ञानमेवावगतत्रितिमत्वातः शोकतेवाढमेवमनुभवरूपत्वादिति। नफलस्य चार्थत्व
कर्मत्वेचास्तीति प्रदीपवत्वाद्वैतरमेषितव्य। तथाचनमिस्वसाधनमितिविपरिहृतम्। ताव
स्यावगतत्वरिति ननु साक्षिस्यात्स्वस्वरूपमिमतमेवविज्ञानेतथाचनाप्तिरेवविप्रति
पत्तिर्नार्थइति शंकतेसाक्षिणोवगतः स्वयंसिद्धतामुपक्षिपता अभिप्रेयता स्वयंप्रपतेति
नमितोषएवेति। निराकरोति नेति। भवताहि विज्ञातस्यात्वत्पादयोध्यस्याभ्युपेतत्वा
पाकस्यफलं तथानावगतत्वेकर्तृफलभावस्यवक्तव्यविरोधात्॥ किंतु प्रदीपादितुल्यतेत्यर्थः॥

वैधर्म्याच्च न स्वप्नादिवत्॥ बाधाबाधौ वैधर्म्यं स्वप्नप्रत्ययो बाध्यते जाग्रत्प्रत्ययस्त्वबाधित इत्यपि
चावश्यं जाग्रत्प्रत्ययस्याबाधितत्वमास्थेयं तेन हि स्वप्नप्रत्ययो बाध्यते मिथ्यात्वं वगम्यते जाग्रत्प्रत्य
यस्य तु बाध्यत्वे स्वप्नप्रत्ययस्यासौ न बाधको भवेत् न हि बाध्यमेव बाधकं भवितुमर्हति॥ तथा च
न स्वप्नप्रत्ययो मिथ्येति साध्यविकलो दृष्टान्तः स्यात् स्वप्नवदिति तस्माद् बाधाबाधाभ्यां वैधर्म्या
त् स्वप्नप्रत्ययदृष्टान्तेन जाग्रत्प्रत्ययस्य शक्यं निकालेव नत्वमध्यवसातुं निर्ग्लानमिति
कारणदोषजन्मिथ्याज्ञानं मिथ्यात्वापवैधर्म्यात् तस्मादाह अपि च स्मृतिरेषेति संस्कारमात्रजं हि विज्ञा
नं स्मृतिः प्रत्युत्पन्नेन्द्रियलिङ्गशब्दसादृश्यान्यथानुपपत्त्युपमानयोग्यप्रमाणानुपलब्धि
जा सामग्रीप्रभवं तु ज्ञानमुपलब्धिः तदिह निद्राणस्य सामग्र्यां तद्विरहात् संस्कारः परिशि
ष्यते। तेन संस्कारजन्यत्वात् स्मृतिः साऽपि च निद्रादोषाद्विपरीता कर्वेर्मा मानमपि पित्रादिवर्त र्ते
मानतयाभासयति॥ तेन स्मृतेरेव तावदुपलब्धेः विशेषः॥ तस्माच्च स्मृतेर्वैपरीत्यमित्यतोऽस
हं तस्मिन्नित्यर्थः॥ अपि च स्वतःप्रामाण्येऽस्ति हि जाग्रत्प्रत्ययानां बाधाभावमनुभवसिद्धं नानु

पी० २।२
४१

मानेनान्वयपितुरशक्यमनुभवविरोधेन तदनुत्पाददवाधितविषयताप्यनुमानेनोत्पादसामग्रीन
वकारणाभावे कार्यमुदेतुमर्हतीत्याशयवानाह अपि चानुभवविरोधप्रसंगादिति॥ न भावोनु
पलब्धेः॥ यथालोकदर्शने चान्वयव्यतिरेकाववनुश्रियमाणावर्ष (कोपलब्धे भवितोनापीनेय
ताधीवासनाधीवासनाया अप्युपलब्ध्यधीनत्वदर्शनादित्यर्थः॥ अपि चाश्रयाभावादपि
न लौकिकी वासनोपपद्यते। न च क्षणिकमालयविज्ञानं वासनाधारो भवितुमर्हति क्षणोर्ध्वग
पदुत्पद्यमानयोः सव्यदक्षिणशृंगवदाधाराधेयभावाभावात्। प्रागुत्पन्नस्य चाधेयोत्पा
दसमये सतः क्षणिकत्वव्याघात इत्याशयवानाह अपि च वासनानामिति॥ एवमतिरोहि
तार्थं॥ क्षणिकत्वाच्चेति॥ स्यादेतत् घटादिसाकारं विज्ञानेन संभवति नापि अर्थः स्थूलस्तस्माद्विकल्पे
नासंभवी है तैव सर्पज्ञाने सतेनेतावद्विचारं न सहते तेनोप्यसत्वेनासतोभासनायोगात्
नोभयत्वेनाविरोधात् सदसतोरेकतानुपपत्तेनीप्यनुभयत्वेनैकान्तिपेक्ष्य स्येतरविधाने
नोतरीयकत्वात्। तस्माद्विचारासहत्वमेवास्य तत्त्ववस्तुनो यथाहुः॥ इदं वस्तुबलायातं यद्वं

तिविषयत्वित ॥ यथा यथार्थोऽस्ति त्वं ते विविच्यते तथा तथेति ॥ न कश्चिदपि विषयत्वेव्यवतिष्ठतइत्यर्थः ॥ तदेत
न्निराचिकीर्षुराह सत्यत्वादिपक्षे स्तु सर्वप्रमाणविप्रतिषिद्धइति तन्निराकरणप्रकारः ॥ त्रिय
ते लौकिकानि हि प्रमाणानि सदसत्त्वगोचराणि तैः खलु सत्सदिति गृह्यमाणं यथाभूतम
विपरीतं तत्त्वं व्यवस्थाप्यते असच्चासदिति गृह्यमाणं यथाभूतमविपरीतं तत्त्वं व्यवस्थाप्य
ते सदसतोश्च विचारासहत्वे व्यवस्थापयता सर्वप्रमाणविप्रतिषिद्धं व्यवस्थापितं भवति
तथा च सर्वप्रमाणविप्रतिषेधान्नैव व्यवस्थोपपद्यते ॥ यद्युच्येत तात्त्विकं नाम प्रमाणं
नो प्रमाणं मेने नाविचारेण व्युदस्यते न सांव्यावहारिकं । तथा च भिन्नविषयत्वान्न सर्वप्रमाणे
विप्रतिषेध इत्यत आह न खल्वयं सर्वप्रमाणप्रसिद्धो लोकव्यवहारो न्यत्र तत्त्वमनधिगम्य
शक्यते प्रवर्तयितुं ॥ प्रमाणानि हि स्वगोचरे प्रवर्तमानानि तत्त्वमिदमित्येवं प्रवर्तन्ते अतात्त्वि
कत्वे तु तद्विचारस्यान्यता वा प्रकारेण गंतव्यं न पुनः सांव्यवहारिकत्वं प्रमाणं स्वयं तात्त्वि
कमित्येवं प्रवर्तन्ते तात्पर्यं तातात्त्विकत्वमेवातद्विचारविपरीततत्त्वोपदर्शनेन दर्श्यते ॥ यथा

वा॰ ररा
४२

शुक्तिकेयं न रजतं मरीचयो न तोयमेकश्चन्द्रो न द्वौ चन्द्रावित्यादिवदिहापि समस्तप्रमाणगोचरवि
परीततत्त्वान्तरव्यवस्थापनेनातात्त्विकत्वं प्रमाणानां बाध्यत्वेन दर्शनीयं न त्वव्यवस्थापितत
त्त्वान्तरेण प्रमाणानि सकलानि बाधितुं विचारासहत्वेन तत्त्वान्तरे व्यवस्थापयद्बाधकमतात्त्वि
कत्वं प्रमाणानां दर्शयतीति चेत्किं पुनरिदं विचारासहत्वं यत्त्वयाभिमतं ॥ किं तद्वस्तुप
रमार्थतः सदादीनामन्यतमत्वेन वा विचारे न सहते सोऽपि विचारासहत्वं नाम निस्तत्त्व
मेव तत्र परमार्थतः सदादीनामन्यतमत्वं विचारे न सहत इति विप्रतिषिद्धं न सहते चेन्न
सदादीनामन्यतमत्वं ॥ अन्यतमत्वेऽपि न विचारं सहते अपि निस्तत्त्वे चेत्कथमन्यत
मत्वेन व्यवस्थाप्यरूपमेवं ननु न च निरस्तत्वे तत्त्वभावानां तदनतिरिक्ततत्त्वाभावः
स्यात्सोऽपि च विचारे न सहत इत्युक्तं भवद्भिः । अपि चारोपितनिषेधनीयस्यारोपस्य
तत्त्वाधिष्ठानोद्देशपूर्वः शुक्तिकादिषु रजतादेर्दृष्टो चेत्किंचिदस्ति तत्त्वं कस्य कारणमारोपः ॥
तस्मान्निष्प्रपञ्चे परमार्थसद्रूपे निर्वाच्यप्रपञ्चात्मनारोप्यते तत्र तत्त्वव्यवस्थाप्यातात्त्वि आरोपनिषेधो निषेत:॥

कत्वेन स्तो व्यावहारिकत्वे प्रमाणत्वं नाबाधकेनोपपाद्यत इति युक्तमुत्पश्यामः ॥ सर्वथान्यथानुपपत्तेश्च ॥
यि भवते किं बहुनोक्तेन यथा यथायं यतोऽपि तस्माये वेनाशि व समय इति गंथ त स्मा वत्यस्य नाति
ष नास्ति हेयोपहमिस्ताध्यसाधु पदप्रयोगेऽपि तस्य नेत्रा त्व्य मभ्युपेत्याल्पविस्तानं समस्त
वासनाधार मभ्युपगच्छन्तो दूरमात्मानमभ्युपेति ॥ एवं दोषिणतमभ्युपेत्य उत्पादहा तथा
गतानामनुत्पादहास्यि तेवैयाधर्माणां धर्मताधर्मस्थितिते तिनि त्यतामुपेतीत्यादिव हि
नै तव्यमिति ॥ नैवास्मिन्नसंभवात् ॥ निरस्तो मुक्तवछून्नो मूगतानां समयोऽविवसमो
नो समयइदानीं निरस्य तेतत्समयमाह संक्षेपविस्तराभ्यां समवेषोपदर्पी: समस्तमाइ
स्तितत्र संक्षेपमाह संक्षेपतस्तु द्वे वपदर्पौ शुति ॥ बोध्यात्मको जीवो जडरूपरतुजीव इति
यथायोगं तयो जीवाजीवयोरिमम परं प्रपंचमोच्य तेन माह पंचास्तिकायानामेति ॥ सर्वे
षामप्येषां अवांतरभेदानिति जीवास्तिकायस्त्रिधा बद्धो मुक्तो नित्यसिद्धश्चेति ३ ॥ उक्ता
स्तिकायः षोढा पृथिव्यादीनि चत्वारि भूतानि स्थावरं जंगमं चेति ॥ धर्मास्तिकायः सप्त स

वा॰ १२।२। नुमेयोऽधर्मास्तिकायः स्थित्यनुमेयः आकाशास्तिकायो द्विधा लोकाकाशोऽलोकाकाश
श्चेति तत्रोपर्युपरि स्थितानां लोकानामंतर्वर्ती लोकाकाशस्तेषामुपरि मोक्षस्थानमलोका
५२ काशस्तत्र हि न लोका संतीति तदेवं जीवाजीवपदार्थौ पंचधा प्रपंचितौ ॥ आश्रवसंवरनिर्ज
रास्त्रयः पदार्थाः प्रवृत्तिलक्षणाः प्रपंच्यंते द्विधा प्रवृत्तिः सम्यङ् मिथ्या च तत्र मिथ्याप्रवृत्ति
राश्रवः सम्यक्प्रवृत्तिस्तु संवरनिर्जरे आश्रवयति पुरुषं विषयेष्विंद्रियप्रवृत्तिरा
श्रवः ॥ इंद्रियद्वारा हि पौरुषं ज्योतिर्विषयानास्पदरा(?) द्रूपादिज्ञानरूपेण परिणमत
इति ॥ अन्ये तु कर्माण्याश्रवमाहुः तानि हि कर्तारमभिव्याप्याश्रवंतीति कर्तारमनुगच्छंती
त्याश्रवः स एव मिथ्याप्रवृत्तिरनर्थहेतुत्वात् ॥ संवरनिर्जरे तु सम्यक्प्रवृत्ती तत्र श
मदमादिरूपा प्रवृत्तिः संवरः स ह्याश्रवः स्रोतसो द्वारं संवृणोतीति संवर उच्यते निर्ज
रस्त्वनादिकालप्रवृत्तिकषायकलुषपुण्यपुण्यप्रहाणहेतुः तप्तशिलारोहणादिः स हि
निःशेषं पुण्यापुण्यं सुखदुःखोपभोगेन जरयतीति निर्जरः ॥ बंधोऽप्यष्टविधं कर्म तत्र घाति
९

कर्मैतैः चतुर्विधं॥ तद्यथा ज्ञानावरणीयं दर्शनावरणीयं मोहनीयं अंतरायमिति तथा चत्वार्यघाति
कर्माणि तद्यथा वेदनीयं नामिकं गोत्रिकमायुष्कं चेति॥ तत्र सम्यक् ज्ञानं नमो दृष्टाऽऽच्छाद्यते न
हि ज्ञानाद्यनुपलब्धिरिति प्रसंगादिति विपर्ययो ज्ञानावरणीयं कर्मोच्यते॥ अर्हत् दर्शनाच्छा
दनात्मोहाद्रुतिज्ञानं दर्शनावरणीयं कर्म बहुधा विप्रतिपिद्धेषु तीर्थिकादेरपदर्शितेषु मोक्ष
मार्गेषु विमोहानवधारणं मोहनीयं कर्म सन्मोहो मार्गप्रवृत्तानां तद्विघ्नकरं विज्ञान
मंतरायं कर्म एतानि नामानि अपोहेतुत्वात् घातिकर्माण्युच्यंते॥ अघातीनि कर्माणि॥
तद्यथा वेदनीयं कर्म शुभाशुभफलविपाकहेतुः तद्विघातोऽपि न निःश्रेयसप्राप्तिं प्रति तत्त्वज्ञाना
विघातकत्वात्॥ शुभाशुभफलारंभकं वेदनीयं कर्म। नामिकं कर्म तद्धि शुभाशुभफल
स्यावस्थाफलमेव हुदादि मारभते गोत्रिकं स्वयावत् ततो प्यायुराचिरूपेणावस्थितं
आयुष्कं तावत् पुण्यपातिरूपपत्युत्पादनकारणं त्वायुष्कं तान्येतानि शुभाशुभफलान्यप्यत्वा
द्घातीनि कर्माणि तदेतत्कर्मचतुष्कं पुरुषं बध्नाति तेन बंधः॥ विगलितसमस्तक्लेशातका

वी·२।२।
४३

सनेस्यानावरणतानस्यस्वरूपेणतानस्यात्मन उपरिहेयावस्याने मोक्ष इत्येके अन्ये तु ऊर्ध्वग
मनशीलो हि जीवो धर्माधर्मास्तिकायेन बद्धस्तद्विमोक्षादूर्ध्वग
समस्तपदार्था जीवादयः सहकेवलान्तरप्रभेदैरुपन्यस्ताः॥ तत्र सर्वत्र सप्तभंगीनयेन एते
मन्यापमवतारयंति। स्यादस्ति स्यान्नास्ति स्यादवक्तव्यः स्यादस्ति नास्ति च स्यादस्ति
चावक्तव्यः स्यान्नास्ति चावक्तव्यः स्यादस्ति नास्ति चावक्तव्य इति। स्यादिति शब्दः स्व
त्वयं निपातः तिङंतप्रतिरूपकः अनेकांतद्योती॥ यथाहुः॥ वाक्येष्वनेकांतद्योती ग
सप्रतिविशेषणं स्यान्निपातोऽर्थयोगित्वात् तिङंतप्रतिरूपक इति। यदि पुनरयमने
कांतद्योतकः स्याच्छब्दो न भवेत् स्यादस्तीति वाक्ये स्यात्पदमनर्थकं स्यात्
मेतिकरूपकं इति। यदि पुनरयमनेकांत स्यात्पदस्य न पर्ययोगित्वाद् इति॥ अनेकांतद्योत
कत्वे स्यादस्ति घटं इति स्यात्पदात्कथंचिद्रूपीत्यस्तीति स्यात्पदात्कथंचिद्रूपीत्यस्तीत्य
नेनानेकः प्रतीयत इति नानर्थकं तथा च स्याद्वादः सर्वथैकांतत्यागात् किंवृत्तचि

द्विधेः। स्वरूपभंग न पापेतो हेयादेयविशेषवत्तां किं च ते प्रत्यये स्वल्पये चिन्निपातविधिना सर्वथै
कांतत्यागात् समस्वेकांतेषु यो भंगः तत्रैव नयः तदपेक्षत्वं हेयोपादेयभेदस्या हृदः कल्प वे
तो तथा हि यदि वस्त्वस्यैवैकांततः ततः सर्वथा सर्वदा सर्वत्र सर्वात्मना स्त्येवेति नहि स्याज्जिह
साम्यां के चित् कदाचित् कुत्रचित् कश्चित्प्रवर्त्तेत निवर्त्तेत वा प्राप्तस्य प्रापणीयत्वात्। हेयहाना त
नुपपत्ते अज्ञाने कांत पक्षेतु कथं चित्तदा चित्तदाचित्कस्य चित्केन चित्कात्वेहानोपादाने प्रेक्षा
वतीवत्त्येते तमेतन्नसप्तभंगेन्याय दूषयति न एवास्मिन्च संभवात्। विभजनेन त्वेकांतेन
धर्म्मित्ति परमार्थसत्ति परमापि सतो यस्य तत्सदसत्वादी नां धर्माणां परस्पर परिहारस्थक
य णां समावेशः संभवति एतदुक्तं भवति सत्त्वं दास्ति वस्तुतः तत्सर्वथा सर्वदा सर्वत्र सर्वात्म
नानिर्वचनाये नैकांते एवास्त्येव न नास्ति यथा प्रत्यगात्मा यत्वेंा चित्तथा चित्तदाचित्केन चि
दात्मनास्तीत्युच्यते यथा प्रपंचः तद्व्यवहारतो न तु परमार्थतः तस्य तद्विचारासहत्वात्।
न च सप्तपद मात्रं वास्तवं तेव्यवस्थापयति श्रुतिसमर्थीचिकादि पुरजतता पादेरपि वा

वा॰२।२
२४

स्तवत्वप्रसंगात्॥ लौकिकानामबाधेन तु तद्भावस्यापि देहात्माभिमानस्याप्यबाधेन तात्त्विक
त्वे सति लोकायतमतापातेन नास्तिकत्वप्रसंगात् पंडितरूपाणां तु देहात्माभिमानस्यावि
चारतो बाध्यत्वं प्रपंचस्यापि ज्ञानेकांतस्य तुल्यमिति॥ अपि च सदसत्वयोः परस्परविरु
द्धत्वेन समुच्चयाभावे विकल्पेन च वस्तुनि विकल्पः संभवति तस्मात्स्यादेकौतुकवेति
ज्ञानवत्सत्त्वपंचत्वनिर्द्धारणस्य च फलस्यानिर्द्धारयितुमप्रमातुः तद्धारणस्य प्रमा
णस्य च तत्त्वमेवस्य सप्तत्वपंचत्वस्य सदसत्त्वसंशये साधु समर्पितं तेनापि बरत्वम
पमेणात्मनो निर्द्धारणस्यैकांतसत्वे सर्वत्र नानेकांतवाद इत्याहुर्यन्नेसमस्तपदार्था इति॥
रोषमतिरोहितार्थं॥ ॥एवं नानात्मकात्स्यैवं चेति चेन्न समुच्चये प्रतीतप्रतीतिः पारीक्ष्य परि
पाणत्वेनात्मनो अणुत्वमहत्त्वपरिच्छिन्नत्वं तथा नानित्यत्वे हि परिच्छिन्नत्वे सर्वज्ञानि
त्यापाघटादयस्तथा चात्मेति तदेतदाह यथैवास्मिन्धर्मिणीति॥ इदं चापरमवूत्वन
त्वेन सत्रितमित्याह परानां गणमनवस्थितपरिमाणत्वादिति॥ मनुष्यकायपरिमाणो

हि जीवो न हस्तिकायं [illegible] कृत्स्नं व्याप्तुमर्हत्यल्पत्वात् आत्मनः कृत्स्नशरीराव्यापि
त्वादकोऽस्मिंस्तथा च न शरीरपरिमाणत्वमिति॥ तथा हस्तिशरीरं परित्यज्य पुत्तिकाशरीरे
भवति॥ तदा न तत्र कृत्स्नः पुत्तिकाशरीरे सम्मीयेत इत्येकात्म्यमात्मनः सुगममन्यत्॥ चोद
यति स्यादेतदनन्तावयव इति यथा हि प्रदीपो घटमहागृहोदरवर्ती संकोचविकासवानेवं
दे जीवोऽपि पुत्तिकाहस्तिदेहयोरित्यर्थः॥ तदेतद्विकल्पं दूषयति॥ तेषां पुनरनन्तानामिति॥ न ताव
त्प्रदीपोऽत्र निदर्शनं भवितुमर्हति॥ अनित्यत्वप्रसंगादिति॥ विशरारवो हि प्रदीपावयवाः प्रदीप
श्चावयवी प्रतिक्षणमुत्पत्तिनिरोधधर्मा तस्मादनित्यत्वात्तस्य नास्थिरो जीवस्तद्वदवयवा
श्चाभ्युपेतव्याः तथा च विकल्पद्वयोक्तदूषणमिति॥ यत्र जीवावयवानामानन्त्यमुदितं तदन्
पपन्नतरमित्याह अपि च शरीरमात्रेति॥ शंकापूर्वकं सूत्रान्तरमवतारयति॥ अथ पर्याये
णेति तत्राप्युच्यते॥ न च पर्यायादप्यविरोधो विकारादिभ्यः कर्मोदयकृतेनावरणीया
दि किं चान्यत् आत्मनो नित्यत्वाभ्युपगमे आगच्छतामपगच्छतां चावयवानामिष्यति॥ आ

वा·२।२।
८५

निरूपणेन चात्मनानात्माभावान्नापवर्ग इति भावः ॥ अत एव मादिदोषप्रसंगादिति आदिग्रहणसू
चितं दोषं ब्रूमः । किं चैते जीवावयवाः प्रत्येकं वा चेतयेरन् सम्भूय वा तेषां प्रत्येकं चैतन्ये बहूनां
चेतनानामेकाभिप्रायत्वनियमाभावात् कदाचिद् विरुद्धक्रियत्वे शरीरमुन्मथ्येत सम्भू
य चैतन्ये तु हस्तिशरीरस्य पुत्तिकादेहवत्वे छिन्नावयवेषु जीवो न चेतयेत् ॥ विगलि
तबहुसमूहितया समूहस्याभावात् पुत्तिकाशरीर इति ॥ अप्यचेति ॥ पूर्वसूत्रप्रसंजि
तां जीवानित्यतां दोषान्तरत्वेन तां नानित्यतामाशंक्य दूषयति ॥ न च पर्यायादप्यविरोधो विका
रादिभ्यः ॥ न च पर्यायात् परिमाणानवस्थानेपि संतानाभ्युपगमेनात्मनो नित्यत्वाद
विरोधो बन्धमोक्षयोः कुतः परिणामादिदोषेभ्यः संतानस्य वस्तुत्वे परिणामवत्त्वेन
चर्मवदनित्यत्वादिदोषप्रसंगो वस्तुत्वेनादिग्रहणसूचितो नैरात्म्यापत्तिदोषप्र
संग इति विभिन्नो विवक्षितः ॥ अन्त्यावस्थितेश्चोभयनित्यत्वादविशेषः ॥ एवं हि मु
क्तावस्थाभाविजीवपरिमाणं नित्यं भवेत् पश्चाभावान्न भवेत् ॥ अभवत्वाभाविनामनि

सत्वीरघटादीनां कार्यत्वाभक्त्वा न भवेद्यदि प्रागप्यासीत् । न च परिमाणेन शावशेषेऽपूर्वं भवि
तुमर्हति ॥ तस्मादेतन्मेव परिमाणं पूर्वमप्यासीदित्यभेदः तथा चैकशरीरपरिमाणत्वे न स्यात्
नोपचितापचितशरीरप्राप्तिः शरीरप्राप्तिः शरीरपरिमाणत्वानुपगमव्याघातादिति ॥ अत्र च
उभयोः परिमाणयोर्नित्यत्वप्रसंगादिति योजना । एकशरीरपरिमाणतेति यदीये द्वितीये
तु व्याख्याने उभयोरवस्थयोरिति योजना । एकशरीरपरिमाणता न दीप्या एव परिमाणता
मात्रमणुर्महत्त्वेति विवेकः ॥ पत्युरसामंजस्यात् ॥ अविशेषेणेश्वरकारणवादेनेन नि
षिध्यत इति भ्रमनिवृत्त्यर्थमाह केवलेति ॥ सांख्ययोगव्यपाश्रया हिरण्यगर्भपतं
जलिप्रभृतयः प्रधानमुक्तं ज्ञोज्ञः पुरुषः । प्रत्ययानुपश्यः सर्वनानाक्लेशकर्मविपाका रा
शयैरपरामृष्टः पुरुषविशेष ईश्वरः प्रधानपुरुषाभ्यामन्यः माहेश्वराश्चत्वारः शैवाः
पाशुपताः कारुकसिद्धांतिनः कापालिकाश्चेति ॥ चत्वारोऽप्यमी महेश्वरप्रणीतसिद्धांतानु
गामितया माहेश्वराः । कारणमीश्वरः प्रधानकार्यं प्राधानिकं महदादि प्रागेवाकारादिध्या

बा॰२।२। ५६

नथारण्यादिविधिस्त्रिषवणस्नानादिर्गोदवर्यावसानो दुःखांतो मोक्षः। पशवः आत्मानः तेषां
पाशो बंधनं तद्विमोक्षो दुःखांतः एष तेषामभिसंधिः॥ चेतनस्य स्वतंत्वधिष्ठातुः कुंभकारा
देः कुंभादिकार्ये निमित्तकारणत्वमात्रं न तूपादानत्वमिति तस्मादिहापीश्वरोधिष्ठा
ता जगत्कारणानां निमित्तमेव न तूपादानमप्येवस्याधिष्ठातृत्वाधिष्ठेयताविरोधादि
ति प्राप्तमेवं प्राप्त उच्यते॥ पत्युरसामंजस्यात् इदमत्राकूतं। ईश्वरस्य निमित्तकारणत्व
मात्रत्वमागमाद्वोच्यते प्रमाणांतराद्वा प्रमाणांतरमप्यनुमानमर्थापत्तिर्वा न तावदाग
मात् तस्य निमित्तप्रकृतिकारणप्रतिपादनपरत्वादित्यसकृदावेदितं। तस्मादनेना
भिमतार्थे प्रमाणांतरमास्थेयं। तत्रानुमानेन तावन्न संभवति। तद्धि दृष्टानुसारेण वर्त
ते तदनुसारेण वा सामंजस्यं तदाह हीनमध्यमेति। एतदुक्तं भवत्यागमाद्धीश्व
रासिद्धौ न हेतुमत्सर्गत्वेन हि स्वर्गापवर्गदेवतादिभागमादेव गम्यमाने पूर्वे चिदक्ति
दृष्टे न भोगमोदृष्टसाधर्म्यात् प्रवर्त्तते तेन क्रांतिसिध्यर्थमदृष्टानि दृष्टांतरविपरीत

प्रवर्त्य

स्वभावानि सर्वहृत्ति अपि कल्प्यमानानि न लोहगंधितामावहंति प्रमाणवत्वात्॥ यत्तत्रकश्चिद्दृष्टानुसा
रः क्षिपते समुद्रहृद्भावमात्रेण अप्रमाणापेक्षमनुमानेन दृष्टसाधर्म्येण प्रवर्त्तमानं दृष्टविपर्ययतु
वादृष्टपि विभेतितरामिति प्राणिकर्मापेक्षत्वाद्दोष इति चेत् न कुतः कर्मेश्वरयोर्मिथः प्रवर्त्तयि
त्वे इतरेतराश्रयदोषप्रसंगात् अपमर्षः यदीश्वरः करुणापराधीनो वीतरागः स्यात्ः प्राणि
नः कष्टये कर्मणि न वर्त्तयेत् तच्चोत्पन्नमपि नाधितिष्ठेत् तावन्मात्रेण प्राणिनो दुःखानुत्पाद
कोहीश्वराधीना जंतवः स्वातंत्र्येण कष्टं कर्म कर्त्तुमर्हतीति तदनधिष्ठितं वा कष्टं कर्म स्वफलं
प्रणेतुमुत्सहते। तस्मात्स्वतंत्रोपीश्वरः कर्मणः प्रवर्त्तते इति दृष्टविपरीतकल्पनीयं। तथा
चापमपरो दोषः उभयोरपि स्फोट इतरेतराश्रयापत्तिः प्रसज्येत। कर्मणीश्वरः प्रवर्त्तनीयः ईश्व
रेण च कर्मेति शंकनीयमनादित्वादिति चेत्पूर्वेण कर्मणेश्वरः संप्रतितन कर्मणि प्रवर्त्यते ते
नेश्वरेण संप्रतितनं कर्म स्वकार्ये प्रवर्त्यत इति। निराकरोति न वर्त्तमानकालवदिति। अथ
पूर्वं कर्म कपमीश्वराप्रवर्त्तितमीश्वरप्रवर्त्तनलक्षणं कार्यं करोति। तत्रापि प्रवर्त्तितमीश्वरेण

बा॰।२।२।२। सर्वेतरकर्मप्रवर्त्तितेत्ययमन्धपरंपरादोषः॥ चतुष्पनाद्ये धोनीयतेनो धांतरेण तथेहापि
४८ सावृपि प्रवर्त्त्यविविति कः कं प्रवर्त्तयेदित्यर्थः॥ अपि च नैयायिकानामीश्वरस्य निर्दोषत्वं स्वस
मयविरुद्धमित्याह अपि चेति॥ अस्माकं तु नायं समय इति भावः॥ ननु कारुण्यादपि प्रवर्त्तमानो
जनो दृष्टस्तेन न च कारुण्यं दोष इत्यत आह स्वार्थप्रयुक्ता एवेति करुणो हि सत्यस्य दुःखः तेभवति तेन
६ तत्प्रहाणाय प्रवर्त्तत इति कारुणिकोऽपि स्वार्थप्रयुक्त एव प्रवर्त्तत इति॥ ननु स्वार्थप्रयुक्तः प्रवर्त्ती
तामेवमपि को दोष इत्यत आह स्वार्थवत्त्वादीश्वरस्येति॥ अर्थित्वादित्यर्थः॥ पुरुषस्य चोद
सीन्याभ्युपगमान्नवा सर्वार्थप्रवृत्तिरिति॥ अपरमपि दूषणानुसारेण दूषणमाह संबंधानुप
पत्तेश्चेति हि सावयवानामसर्वगतानां च संयोगः॥ अप्राप्तिपूर्विका हि प्राप्तिः संयोगो न सर्वग
तानां संभवति अप्राप्तेरभावात्॥ निरवयवत्वाच्च अव्याप्यवृत्तिता हि संयोगस्य स्वभावो न च
निरवयवेष्वव्याप्यवृत्तिता संयोगस्य संभवतीत्युक्तं तस्मादव्याप्यवृत्तितायाः संयोगव्या
पिकाया निवृत्ते सत्वाव्यस्य संयोगस्य निवृत्तिरिति भावः॥ नापि समवायलक्षणः सत्यपुतसि

ह्निनामाधेयाधारभूतानामिह प्रत्ययहेतुः संबंध इत्यभ्युपेयते। नच प्रधानपुरुषेश्वराणांमिथो
स्त्याधार्याधारभाव इत्यर्थः॥ नापि योग्यतालक्षणः कार्यगम्यः संबंध इत्याह नाप्यन्य इति॥ न
हि प्रधानस्य महदहंकारादिकारणत्वमप्यसिद्धमिति शंकते। ब्रह्मवादिन इति॥ निराकरोति
न कुतस्तस्य मतेऽनिर्वचनीयतादात्म्यलक्षणसंबंधोपपत्तेः॥ अपि चेति॥ आगमो हि प्रव
त्तिप्रतिन दृष्टमपेक्षते इत्यदृष्टप्रवर्तकत्वाद्विरुद्धे च प्रवर्तितुं समर्थः॥ अनुमानं तु दृष्टानुसारि नै
वंविधे प्रवर्तितुमर्हतीति शंकते परस्यापीति॥ परिहरति नेति॥ अस्माकं त्वीश्वरागमयोरनादि
त्वादीश्वरयोनित्वेऽप्यागमस्य न दोष इति भावः॥ अधिष्ठानानुपपत्तेश्च॥ यथादृष्टमनुमा
ती ने प्रवर्तते नालौकिकार्थविषयं इहापि न प्रत्यक्षं नागमोऽन्यत्र॥ करणवच्चेन्न भोगादि
भ्यः॥ रूपादिहीनमित्यन्तं तद्रूपादीत्यर्थः॥ रूपादिहीनकरणाधिष्ठाने पुरुषस्य स्व
भोगद्वारैव दृष्टं नान्यत्र न हि वास्यादिकुठाराद्यपरिदृष्टं व्यापारवत्त्वमुपलभ्यते॥ तस्माद्रूपा
दिहीने करणव्यापारवत ईश्वरस्य भोगादिप्रसक्तेः॥ तथा चानीश्वरत्वमिति भावः॥ केतां

तस्मादन्यथेति पूर्वमधिष्ठितिरधिष्ठानं॥ इदानीं त्वधिष्ठानं भोगायतनं शरीरमुक्तं॥ तथा भो-
गादिप्रसंगेनानीश्वरत्वपूर्वमापादिते संप्रति तु शरीरित्वेन भोगादिप्रसंगादनीश्वरत्वमु-
क्तमिति विशेषः॥ अंतवत्त्वमसर्वज्ञता वा॥ अपि च सर्वत्रानुमाने प्रमाणे यतः प्रधानपुरुषे-
श्वराणामपि संख्याभेदवत्त्वमंतवत्त्वं च द्रव्यत्वाद्धि संख्यावत्त्वे सति प्रमेयत्वाद्वानुमातव्यं॥
ततश्चांतवत्त्वमसर्वज्ञता वा॥ अस्माकं त्वागमगम्येऽर्थे तद्बाधितविषयतयानानुमानं प्रभव-
तीति भावः॥ स्वरूपपरिमाणमपि। यस्याप्याहरणमणु महत् परममहद्दीर्घह्रस्वं चेति॥ अथ माभू-
देषदोष इत्युक्तो विकल्पः॥ यस्यांतोऽस्ति तस्यांतवत्त्वाग्रहणमसर्वज्ञतामापादयेत्॥ यस्य
त्वेत एव नास्ति तस्य तदग्रहणं नासर्वज्ञतामावहति नहि शशविषाणाज्ञानादज्ञो भवतीति भा-
वः। परिहरति तत इति॥ आगमानपेक्षस्यानुमानमेषामंतवत्त्वमवगमयतीत्युक्तं॥ उत्पत्त्य-
संभवात्॥ अन्यत्र वेदाविसंवादात् यत्रांशे विसंवादः स निरस्यते तमंशमाह यत्पुनरिदमु-
च्यते वासुदेवात्संकर्षणः इति जीवस्य हि कारणवत्त्वे सत्यनित्यत्वं अनित्यत्वे परलोकिनो भा-

वात्। ततश्च परलोकाभावः ततश्च स्वर्गनरकापवर्गाभावापत्तेर्नास्तिकत्वमित्यर्थः॥ अनुपपन्ना च
जीवस्योत्पत्तिरित्याह प्रतिषेधिष्यते इति॥ न च कर्तुः करणं॥ यद्यप्यनेकशिल्पपर्यवदातः परस्तुव
त्वात्तेन पल्लावं॥ छ॥ नन्वि यद्यपि च संपद्यते नेंद्रियाण्यात्ममनःसन्निकर्षद्वारेण ज्ञानकारणमुपादायात्मा
र्थं विजानाति तथापि संनिकर्षेणऽकरणः कथं प्रद्युम्नाख्यं मनः करणं कुर्यात्॥ अकरणस्य च कर
णमात्मसर्पीकृतं करणनिर्माणे नाकरणादेव निखिलकार्यसिद्धिरिति भावः॥ विज्ञानादिभावे वा
३ तत्प्रतिषेधः॥ वासुदेवादयो सर्वे तेसंकर्षणाद्यो निर्दोषा अविद्यादिदोषरहिताः निरधिष्ठानानि निरुपा रा
दाना अतएव निरवद्या अनित्यत्वादिरहिताः। तस्मादुत्पत्त्यसंभवो न गुणत्वान्न दोष इत्यर्थः॥
अत्रोच्यते॥ एवमपीति॥ माभूदभ्युपगमेन दोषः प्रकारान्तरेण त्वयमेव दोषः॥ प्रश्नपूर्वकं प्रका
रान्तरमाह कथमित्यादि तावदिति न तावदेते परस्परं भिन्ना ईश्वराः परस्परव्याहतेच्छा भवितमर्हंति
व्याहतकामत्वे च कार्यानुत्पादात्॥ अव्याहतकामत्वे वा प्रत्येकमीश्वरत्वे एकेनैव [illegible] सानायाः कृतत्वा
दानर्थक्य समितरेषां संप्रवेशनायोपरिशुद्धानकश्चिदीश्वरः स्यात् सिद्धान्तहानिश्च भगवानेवै

श्रीः

वात्॥ ततश्च परलोकाभावः ततश्च स्वर्गनरकापवर्गाभावापत्तेर्नोत्पत्तिकत्वमित्यर्थः॥ अनुपपन्ना च
जीवस्योत्पत्तिरित्याह प्रतिषेधिष्यति चेति॥ न च कर्तुः करणं॥ यद्यप्यनेकशिल्पपर्यवदातः परशुं दू
त्वा तेन पलाशं॥ छिनत्ति यद्यपि च संपत्ते नेंद्रियापीत्ममनः सन्निकर्षेण ज्ञानकरणमुपादायात्मा
र्थं विजानाति तथापि संकर्षणोऽकरणः कथं प्रद्युम्नाख्यं मनः करणं कुर्यात्॥ अकरणस्य चकर
णसामर्थ्ये तं करणनिर्माणेनाकरणादेव निखिलकार्यसिद्धिरिति भावः॥ विज्ञानादिभावे वा
व तदप्रतिषेधः॥ वासुदेवा एवैते संकर्षणादयो निर्दोषा अविद्यादिदोषरहिताः निरधिष्ठानानिरुपा रा
दाना अत एव निरवद्या अनित्यत्वादिरहिताः तस्मादुत्पत्त्यसंभवो न गुणत्वान्न दोष इत्यर्थः॥
अत्रोच्यते॥ एवमपीति॥ माभूदभ्युपगमेन दोषः प्रकारांतरेण त्वयमेव दोषः॥ प्रश्नपूर्वकं प्रका
रांतरमाह कथं यदि तावदिति न तावदेते परस्परं भिन्ना ईश्वराः परस्परव्याहतेच्छा भवितुमर्हंति
व्याहतकामत्वे च कार्यानुत्पादात्॥ अव्याहतकामत्वे वा प्रत्येकमीश्वरत्वे एकेनैव [illegible] सानायाः कृतत्वा
दानर्थक्यमितरेषां संभवप्रवेशनायां परिशुद्धज्ञानक [illegible]श्वरः स्यात् तत्सिद्धांतहानिश्च भगवतो नैवं

वा।२।२।
४५

कोद्वैवासुदेवः परमार्थतत्त्वमित्यभ्युपगमात्तस्मात्कल्पान्तरमास्थेयं॥ तत्र चोत्पत्त्यसंभवो दोष इ
त्यापाद्य वाच्यकल्पान्तरमुपन्यस्योत्पत्त्यसंभवेनापाकरोति अपायमाभप्राप इति सुगममन्
त॥ विप्रतिषेधाच्च॥ गुणिभ्यः स्वतन्त्रात्मभ्यो ज्ञानादीन्गुणान्भेदेनोक्त्वा पुनरभेदश्रुते॥
आत्मान एवैते भगवन्तो वासुदेवा इत्यादिग्रहणेन प्रद्युम्नानिरुद्धयोर्मनोहंकारलक्षण
तयात्मनो भेदमभिधायात्मान एवैते इति तद्विरुद्धाभेदाभिधानमपरं संगृहीतं वेदवि
प्रतिषेधो व्याख्यातः॥ इति श्रीमच्छारीरकमीमांसाभाष्ये श्रीमच्छंकरभगवत्पादकृतौ द्विती
यस्य द्वितीयः पादः समाप्तः॥ वेणीधरेण लिखितं॥ ॥ ॥

वा।यस्पनि द्वितीयाध्यायतृतीयपादारंभः

वी० क० रू०
१

ॐ श्रीगणेशाय नमः ॥ न वियदश्रुतेः ॥ एवं प्रमाणान्तरविरोधः श्रुतेर्निराकृतः संप्रति तु श्रुतीनामेव
परस्परविरोधो निराक्रियते तत्र सृष्टिश्रुतीनां परस्परविरोधमाह वेदान्तेषु तत्र तत्रेति ॥ श्रुतिविप्र
तिषेधाच्च परपक्षाणामनपेक्षत्वमुक्तमपि तत्स्वपक्षस्य श्रुतिविप्रतिषेधादिति ॥ तदपि निर्मलत्व
मपाभासविनिवृत्त्यापि तत्त्वप्रतिपादनं तस्य फलं स्वपक्षस्य जगतो ब्रह्मकारणत्वस्यानपेक्षत्व
शंकानिवृत्तिः ॥ इह हि पूर्वपक्षे श्रुतीनां मिथो विरोधः प्रतिपाद्यते सिद्धान्ते त्वविरोधः तत्रासिद्धा
न्तैकदेशिनो वचनेन न वियदश्रुतेरिति ॥ तस्यापवाद संगतिः ॥ यद्यपि तैत्तिरीयके वियदुत्
पत्तिरस्ति तथापि तस्याः प्रमाणान्तरविरोधात् बहुश्रुतिविरोधाच्च गौणत्वं तथा च वियतो
नित्यत्वात्तेजःप्रमुख एव सर्गस्तथा च न विरोधः श्रुतीनामिति ॥ तदिदमुक्तं प्रथमं तावदाका
शमाश्रित्य चिन्त्यते किमस्योत्पत्तिरस्त्युत नास्तीति ॥ यदि नास्ति न श्रुतिविरोधाशंका ॥ अथा
स्ति ततः श्रुतिविरोध इति तत्परिहाराय प्रयत्नो तस्मात्संशयपक्षित्वार्थः ॥ तत्र पूर्वपक्षमात्रं ॥
न तावत् ॥ तैत्तिरीये हि सर्गप्रकरणे केवलस्याकाशस्यैव प्रथमः सर्गः श्रूयते। छांदोग्ये च ते

काम्यवहितस्तर्वं व्रीहिसंग्रहितत्वे

वलस्यतेजसः प्रथमः सर्गः ॥ न च आनंतरानुरोधेनासहायस्याधिगतस्यापि सहायताक
ल्पनेयुक्तमसहायत्वावगमविरोधात् ॥ आनंतर्ये खल्वानंतर्यं कल्प्यते न तु तद्विघाता
पविहन्यते वासहायत्वं आनंतर्यकल्पितेन सहायत्वेन ॥ न च परस्परानपेक्षाणां व्रीहियव
वद्विकल्पोऽनुष्ठानं हि विकल्प्यते न वस्तु नहि स्थाण्वु पुरुषविकल्पो वस्तूनि प्रतिष्ठां ल
भते न च सर्गभेदेन व्यवस्थोपपद्यते सांप्रतिकसर्गवत्पूर्वस्यापि तथाभावात् न ख
ल्विह सर्गे होतृदृष्टिर्जायते सर्गान्तरे तु उद्गातृदृष्टिर्भवति । तस्मात्सर्गआदितः पर ति
स्परविरोधिनोर्नानात्मत्वे प्रमाणं भवितुमर्हतीति प्रवेपदः सिद्धान्तैकदेशी मन्त्रेण
त्वामेप्रापसाविषयेति ॥ गौणपक्षे समवायत्र ॥ प्रमाणान्तरविरोधेन वद्धुआनंतरविरोधे
न चानीरास्पोत्पत्त्यसंभवात् गौणे पक्षे वाकाशोत्पत्तिश्रुतिरिति विरोध इत्यत्र आह । प्रमाणान्तर
विरोधमाह न तु काराणेतिसमवायिनिमित्तकारणाभावाद्धि कार्यस्योत्पत्तिर्नियता तदभा
वे न भवितुमर्हति धर्म इव ध्वजाभावेत स्मात्स्वकारणाभावे आकाशो नित्य इति ॥ अपि च येऽत्य

धर्म

वी॰ र॰ रू॰ ध्वंसे तेषां प्रागुत्पत्तेरनुभवापत्तिरिति येनोपलभ्येत उत्पन्नस्य च ध्वंसे पश्चात्तत्प्रभृतीनां न वा ता
दृशो विशेष उत्पादानुत्पादयोरक्षितस्यान्नोत्पद्यत इत्याह उत्पन्नमतौ चेति प्रकाशानंसक्तोपा
र घटपटादिषोऽन्तरः॥ पृथिव्यादि वैधर्म्यं चेति आदिग्रहणेन द्रव्यत्वे सत्यस्पर्शत्वात् आत्मवत्
नित्यमाकाशमिति गृहीतं आरम्भेनाकाशेष्विति वेदोक्ये आकाशस्योपाधिकं बहुत्वं॥ तदेव
प्रमाणान्तरविरोधेन गौणत्वमुक्त्वा अन्यतरविरोधेनापि गौणत्वमाह शब्दाश्च॥ स्मृतमं॥
स्याच्चैव कस्य ब्रह्मशब्दवत्॥ यदस्मान्नेषु गोन पदार्थस्य तद्भिन्नाचिन्नुरत्वादाचिदोपचारिकं सं
भवात्सम्भवाभ्यामिन्त्यविरोधः॥ चोपघटपकेति। तपरमिति॥ अप्रमेचोपपरिहरति [illegible] मेवे
तिलावदिति॥ तुल्ये गृहे। आमत्राणि पात्राणि घटपटावाशीति॥ अपौरुषेकमवधारणेन सर्व
विषयमित्यर्थः॥ उपपत्तिं तदमाह न चेन भस्त्राणीति॥ अपिरम्युपगमे। यदि सर्वोपदेशे तथाप्य
दोष इत्यर्थः॥ न च प्रागुत्पत्तेर्ल्लभ्यन्त इति शेषः। द्वितीयं चोपघमपाकरोति अत एव चक्षुरसविता
नेनेति। लब्ध्वर्णान्नत्वाभावेनाकाशस्य बलेशेऽनन्तत्वादिति॥ अपि चाव्यातिरिक्तोद्देशका

लक्षणकार्य ब्रह्मलक्षणं च ब्रह्मलक्षकार्यस्य तदभिन्नस्वभावेरतः हीरकुंभप्रभृतिभवतिपययपर्यो विंदुव
द्रुक्षणात् ज्ञातैव विज्ञातेन भो विदितं भवतीत्यात् अपि च सर्वं कार्यमुत्पद्यमानमिति॥ ९ वैशि
ष्टं तेन देशिमते प्राह इदमाह प्रतिज्ञाहानिरव्यतिरेकाच्छब्देभ्यः॥ ब्रह्मविवर्त्तत्वमतयाऽजगत
स्तद्विकारस्य वस्तुतो ब्रह्मणोऽभेदे ब्रह्मणि ज्ञाते तज्ज्ञानमुपपद्यते। नहि जगत्तत्वे ब्रह्मणोऽन्यत्
तस्मादाकाशमपि तद्विवर्त्तत्वात्तद्विकारः सतत्त्वज्ञानेन ज्ञातो भवति नान्यथा। अविका
रत्वे तु तत्त्वतोऽन्तरेण ब्रह्मणि विदिते विदितं भवति भिन्नयोर्लक्षणान्यत्वाभावेऽपि देशकाला
भेदेऽपि नान्यतरज्ञानेनान्यतरज्ञानं भवति॥ नहि हीरस्य पूर्णे कुंभे हीरे गृह्यमाणे सत्यपि
पयोबिंदुरुपाधेः तत्प्रतिभासमस्ति विज्ञाने। तस्मात्सते हीरे विदिते विदिता इति प्रतिज्ञाहा
नप्रवचनानुपरोधाय विवर्त्तत्वमभिन्नानामेवोपपद्यते॥ तदेवं समर्थितेकदेशिनि दूषिते एवं
पदी स्वपक्षे विशेषमाह सर्वं हरितं॥ अत एव विकारत्वं तु तदिति सिद्धांतसारमाह नैव दोषः तेजः
सर्गस्य तेजसोऽयतइतिश्रुत्योरन्यथोपपद्यत इति दुर्बलानन्तसाम्यतेजः प्रथमसर्वगम्य
यथो पपयमनानुपपद्यमानयोरन्यथानुपपद्यमानाबलवत्तीति लेस्य कृतिश्चा ?

तलहं

वा॰ अ॰ २।२।

२

सर्ग

मानेसमकालापत्तेनविरचयतइत्युक्तमतआह नत्वायंअतितेजोजनिप्रधानेतिसर्गऔतोमेदत्वा
पि॥सचअस्यैतरेणविरोधेनबाध्यतेजप्रत्यन्यत्वात्नचतेजःप्रकृत्वसर्गेनसर्गोवस्तहपत्त
मयस्यश्रौतंकिंतुव्यतिरेकलेल्यंनचश्रुतेनतदपबाध्यतेअतस्तेजःसर्गस्यानुपपत्तिः॥
तदिदमुक्तंतेजःजनिप्रधानेति॥स्यादेतत्पक्षेकवाक्यमनेकार्थंनसंभवत्येकस्यापरत्वप
सेभवातहेतमोःकथमेकस्यकत्वृरनेकव्यापारत्वविरुद्धमित्यतआहकार्यत्वेकोपीति
दृष्टप्रयोगाधीनावधारणंशब्दसामर्थ्यंनचावृत्तस्यशब्दस्यक्रमाक्रमाभ्यामनेकार्थव्यापा ना
रोदृष्टःसंतुक्रमाक्रमाभ्यामेकस्यापिकर्तुरनेकव्यापारत्वमित्यर्थः॥नचास्मिन्पक्षेएकस्य
वाक्यस्यव्यापारोऽपितुभिन्नानांवाक्यानामित्याहनचास्माभिरिति॥मुख्यमे॥चोदयति॥न
नुरामविधानार्थमितियत्परःशब्दःसशब्दार्थोनचैषमसदिपरोपितुरामपरइत्यर्थः॥परिहर
तिनहितेजःप्राधान्यानुरोधेनेति॥मुख्यत्वादिपितान्क्रमस्यअतप्रधानपदार्थविवेकोथास्
गोपुत्रइत्यर्थः॥सिंहावलोकितन्यायेनविषयरक्षतांनिवादिनेप्रत्याहअपिचैषुहोमपद्धति॥

यस्तु नरत्वस्य प्रतिक्षेपवादेनेदं तन्न दूषयति पक्षोक्तमिति ॥ इदं तावदनुरूपत्वाद्वाहीति तस्य तस्य च प्रवृ
त्तिनिमित्तरूपत्वाद्दर्शितमस्यापि तथाभावः ॥ अपि च गौरिति मत्वेनैतद्वचनमेवमेतद्गौर्द्वितीयस्मि
ति तेनैवोक्ती रत्नुद्विवरः । औपचारिकं वाहीके माणवक इति वरं तत्र च न तावत्खातमित्याह हीको
रके न्यायेनेति । गौरवि प्रलेभात्म प्राय स्वच पुरुषधर्मत्वादश्वोरथेतदेतेमवह्नं स्यात् ॥ न चौप
चारिकमित्याह ना न्यायरण्वेयमिति ॥ काममुपचारादेवेवमबधारणाद्वितीयपदे तु नोपपद्य
ते नहि माणवके सिंहत्वमुपचर्य्य नासिंहत्वात् सिंहस्याभिमनानापि माणवक इति वदति लौकिकाः ॥
तस्माद्भूलित्वमैकान्तिकं जगतोऽपि वाद्धितं तस्मान्नौपचारिके । अस्मात्सेनाऽभयस्य सर्पस्य भ
वति न तत्त्वतमपि प्रान्तेनौपचारिकतस्मिन्नर्थः ॥ नतस्य कार्यापेक्षयेति ॥ निःशेषवचनः स
रस्वतः सर्वशब्दो नासति स्मृत्यन्तरविरोधे एकदेशविषयो युज्यत इत्यर्थः । आकाशस्येव
तौ श्रुमाणान्तरविरोधसुगमनुभाष्य तस्य श्रुमाणान्तरस्यैं माण्यान्तरविरोधेनाप्रमाणमतस्य
नैकेणत्वापादनसामर्थ्यमित्याह यावद्विकारं तु विभागो लोकवत् ॥ सोऽयं प्रयोगस्त्वाकाशादिका

बो॰ र॰ टी॰
४

आत्मेति अविद्यातत्कार्याधारतामुपलक्षयति। तेन न तत्र व्यभिचारः। शशविषाणादौ व्यभिचारवारणाय विभक्तत्वादिति सद्रूपत्वादित्यपिः

ले मनः प्रमाणे वैदिकाः॥ आत्मान्यत्वेनाति विभक्तत्वात् घटशरावोदंचनवदिति॥ सर्वकार्यनि
रात्मकं इत्येतन्निरूपादानेस्वादित्यर्थः॥ ननु वा इत्यनिराकृतः स्वयमेव अस्तोपन्यस्य कथमस
तः सत्तायेतेति। उपपादितं च तन्निराकरणमयुक्तमिति॥ आत्मवादे वोपादानत्वादेवात्मनः
सत्त्वगात्मनो निराकरणं प्रकाशानुपपत्तेः। एतदुक्तं भवति सोपादानेनैवात्मा पर्यन्तगता स्वैवोपादानं
युक्तं तस्यैवोपादानत्वेनास्मतैकोपादानान्तरकल्पनानुपपत्तेरिति॥ स्यादेतत् तावत् स्वात्मनोपा
दानस्य जगतः तस्य तदुपादानान्तरमस्त्रप्रमाणमप्यनवस्थैवं विषयतीत्याह नत्वात्मनेत्युक्त
के स्वस्यैवोपादानान्तरं स्वेपिदेयः कुतः स्वयंसिद्धत्वात् सत्ता वा प्रकाशो वास्य स्वयं सिद्धौ॥ न आ
कारान्वितायाः सिद्धत्वाद्वन्नागन्तुकत्वमाह नत्वात्मात्मन इति॥ उपपादितमेव पाकंसमपी
प्रधीमपेक्षेत्याम् नास्यदर्श्यादेकदापि नात्मापराधीनप्रकाशस्य धीनप्रकाशानुप्रमाणादिर्योऽत
एवस्मातिनमेव भांतमनुभातिसर्वं तस्य भासा सर्वमिदं विभातीति॥ न चेदं सत्त्वनिराकरणं
संभवतीति॥ निराकरणमपि हितद्धीनात्मलाभं तदितं नोदेतुमर्हतीत्यर्थः॥ सत्तायाः आ

नागंतुकत्वमस्याहतप्रमेयेराज्ञीज्ञानामीति प्रमाप्रमाणप्रमेयानां वर्त्तमानातीतानागतत्वे
पि प्रमातुः सदा वर्त्तमानत्वे नानुभवात् अनागंतुकस्वभावस्य नागंतुकं स्वत्वे त्रैकाल्या विच्छेदेन
हि आगंतुकत्वव्याप्तं तत्प्रमातुः सदा वर्त्तमानाद्यावर्त्तमानस्यागंतुकत्वं स्वव्याप्यमा
दाय निवर्त्तत इति॥ अन्यथाभवत्वपि ज्ञातव्य इति भवति प्रत्यभिज्ञानेऽपि यो
रन्यथाभावो दर्शितः॥ ननु जीवतः प्रमातुर्मा भूदन्यथाभावो मृतस्य तु भविष्यती
त्यत आह तस्याभस्मीभवत्यपीति॥ परवत्सु सत्त्वभावमनुभवसिद्धं तस्यानिर्व
चनीयत्वमन्यतो बाधकाभावात्॥ बाधकं च घटादीनां स्वभावाद्विचलनं प्र
माणोपनीतं॥ यस्य तु न तदस्त्यात्मनो न तस्य न कल्पनं युक्तम बाधितानुभवसिद्धस्य
तत्स्वभावस्यानिर्वचनीयत्वकल्पनाप्रमाणाभावात्॥ इदिदमुक्तं न संभावयितुं श
क्यमिति॥ तदनेन प्रबंधेन प्रत्यभिज्ञानेनाकाशानुमत्यनुमाने दूषयित्वा अनेकांति
कत्वेनापि दूषयति॥ यतः तत्समानजातीयमिति॥ नाप्यनेकमेवोपादानमुपादेयमा

२।३।
वा.
५

रभ्यते ॥ यत्र हि क्षीरं तद्दधिभावेन परिणमते तत्रेनावयवानामन्येषामुपादानत्वमभ्युपगतं
किंतर्हि तदेव क्षीरमेवमुपादेयं दधिभावेन परिणमते यथा निरवयवपरमाणुवादिनां क्षीरप
रमाणुर्दधिपरमाणुभावेनेति सोयमतिरोहितार्थः ॥ एतेन मातरिश्वा व्याख्यातः ॥ यथाभ्या
सेनभयत्वमर्थस्य भवति नान्यस्यास्ते दूरतएवापचरितत्वं हंतभोः पवनस्यानित्यत्वप्रसं
गः। वायुश्चांतरिक्षं मेदमृतमिति वायोरमृतत्वमुक्तं पुनः पवनस्याविशेषेणाह सैषानां
स्तमिता देवता यद्वायुरिति ॥ तस्मादभ्यासान्नापेक्षिकं वायोरमृतत्वमपि त्वात्यंतिकमेवेति
प्राप्तं। तदिदमुक्तं भाष्यकृता। अस्तमयप्रतिषेधात् अमृतत्वश्रवणाच्चेति ॥ तेनसमुच्च
यार्थेनाभ्यासो दर्शितः ॥ एवं प्राप्तेउच्यते ॥ एकविज्ञानेन सर्वविज्ञानप्रतिज्ञाया वाक्यस्य प्रा
धान्यात्तदुपपादनार्थत्वाच्च वाक्यांतराणां तेषामपि चाद्वैतप्रतिपादकानां मातरिश्वोत्पत्ति
क्रमप्रतिपादकानां बहुलमुपलब्धेर्मन्दभयत्वाभ्यामस्यामश्रुतीनां बलीयस्त्वादेतद
नुरोधेनामृतत्वास्तमयप्रतिषेधावापेक्षिकौ नेतव्याविति भयस्तीः श्रुतारपेक्षो

के ·

अविनश्यतीशब्दमात्रमुक्तं ॥ असंभवस्तु सतोऽनुपपत्तेः ॥ ननु न चास्यवकाश्चिज्जुलितैतात्मनः सतोऽस्य
कारणत्वमतः कथमुत्पत्तास्येकानवच्छेनमहत्त्वाप्रवेः पत्तइति पुत्तमधातवेदस्वब्रह्मज्ञितात्माधिका
दाहृदर्शनानुपपत्तेरित्यत आह वियत्पवनयोरिति । यथा हि वियत्पवनयोरमृतत्वात स्वसमयत्व
मतीश्च तेनतरविरोधापेक्षिकत्वेन नेति । एवं कारणत्वमात्मनोऽग्निविस्फुलिंगदृष्टांत
अतिविरोधात् प्रमाणांतरविरोधापेक्षिकत्वेन व्याख्यातव्या ॥ न चात्मनः कारणवत्वेऽन
वस्थातोहंगंधितामाव्रहत्वनादिताकार्यकारणपरंपरा याइति भावः ॥ तथापि विकारेस्यइति प्रमाणां
तरविरोधो दर्शितः ॥ एवं प्राप्त उच्यते । सदेकस्वभावस्योत्पत्त्यसंभवः ॥ ॥ कुतः । अनुपप
त्तेः सदेकस्वभावे हि ब्रह्मण्यपि तदसति बाधकेनान्यथयितव्यं ॥ उक्तमेतद्विकाराः सत्वेना
नुभूता अपि कतिपयकालकलातिक्रमेविनश्यंतो दृश्यंत इत्युत्पत्तिर्वचनीया न त्वेकात्मावच्छेदादि
ति ॥ न चात्मा तादृशः सर्वस्य अतेरनुभवाद्रूवर्त्तमानैकस्वभावत्वेन प्रसिद्धेः । तद्धि माहमात्मा
त्रे हि प्रवेशिताः एतदुक्तं भवति यत्स्वभावाद्धि चलति तदानिर्वचनीयं निर्वचनीयोपादाने पुत्रेव

वा॰ रा॰ २ तु विपर्ययः यथा रज्जूपादानः सर्पः न तु सर्पोपादाना रज्जुरिति। यथोक्तस्वभावात्प्रच्युतिश्च ययोर्निर्वि-
६ वचनीययोर्नोपादेयोपादानभावो यथा रज्जुशुक्तिकयोरिति॥ न च निरधिष्ठानो विभ्रम इत्याह नाध्य-
स्तत इति॥ न च निरधिष्ठानभ्रमपरंपरानादितेत्याह मूलप्रकृत्यनभ्युपगमे नवस्थाप्रसंगादिति॥
पारमार्थिको हि कार्यकारणभावोऽनादितीनवस्थया दुष्यति॥ समारोपस्तु विकारस्य न समारोपि-
तोपादान इत्युपपादितं माध्यमिकमतनिषेधाधिकारे तदत्र न प्रस्तर्त्तव्यं॥ तस्मान्नामरूपाधिष्ठा-
नविकल्पसमर्पणानादिता नोचितेत्यर्थः। आग्निविस्फुलिंगश्रुतिश्चोपाधिकरूपापेक्षयानेत-
व्यादेशमतिरोहितार्था॥ ये तु गुणादिकार्योत्पत्तिविषयमिदमधिकरणं वर्णयन्ति तु तैः सतो-
ऽनुपपत्तेरिति सूत्रं न व्याख्येयं॥ श्रुतिविरोधसमर्पणप्रस्तावे च तस्यासंगतिर्वेति व्याख्या वारि-
दिकालाहीनानुत्पत्तिप्रतिपादकवाक्यानवगमात्॥ तदलमेतावता॥ तेनोत्तरसूत्रमाह। यद्य-
पि वायोरग्निरित्यादिना पंचमीकारकविभक्तिरुपपदविभक्तेर्वलीयसीति नयमानेत-
यपरा युक्ता॥ तथापि ब्रह्मश्रुतिविरोधेन दुर्बलाप्युपपदविभक्तिरेवात्राश्रिता॥ ततश्चानेत

यद्दर्शेन परेयेषु वाक्यो रज्जि दिति श्रुतिः न च साक्षाद्धत्तजत्वं समवेतं हि स्वरूपत्वेन तज्जत्वं परं परयाश्र
यितु पुत्रे वाजपेयस्य प्रपत्र दिति प्राप्ते। एवं प्राप्त उच्यते॥ पुत्रे पशुयाग वाजपेययोरंगांगि नोर्नो ना
लात्तत्र साक्षात्तद्रूपत्वं सवेधे तन्नैव न परं परयाश्रयणं इहतु वायो ह्रविकारस्यापि बृहिणो वस्तु
तोऽनन्यत्वात् चोद्येन तेसाक्षात्वं द्रव्योपादानत्वोपपत्तेः॥ कारकविभक्तेर्वलीयस्त्वान्तु रोधे
नोभयथोपपद्यमानाः श्रुतया वाक्यस्य भोजिन्यापेनतिसम्पत इति पुत्र स्मितिराङ्कातः॥ पारे
पर्धवत्वे चीतिभेदन त्वनाभिप्रायेपतः पारेमा र्थिक समेदमाह वायु भाव पक्षोत्रौ लेति। यथा
तस्याः श्रुतमितितु दृष्टांतः परंपरा मात्र सामानेन न तु सर्वथा सामेनेति सर्वे मवदातं॥ आपः॥
निगदव्याख्यातेन भाष्यता व्याख्यातं॥ पृथिव्यादिकार रूप सामान्तरेभ्यः॥ अनुशब्दो पं वयुत्पन्न
च प्रवृत्ति छाव ब्रीहि यवाऽयंतद्धिकारे चोदने प्रवर्त्तते। श्रुतिश्च प्रवरणा दुलीयसीका च वाक्य शे
षेण पोहलिता यत्र वचन वर्धितीत्यनेन। तस्मादष्यवतायं ब्रीहियवाप्येवाज्ञा ड्को नायत इति
विवहितं। कोयमपि हितं भवति तस्य चिददनीयस्य नाहि पृथिव्यापिरू ष्यालोहितादिरूपा

वा॰ २।२ याश्च विदर्शिताः ॥ ततश्च अत्यंतरेणाग्रः पृथिवी पृथिव्या ओषधय इत्यादिना विरोध इति प्रवि-
पद्येः आत्यन्तिकविरोधेवक्तुं निविक्तत्वानुपपत्तेरन्यतमानुगुणतयाऽन्यतरानेतव्यात्तत्रादि-
८ मग्रः पृथिवीति पृथिवीशब्दोऽन्नपरतया नीयतामुतान्नमस्तु तेन तेलान्नशब्दः पृथिवीपरतयेति
विशये मतो भताधिकारानुरोधात प्राथमिकपृथ्वीरूपानुरोधाच्चातद्यदपो शरस्मामीदिति च
पुनः अत्यन्तरोधाच्च वाक्यशेषस्य चान्यथानुपपत्तेरन्नशब्दोऽन्नकारणे पृथिव्यामिति
शंकितः ॥ तदभिध्यानादेव तु तल्लिंगात्सः ॥ नन्वपि क्रमे मतानामविरोध उक्तः इदानीमाका-
शादिमताधिष्ठात्र्यो देवताः किं स्वतंत्रा एवोत्तरोत्तरभूतसर्गे प्रवर्त्तन्त उत परमेश्वराधिष्ठि-
ताः परतंत्रा इति ॥ तत्राकाशाद्युत्पत्तीयोग्निरितिस्वव्याकोनिरपेक्षाणां अतः स्वयं चेतनानां
च चेतनांतरापेक्षायांप्रमाणाभावात अनावस्थवालिंगस्य न पारंपर्येणापि मूलकारणस्य
ब्रह्मण उपपत्तेः स्वतंत्राण्येवाकाशादीनां वाय्वादिकारणत्वमिति प्राप्ते ब्रूमः योनित्वव्याघात
इति प्राप्ते एवं प्राप्ते अभिधीयते ॥ आकाशाद्युत्तरस्य पञ्चाकाशादीनां देवतानामुपादानमा

वमाचष्टते न पुनः स्वातंत्र्येणाधिष्ठातृत्वं॥ न च चेतनानां स्वकार्ये स्वातंत्र्यमिति तदप्येकांतिकं परतंत्रा
णामपि तेषां बहुलमुपलब्धेः भृत्यानां तेवास्यादिवत्॥ तस्माल्लिंगप्रकृत्यवसानं जगत्स्याथ स ईश्वर एव तेन
तेनाकाशादिभावेनोपादानभावेनावतिष्ठमानः स्वयमधिष्ठायनिमित्तकारणं अतः तैतं विका
रं वा सृष्टिकेस्सर्जतीति पुंसो इतरथा लिंगप्रकृत्यवाद्यलोशितो स्यातामिति॥ परमेश्वरो वैरावशादित्तिप
रमेश्वर एवांतर्यामिभावेनाविष्टबुद्धिता तस्मात्सर्वस्य कार्यजातस्य साक्षात्परमेश्वर एवाधि
ष्ठातानिमित्तकारणं न त्वाकाशादिभावमापन्नः॥ आकाशादिभावमापन्नो मुपादानमिति सिद्धं॥
विपर्ययेण तु क्रमोत उपपद्यते च॥ उत्पत्तौ महाभूतानां क्रमः आतोनाप्ययेक्रमप्ययमात्रस्य
आतत्वात्तन्नियमे संभवति नानियमः॥ व्यवस्थारहितो हि सः॥ न च व्यवस्थायां सत्यामव्यव
स्था युज्यते तत्र क्रमभेदपेक्षायां विरुद्धोप्ययक्रमो घटादीनां महाभूताप्ययक्रमनियाम
को स्वाहांश्रोत उत्पत्तिक्रम इति विशये श्रोतस्य श्रोतांतरमनपेक्षितं समानजातीयतयात स्यैव
बुद्धिसान्निध्यात॥ न दृष्ट विजातीयत्वात् तस्मात् श्रोते नैवोत्पत्तिक्रमेणाप्ययक्रमो नियम्यत इ

बा।रा।भा।

८

तिष्ठति। एवं प्राप्त उच्यते। अप्ययस्य क्रमापेक्षायां वरमुत्पत्तिक्रमो नियामको भवेत्। न त्वस्याप्ययस्य
क्रमापेक्षा स्यानुमानोपनीते न क्रमभेदेनास्त्यनुसारितोऽप्ययक्रमस्य बाध्यमानत्वात्।
तस्मिन् हि सति उपादानोपरमे ह्युपादेयमवतिष्ठत इति स्यान्न चैतदस्ति। तस्मान्नादिरेवेदृष्टो भावते
धाराकार्येव नास्ति क्रमोत्तरमत्पयोगपत्वात् तस्मात्तदिदमुक्तं न त्वत्र वृत्तोपपद्यते चेति। भाष्यकारो
वे प्याह न चासावयोग्यत्वात्पर्यन्तो कार्यत इति। तस्माद्युत्पत्तिक्रमाद्विपरीतः क्रम इति एतन्न्याय
मत्वा चास्मदितिरत्वा। अन्तरा विज्ञानमनसी क्रमेण तल्लिङ्गादिति चेन्नाविशेषात्। तदेवमाव
नोपयोगिनो भूतानामुत्पत्तिप्रलयौ विचार्य तु बुद्धिमनसोः क्रमं विचारयति। अत्र चाविज्ञा
यते नेति त्युत्पत्त्या विज्ञानमनसी देहेन्द्रियाणि बुद्धिं चक्रते। तत्रैतेषां क्रमापेक्षायामात्मानं चान्
तानि चान्तराल मान्यमानान्नैव पाठे न क्रमो नियम्यते। तस्मात्पर्वोत्पत्तिक्रमभङ्गप्रसङ्गः।।
यत आत्मनः करणानि करणेभ्य आभूतानीति प्रतीयते तस्मादात्मन आकाश इति मन्यते।।
अन्नमयमिति च मयडानन्दमय इति वन्न विकारार्थ इति जायते अभ्यधीयते विज्ञानत्वाज्ञावलन

६८

बा

प्रसक्तीनां कारणापेक्षायामनन्तमयप्रसङ्गादित्यादि लिंगा॥ श्रवणाद्यपेक्षितार्थकल्पनायाविशेषापित्वमे
वस्मयदेपुत्रस्मितरपात्वनपेक्षितसूत्रे भवेत् ॥ न चतदपि घटते ॥ नहि ज्ञानमयो यज्ञ इति वदन्नप्रा
दुर्षि मनुष्यः भवति ॥ एवं चेद्दूतावि कारामनस्मा देयो भतानां परस्मादुत्पद्यत इति युक्तं ॥ श्रोत्र वादि
तयामभ्युपेत्योहं स्यात्वभौतिकानीति ॥ भवतामनन्तववत्वरणानामुत्पत्ति: ॥ नखल्वेतावता भौतिका
नो न्यनौत्पत्तयां ॥ तथाचैकोजमन्मगसंगः विशिष्यते भयते भस्पत इति यावत् ॥ चतराचराय
पाश्रयकस्यात् तदुपदेशो भावकस्य प्रेवभावित्वात् ॥ देवदत्तादि नामधेयं तावन्न्ह्रीवात्मनोऽशरी
रस्यते नाम्नेशरीरावस्थादिकरणेनुपपत्ते: ॥ तस्मृतो देवदत्तो जातो देवदत्त इति व्यपदेश न
स्मरुयुद्यतंमनसा नस्य प्रविपद्य: शरीरलेशस्पर्शोतोऽस्मि स्वर्गादिफलसंबंधानुपपत्ते: शास्त्र
विरोधात्लौकिको व्यपदेशो भाक्तो व्याख्येयः ॥ भक्तोस्य शरीरस्योत्पादविनाशो तत्कृत्त्वयोग
इति जातकर्मादिरन्गर्भबीजसमुद्भवजीवपापप्रहेयापि नन्जीवराज्ञः पापप्रहे यापि ॥ अत
एव स्मरति ॥ एवमेनः शान्तयाति बीजगर्भसमुद्भवमिति ॥ तस्मान्न शरीरोत्पत्ति विना शान्यां

६६ भ

[illegible]

बा॰ २।३। जीवजन्मविनाशावितिसिद्धं॥ तत्त्व लौकिकव्यपदेशस्या भ्रांतिमूलत्वमभ्युपेत्याधिकरणं॥३॥ उक्तो लव
धासमाधेयस्य भ्रांतिमूलतेति॥ नामतो मस्य शरीरोदयव्ययाभ्यां स्यात्ताबुत्पत्तिविनाशौ॥
४ ज्ञाकाशादिवत्तु महासर्गादौ तदंते चोत्पत्तिविनाशौ जीवस्य भविष्यत इति शंकांतरमपनेतुमि
दमारभ्यते॥ नात्मा श्रुतेर्नित्यत्वाच्च ताभ्यः॥ विचारमूलस्य संशयस्य बीजमाह श्रुतीति विप्रतिप
त्तेरिति॥ तामेव दर्शयति नास्ति हि श्रुतिरिति॥ यदि पदेन गृह्णाति तत्प्रामाण्यमिति॥ परमात्मनस्तावद
विरुद्धधर्मसंसर्गादपहतपाप्मत्वादिलक्षणात् जीवानामन्यत्वं तेचेन्न विकारत्वात्
तावद तत्त्वबहुतरा हेतुश्रुतिविरोधः॥ ब्रह्मविज्ञानेन सर्वविज्ञानप्रतिज्ञाविरोधश्च तस्मात्श्रु
तिभिरनुज्ञायते विकारत्वे॥ प्रमाणांतरेण त्रोत्ते विभक्तत्वादाकाशादिवदिति॥ यथाग्नेः क्षुद्रा विस्फु
लिंगा इति च श्रुतिः सा हि त्वादेव ब्रह्मविकारत्वं जीवानां दर्शयति॥ यथा स्फुलिंगा व काद्यिति च ब्रह्म
णो जीवानामुत्पत्तिं वतत्र आप्यं नेमा हि त्वा दर्शयति॥ नन्वेतरा जीवानामुत्पत्तिप्रलयाववगमे
तेन जीवानामित्यत आह जीवात्मनामिति॥ यस्मादेतस्मात् श्रुतिष्वाकाशाद्युत्पत्तिरिव तस्माज्जी

वस्या

णोत्पत्तिर्नाम्नायते तस्मादात्मानयोगस्यानाम्नानात्तस्योत्पत्त्यभावं प्रतीम इत्यत आह न चनित्यस्य
वमाम्नाति॥ एवं हि तस्योच्चारवायामैमात तस्यकातिपयं गसहितस्यकमेण: सारवाच्चरीयांगोपरं
लार्णीन भवेत् तस्माद्धुतरऽकृतिविरोधात् नुम वेमाऽकृतिर्विकारभावापत्त्याव्याख्येया॥ तस्मा
दाकाशादिवज्जीवात्मा न उत्पद्यत इति प्राप्त उच्यते॥ भवेदेवं यदि जीवा ब्रह्मपरिणामे पेरन्॥ नतेव
ने जितस्य श्रुतेर्वानुप्रविश्यनैत्याद्यविभागश्रुतेः॥ औपाधिकत्वाच्च भेदस्य घटकरकाद्याका
शवच्चैतत्कर्ध्वमसंसर्गस्योपपत्तेः॥ उपाधीनां च नामोमय इत्यादीनां श्रुतेः अपर्सीनां चानित्य
त्वाजत्वादिगोचराणां श्रुतीनां दर्शनात्॥ उपाधिभावेन ये नोपहितस्येति च प्रतीम्नो तरसा
मते कथोपपादनात् आत्माऽऽविभागस्यैवेनोदेवः सर्वभूतेषु गूढ इति श्रुत्यैवे तत्ताच्चित्या
जीवात्मनो नविकारानन्नाद्वैत प्रतिज्ञाविरोध इति सिद्धं॥ भेदेभी ब्रह्मणाव्यस्त व्याख्यातम्
तिनेह व्याख्यातं॥ ज्ञोत एव॥ नाभीमांहि जानात्यापि व्याप्त भावेन भवति घट इव घटस्य
ज्ञाभावे। स्वभावस्याप्यचेतनस्य भावात् तथाप्यस्य ज्ञानस्याभावः तपाच नात्मत्वभाव

श्री० रा० २।

१. स्तैतन्यं तदनुवृत्तावपि चैतन्यस्याव्यावृत्तेः। तस्मादिन्द्रियादिभावाभावानुविधानाद् ज्ञानभावाभा
वयोरिन्द्रियादिसन्निकर्षापेक्षमागन्तुकमस्य चैतन्यं धर्मो न स्वाभाविकः। अत एवेन्द्रियादीनाम
इ पि वत्त्वं। तत्र चावैयर्थ्यमिन्द्रियाणां भवेत नित्यचैतन्य आत्मपक्षे शास्त्रप्रामाण्यापेक्षया। जाग्र
ज हि ज्ञानो[illegible]त्पादनशक्तिर्निर्जीवानां तदुत्पन्ने इवं इन्द्रियादिसन्निकर्षापेक्षा ज्ञानेन भवतीति॥
तस्माज्जड एव जीवा इति प्राप्तेऽभिधीयते॥ यदागन्तुकज्ञानं जडस्वभावं तत् कदाचित्स्यादेव
कदाचित्संदिग्धं कदाचिद्विपर्यस्तं यथा घटादि। नैवमात्मा॥ तथा ह्यनुभिमानोऽपरोक्ष
स्फुरन्नप्यानुभविकः॥ संदिहानोऽप्यसंदिग्धो विपर्यस्यन्नप्यविपरीतः सर्वस्यात्मा तथा १
चैतन्यस्वभावः न चैतन्यस्वभावस्य चैतन्यस्याभावः कस्यानित्यत्वात्। तस्माद्यतः क्रियाक
पः सर्वधर्मिकार्यभावे सुषुप्त्यादौ निवर्तते न चैतन्यमात्मस्वभाव इति सिद्धं। तथा च
नित्यचैतन्यवादिन्यः अतएव न कर्षविशेषेन व्याख्यातव्या भवन्ति॥ जं ध्यादि विषय
वस्तुपजने चेन्द्रियाणामप्यवर्तीति सर्वमवदातं। उत्क्रान्तिगत्यागतीनां॥ यथाप्याविवेत

स्यैव परमात्मनो जीवभावकथनाच्चानणुपरिमाणत्वं ॥ तथाप्युत्क्रान्तिगत्यागतीनां श्रुतेश्च साक्षा
दणुपरिमाणश्रवणस्य चाविरोधार्थमिदमधिकरणमित्याक्षेपसमाधानाभ्यामा[illegible]नुत्क्रेति ॥
सर्वप्रदेशगत्वाति त[illegible]प्राप्तेतावदिति विभागसंयोगोत्पादो हि उत्क्रान्त्यादीनां फलं ॥ न च सर्वगत
स्यतोऽतः ॥ सर्वत्र नित्यप्राप्तस्य वास्तवीतरवस्पवातदसंभवादिति ॥ स्वात्मना चोत्तरयोः ॥ उत्क्रा
मणं हि मरणेनानिरूढं तच्चाचलतोपि तत्र सतो देहस्वाम्यनिवृत्त्योपपद्यते ॥ न तु गत्यागती ॥
तयोस्त्वात्मनैव निरूढयोः कर्तृस्वभावयोर्व्यापिन्यसंभवादिति ॥ मध्यमं परिमाणं महत्त्वपरी
स्यैव तत्राहतपरीक्षायां प्रत्युक्तं ॥ गत्यागती च परममहति न संभवतोऽतः पारिशेष्यादणु
त्वसिद्धिः ॥ गत्यागतिभ्यां च प्रादेशिकत्वसिद्धौ मरणमपि देहादपसर्पणमेव जीवस्य न तु तत्र स
तः स्वाम्यनिवृत्तिमात्रमिति सिद्धमित्याह [illegible]तोऽगत्यागत्योरिति ॥ इतश्च देहादपसर्पण
मे[illegible]व जीवस्य मरणमित्याह देहप्रदेशानामिति ॥ तस्मादुत्यागत्यपेक्षोत्क्रान्तेरपि सापादा
नाणुत्वसाधनमित्यर्थः ॥ न चैवमपादानश्रुतेश्च्छरीरप्रदेशगतव्याप्तेरथ्यैवमेवेत्या

देहलाभादुत्क्रान्तिला उत्क्रमणं

ब्र
स

ना।२।३। हृत्स्नएतत्कोजोमात्राद इति॥ नाणुरतच्छ्रुतेरिति चेन्नेतराधिकारात्॥ यत्तु स्वोत्पादिश्रुतिभिर्जीवाना
मणुत्वं प्रसाधितं तत्तु व्यापकात्परमात्मन एवेषा तदधिकारात्तथामेरः॥ तथा च महत्वानंत्वादिश्रुतयः
११ परमात्मविषया न जीवविषया इत्याद्विरोध इत्यर्थः॥ यदि जीवोऽणुरेव तर्हि कोयोऽयं विज्ञानमयः
प्राणेष्विति कथं शारीरे महत्त्वं प्रतिबोधितेन प्रतिनिर्दिश्यत इति चोदयति नान्वेति॥ परिहरति शा
स्त्रदृष्ट्यापरमार्थदृष्ट्या निर्देशो वामदेववत् यथा हि गर्भस्थ एव वामदेवो जीवः परमार्थदृष्ट्या त
तो ब्रह्मत्वं प्रतिपेदे एवं विज्ञानमय ब्रह्मेत्यभेदवादस्य हात्म्यविज्ञानव्यपदेश इत्यर्थः॥ स्वशब्दो
न्मानाभ्यां च॥ स्वशब्दं विभजते साक्षादिति॥ उन्मानं विभजते तपोऽल्पमान सम्पीति उद्धृत्य मानो
न्मानं। बालाग्र उद्धृतस्य शततमो भाग कल्पस्यादपि शत तमा उद्धृतः शत तमो भाग इति॥
तदिदमुन्मानं सारसाद्धृतमाने मानगमनात्प्रेति। ननु अंतरमेव तावद्यितुं चोदयति। ननु अ
णुत्वे कथमिति॥ अणुरात्मा न शरीरव्यापीति न सर्वांगीणशैत्योपलब्धिः स्यादित्यर्थः॥ अवि
रोधश्चन्दनवत्॥ त्वक्संयुक्तो जीव स्त्वक् च सकल शरीरव्यापिनीति त्वग्व्याप्त्यात्मसंबंधः स

वींगीणे शैत्योपलब्धौ सममपि इत्यर्थः ॥ अवस्थितिवैशेष्यादिति चेन्नाभ्युपगमाद्धृदि हि ॥ चंदनविंदोः प्रत्यद
तोऽल्पीयस्त्वे तु व्याप्तृत्वात् कृत्स्ना भवति ॥ यस्य तु चंदिज्यमणोऽवस्य वींगीणं चकोर्यमुपलभ्यते तस्य व्या
पितमेत्वसर्वांगीणमपहायनेयं कृत्स्नानावकाशं लभत इति शंकार्थः ॥ नन्वहरिचंदनविंदुदृष्टान्तेनाणु
त्वानुमानं जीवस्य प्रतिदृष्टान्तसंभवेनानैकांतिकत्वादित्याह नाप्रनुमानमिति ॥ कोकान्तिमामपा त्रा
करोति अत्रोच्यत इति ॥ यद्यपि पूर्वोक्ताभिः श्रुतिभिरणुत्वं सिद्धमात्मनस्तथापि वैजवानन्त्र त्यंत
रनुपन्यासं ॥ गुणाद्वालोकवत् ॥ येनुमावयवत्वा चंदनविंदोरणुसंचारेण देहव्याप्तिरुपपद्यते न
त्वात्मनोऽनवयवस्याणुसंचारः संभवतीतस्माद्वैषम्यमिति मन्यते तान्प्रतीदमुच्यते गुणाद्वालो
कवदिति ॥ तद्भजते चैतन्येति ॥ यद्यप्यणुर्जीवस्तथापि तद्गुणश्चैतन्यं सकलदेहव्यापि यथा प्रदीप
स्याल्पत्वेपि तद्गुणः प्रभा सकलगृहोदरव्यापिनीति ॥ तदपि शंकाद्वयेण दूषयितुं दृष्टान्तांतरमा
ह व्यतिरेको गंधवत् ॥ अप्रदीपमाणमपि तदिति द्रपस्यात् सक्रत्र तथानुपलभ्यमानत्वे पत्ति
कंदते स्यादेतदिति विच्छिन्न प्रानामल्पत्वादित्युपलब्धोणुर्व्यतिरेकपरमाणूनामनुप्रवेशादित्यपि द्र

पा.।२।३। रव्यं ॥ विशेषानुप्रवेशाभ्युपगमे सत्तापि विशेषः स्यादस्मत्वान्नोपलभ्यत इति ॥ निराकरोति नन्वितरतो द्रिय
१२ त्वादिति ॥ परमाणूनां परमसूक्ष्मत्वात् अतीन्द्रियत्वादिवत् अध्यापि नोपलभ्येतोपलभ्यमानो वा स्व
स्मउपलभ्येत न स्थूलद्रव्यं ॥ प्रोक्षमतिं रोहितांपि ॥ पदार्थापदेशाद ॥ निगदव्याख्यातमस्य भाष्यं ॥
तद्गुणसारत्वात्तु तव्यपदेशः प्राज्ञवत् ॥ कटकं तादृनेपीति ॥ महद्दल्पयोः संयोगोऽल्पमवरुध्य
तेन महान्तं न तान्तु घटकरकादिसंयोगात् न अणोनमोव्याप्नुवते ॥ अपितु अल्पानेव घटकर
।अन तत्र। कादीनितरथापि तेनमहत्त्वं सर्वत्र घटकरकाद्युपलंभ इति ते चिन्त्यः ॥ परिमाणः प्रसज्जेपरत्निति ध्वन
न्यायेन जीवस्यास्य कलशरीरगता वेदनोपपद्यते ॥ पद्यप्यन्तः करणमणुतयापि तस्यत्वं वासंबन्धा
त् ॥ तचस्य समस्तशरीरव्यापित्वादेकदेशोपाधिस्थितात्वगधिष्ठितैव शरीरव्यापी जीवः सन्नोति स ना
कौशीरंशो त्पमनअभविनुत्वगिन्द्रियेणगृह्णाति ॥ अणुस्तु जीवो यत्रास्ति तेनशरीरप्रदेशेन तदनुभवेन तक्कि
सर्वेगीरणं तस्यास्सर्वाणीरणत्वात्कारतकोऽनेनुपादेशिकतयान सर्वजीरणोपलब्धिरिति वैषम्यं ॥ गु
णत्वमेवहीति ॥ इदमेव हि गुणानां गुणत्वं यदुपादेशात्वमत एव हि हेमेतेविषक्तावयवयवाप

दुःखमनुभवतीति संसादे शीतस्पर्शेनानुभूयमानेप्यनुद्भूतरूपेणोपलभ्यते यथा तथा मृगमदादीनां गंधव
हविःप्रकीर्णस्तस्त्वावयवानामतिसांद्रे गंधेनाभिभूयमानेरूपस्पर्शौ नानुभूयेते। तत्कस्य हेतोरनु
द्भूतत्वात्तयोर्गंधस्य चोद्भूतत्वादिति॥ नच द्रव्यस्य प्रदेशप्रसंगः॥ द्रव्यांतरावयवप्रसरणादत एव
कालपरिवासवशात्स्पहतगंधितोपलभ्यते॥ अपि च चैतन्यं नाम न गुणो जीवस्य गुणिनः किं
तु स्वभावः न च स्वभावस्यापि तद्भावस्याव्यापित्वेन तत्त्वच्युतेरित्याह यदि च चैतन्यमिति॥ तदेवं स्थि
तिस्मृतीतिहासपुराणसिद्धे जीवस्याविकारितयापरमात्मत्वेनपाश्रुत्यादितः परममहत्त्वानो
र्णात्वस्यातएवास्तांहनुरोधेन बुद्धिगुणसारतयाख्यारव्येयाइत्याह तद्गुणसारत्वादिति॥ तद्याच
त्तस्याबुद्धेरिति॥ आत्मनास्वसंबंधिन्या बुद्धेरूपस्थापितत्वात्तदपकर्षः॥ नहि शुद्धमुक्तस्वभा
भावस्यात्मनः क्लेशसंसारिभिरनुभूयते अपितु प्रोयं मिथ्याज्ञानदोषापनुनोस्त एव च प्रत्या
त्मनमनुभवगोचरः॥ न च शुद्धस्वभावस्य जीवात्मनः कूटस्थनित्यस्य सतइष्टा देषानुबंधसंभ
वइति बुद्धिगुणानांतेषांतदभेदाध्यासेनतद्धर्माध्यासउदसारावाप्यस्तस्य च च द्रष्टस्योविं

ब्रा॰रा॰भू॰ त्वस्य तोयपंकवद्बाधात्स इत्युपपादितमध्यासभाष्ये। तथा च बुद्ध्युपाधिकृतमस्य जीवत्वमिति बु
१३ द्धेरंतःकरणस्याणुतया सोऽप्यणुत्वव्यपदेशभाग्भवति नभ इव करकोपहितं करकपरिमाणं तथा
चोत्क्रांत्यादीनामुपपत्तिरिति निगदव्याख्यातमितरत्॥ प्रायणेऽसत्त्वमसंसारित्वं वा ततस्य कृ
तविप्रनाशाकृताभ्यागमप्रसंगः॥ यावदात्मभावित्वाच्च न दोषस्तद्दर्शनात्॥ यावत्संसारमा
त्मभावित्वादित्यर्थः॥ समानः सन्निति। बुद्ध्या समानः तद्गुणसारत्वादिति॥ अपि च मिथ्याज्ञाने
ति॥ न केवलं यावत्संसारमात्मभावित्वमागमत उपपत्तितश्चेत्यर्थः॥ आदित्यवर्णमिति प्रकाशरू
पमित्यर्थः॥ तमस इत्यविद्याया इत्यर्थः॥ तमेव विदित्वा साक्षात्कृत्य मृत्युमविद्यामत्येतीति यो
जना॥ अनुशयबीजं स्वपद्दी प्रकटयति नन्वसुप्तप्रलययोरिति॥ सता परमात्मना॥ अनुश
यबीजपरिहारः सूत्रेणोच्यते॥ पुंस्त्वादिवत्त्वस्य सतोऽभिव्यक्तियोगात्॥ निगदव्याख्यातमस्य
भाष्यं॥ नित्योपलब्ध्यनुपलब्धिप्रसंगोऽन्यतरनियमो वान्यथा॥ स्यादेतत्। अंतःकरणेऽपि सति तस्यानि
त्ये संनिधानात्तस्मान्नित्योपलब्ध्यनुपलब्धी न प्रसज्येते अपादृष्टविपाककादाचित्कत्वात्साम त

र्थ्यप्रतिबंधाप्रतिबंधाभ्यामंतःकरणस्य नायं प्रसंगः। तावकत्वे वांतःकरणेनात्मनो वेंद्रियाणां वा नं
किमंतर्गडुनांतःकरणेनेति चोदयति अथवान्यतरस्यात्मन इति अथवेति सिद्धांतं निवर्त्तयति सिद्धांतीञ्च
तेन चात्मन इति अवधानं स्वत्वं नुदुभयथाप्यभावा॥ न चैते आत्मनो धर्मास्तस्याविक्रियत्वात्॥
न चेंद्रियाणामेवैकेंद्रियव्यतिरेकेण्यं धादीनां दर्शनात्॥ न चते आंतरत्वेनानुमेयमानेनाबाह्येसं
भवतः॥ तस्मादस्ति तदंतरं किमपि यस्यैते तदंतःकरणं तदिदमुक्तं यस्यावधानेति॥ अत्रैवार्थे श्रु
तिं दर्शयति तथा चेति॥ कर्त्ता शास्त्रार्थवत्त्वात्॥ ननु तद्गुणसारत्वादित्यनेनैव जीवस्य कर्त्तृत्वभोक्तृ
त्वचलत्वमेवेति तद्युत्पादनमनर्थकमित्यत आह तद्गुणसारत्वाधिकारेणेति॥ तस्यैवेवप्र
पंचः प्रपंचत्वात्मा भोक्तैव न कर्त्तेति तन्निराकरणार्थं शास्त्रफलं प्रयोक्तरि तल्लक्षणत्वादित्या
हस्माभगवाञ्जैमिनिः। प्रयोक्ता यं नुष्ठातरि कर्त्तरीति यावत्। शास्त्रफले स्वर्गादिके तु तः प्रयोक्ता प्र
त्साधनतालक्षणत्वात् शास्त्रस्य विधेः कर्त्रपेक्षितोपायता हि विधिः॥ बुद्धिस्तु कर्त्री भोक्ता
चात्मा ततो यस्यापेक्षितोपायो भोक्तुर्न तस्य कर्त्तृत्वं यस्य कर्तृत्वं न तस्यापेक्षितोपाय इति किं

भा॰२।३।
१४
केनसंगतमितिया शास्त्रस्यानर्थकत्वमविषयमानाभिधेयत्वे तथा चाप्रयोजनत्वं स्यात्॥ यथा च तकुण
मारतयास्यावस्तुसदपि भोक्तृत्वं सांव्यावहारिकमेवं कर्तृत्वमपि सांव्यावहारिकमेव न तु मा
विकं॥ अविद्यावद्विषयत्वं च यथा शास्त्रस्योपपादितमध्यासभाष्य इति सर्वमवदातं॥ विहारोप
देशात्॥ विहारः संचारः क्रिया तत्र स्वातंत्र्यं नाकर्तुः संभवति तस्मादपि कर्ता जीवः॥ उपादाना
त्॥ तदेषां प्राणानामिंद्रियाणां विज्ञानेन तु श्नाविज्ञानं ग्रहणशक्तिमादायोपादाय इत्युपादा
ने स्वातंत्र्यं नाकर्तुः संभवति॥ व्यपदेशाच्च क्रियायां न चेन्निर्देशविपर्ययः॥ [illegible]पुचपमात्रमेत
न्नासमग्नुपपत्तिः॥ विज्ञानं कार्यतन्तुते सर्वत्र हि बुद्धिः करणरूपा करणत्वेनैव व्यपदिश्यते न
कर्तृत्वेन इह तु कर्तृत्वेन तस्माद्व्यपदेशविपर्ययः स्यात्तस्मादात्मैव विज्ञानमिति व्यपदिष्टः
तेन कर्तेति॥ स्वतंत्रोत्तरमवतारयितुं चोदयति अत्राह यदीति। प्रेक्षावान् स्वतंत्र इष्टमेवात्मनः सं
पादयेन्नानिष्टमनिष्टसंपत्तिरप्यस्योपलभ्यते॥ तस्मान्न स्वतंत्रः स्यापाच न कर्तेति तल्लक्षणत
त्स्येत्यर्थः॥ अत्रोत्तरं॥ उपलब्धिवदनियमः॥ करणादीनि कारकांतराणि कर्तृप्रयुक्तेन त

कर्तृवत्तौ व्याप्त

यं कारकांतरैः प्रयुक्त इत्येतावन्मात्रमस्य स्वातंत्र्यं॥ न तु कार्यक्रियायां न कारकांतरानपेक्षत्वमिति॥ ईदृशं
हि स्वातंत्र्यं नेश्वरस्याप्यत्र भवतोऽस्तीत्युक्तसन्नसंकल्पः कर्त्ता स्यात्॥ तथा चायमदृष्टपरिपाकवशादिष्टमभिप्रे
प्सुः सन्नात्मा धनविभ्रमेण निषेधायं व्यापारयन्ननिष्टमामुपादित्वनियमः कर्त्तृत्वं चेति न विरोधः॥ विषय
प्रकाशनमात्रप्रयोजनत्वादिति॥ नित्यचैतन्यस्वभावस्य खल्वात्मन इंद्रियादीनि विषयमुपनयंति तेन
विषयावच्छिन्नमेव चैतन्यं वृत्तिरिति विज्ञानमिति व्याख्यायते॥ तत्रास्यास्तित्वात्तत्त्वमित्यर्थः॥ शक्ति
विपर्ययात्॥ पूर्वं कारकविभक्तिविपर्यय उक्तः संप्रति कारकशक्तिविपर्यय इत्यपुनरुक्तिः॥ अविप
र्यये तु कारणांतरकल्पनायां नास्ति विसंवाद इति॥ समाध्यभावाच्च॥ समाधिरिति संयममुपलक्षय
ति धारणाध्यानसमाधयो हि संयमपदवेदनीया यथाहुः॥ त्रयमेकत्र संयम इति॥ अत्र श्रो
तव्यो मंतव्य इति धारणोपदेशः॥ निदिध्यासितव्य इति ध्यानोपदेशः॥ द्रष्टव्य इति समाधेरुपदेशः
यथाहुः॥ तदेव ध्यानमर्थमात्रनिर्भासं स्वरूपशून्यमिव समाधिरिति॥ सोऽयमिह कर्त्तात्मा समा
धावुपदिश्यमानः आत्मनः कर्त्तृत्वमवैतीति सूत्रार्थः॥ यथा च तक्षोभयथा॥ अंगांतरसंगतिमाह॥ एवं

ब्रा॰ २।३।
७५

तावदिति॥ विमृशति॥ तत्पुनरिति॥ पूर्वपक्षं गृह्णाति तत्रेति॥ शास्त्रार्थवत्त्वादयो हि हेतव आत्मनः कर्तृ
त्वमापादयन्ति॥ न च स्वाभाविके कर्तृत्वे संभवत्यस्त्यपवादे तदौपाधिकं युक्तमुपगंतुमतिप्रसंगात्
न च मुक्त्यभावप्रसंगोऽस्यापवादकः। यथा ज्ञानस्वभावो ज्ञेयाभावेपि न ज्ञो भवत्येवं कर्तृस्वभावो
पि क्रियावेशाभावेपि नाकर्ता तस्मात्स्वाभाविकमेवास्य कर्तृत्वमिति प्राप्तेऽभिधीयते॥ नित्यशुद्ध
बुद्धमुक्तस्वभावं हि ब्रह्मात्मभावो भयः श्रूयते तदस्य बुद्धत्वमसत्यपि बोद्धव्ये युक्तं वह्नेरिवासत्यपि दाह्ये
दग्धृत्वं तच्छीलस्य तस्यावगमात्॥ कर्तृत्वे तस्य क्रियावेशादवगंतव्ये न चानित्योदासीनस्य
कूटस्थनित्यस्यात्मनस्तु तस्यासंभवति॥ तस्य च कदाचिदप्यसंसर्गे कथं तत्क्रियायोगः नि
र्विषयायाः शक्तेरसंभवात्। तथा च यदि तात्त्विकोऽयं तद्विषयः क्रियावेशोऽभ्युपेयेत तथा सति तत्स्व
भावस्य स्वभावोच्छेदाभावाद्विनाशप्रसंगो न मुक्तस्यास्ति क्रियायोग इति। क्रियायाः दुःख
त्वान्न विगलितसकलदुःखपरमानंदावस्था मोक्षः स्यादित्याशयवानाह न स्वाभाविकं कर्तृत्व
मात्मन इति॥ अभिप्रायमबुद्ध्वा चोदयति ननु स्थितायामपीति परिहरति न निमित्तानामपीति शक्तेरा

कार्श्यायाशक्तिः स्वसत्तामात्रसंपादकसमाद्विपतिः॥ तथा च तयाद्वितेस्वकं त्वेदेव स्यादिति भावः॥ चोदयति
ननु मोहसाधनविद्यानादिति परिहरति न साध्यतापत्तेरिति॥ आत्मा कं तु न मोहः साध्योपि
तु ब्रह्म संवंतन्नित्यमिति॥ उक्तमर्थमुपायमाविष्करोति॥ अपि च नित्यमुक्तेति॥ चोदयति प
रं एवं तर्हि संसारीति॥ अयमर्थः॥ परस्यैकस्य संसारे तस्याविद्याप्रविलयेनैकेनैव सर्वमुक्तेर न
न्यविशेषानंतस्य सर्वसंसारोच्छेदप्रसंगः॥ परस्मादन्यस्य तु आदिसंघातएवेति तस्यैव तर्हि
मुक्तिसंसारे नात्म इति परिहरति नाविद्याप्रत्युपस्थापितत्वादिति॥ न परमात्मनो मुक्तिसं २
सारे तस्य नित्यमुक्तत्वात्॥ नापि तु आदिसंघातस्य तस्याचेतनत्वात्॥ अपि त्वविद्योपस्थापि
तानां तु आदिसंघातानां भेदात् तु आदिसंघातभेदोपधानात् आत्मैकोपि भिन्न इ
व विस्फोऽप्यविस्फुट इव तत्र ये कतु आदिसंघातापगमेन तत्र मुक्ता इवेतरत्र च बद्ध इव यथा
मणिकृपाणाद्युपाधिभेदादेकमपि मुखमनेकदीर्घमिव वृत्तमिव श्यामिवावदातमिव च प्र र
न्यत मोपधानेत गमे तत्र मुक्तमिवान्यत्रोपहितमिवेति नैकमुक्तौ सर्वमुक्तिप्रसंगः॥ तस्मान्न

ना॰ रा॰ २ परमात्मनो मोहसंस्पर्शो नापि बुद्ध्यादिसंघातस्य किं तु बुद्ध्युपहितस्य स्वात्मस्वभावस्य जीवभा
१६ वमापन्नस्येति परमार्थः ॥ अत्रैवान्वयव्यतिरेकौ श्रुतिर्दर्शयति तथा चेति ॥ इतश्चौपाधि
के यदुपाध्यासि मनो बुद्ध्याभ्यासस्याभिभवो दृश्यते इति दर्शयति श्रुतिरित्याह तथा स्वप्नजागरितयो
रिति ॥ अत्रैव वार्त्तिकं तत्रैवाचष्टे तदाहेति ॥ संप्रसादः सुषुप्तिः स्यादेतत्ता तदेह पादपादयः सं
गीतेरथवास्यादीन्व्यापारयन्संभवेद्बुद्धी परमात्मा त्वनवयवः केन मनः प्रभृतीनि व्यापा
रयेदिति वैषम्यं तद्दृष्टान्तेन स्पष्टयन्नाह तदिह दृष्टान्तश्चेति ॥ यथा स्वशरीरे रागादिमांस्तत्तदा स
र्वीवास्यादीनि तत्करणानि व्यापारयन्नुःखी तथा स्वात्मनाऽऽत्मस्थानीनः सुखी मनःप्रभृतीनि
तत्करणानि व्यापारयन्नुःखी ते तावता स्यमाप्यं न तु सर्वथा ॥ यथात्मीतीवोऽवयवोऽतरानये च
हः स्वशरीरे व्यापारयत्येवं मनःप्रभृतीनि करणान्तराणि व्यापारयतीति प्रमाणगम्यमेवेति
योगपर्यनुयोगानुपपत्तिः ॥ पूर्वपक्षे हेतुं ननु भाष्ये बहुशो यति यत्तेऽस्मिन्निति ॥ यत्परं तेन स्वास
एवशास्त्रार्थः ॥ कर्त्रेति तो पापभावनापरं चेतत्त्वं नदोर्नस्वरूपपरं ते न यपाल्लोकांक्षिद्धं नमी

रमपेक्ष्यस्य विषये प्रवर्त्तमानेन पुंसः स्वाभाविकं कर्तृत्वमवगमयितुमुत्सहते तस्मात्तत्त्वमसी
त्याद्युपदेशाविरोधादविद्याकृतेतदवतिष्ठते । चोदयति । ननु संध्ये स्थान इति ॥ औपाधिके हि क
र्तृत्वे नोपाध्युपगमे संभवतीति स्वाभाविकमेवमभ्युपगमइत्यर्थः ॥ अपि च यत्रापि करणम
न्तत्रापि केवलस्यात्मनः कर्तृत्वमवगतं स्वाभाविकमेवमुक्तमित्याह तथोपादानेपीति ॥
तदेतत्परिहरति न तावत्संध्य इति ॥ उपाध्युपगमोसिद्धो नैः करणस्योपाध्येः संध्ये प्यव
स्थानादित्यर्थः ॥ अपि च स्वप्नेपाहदं ज्ञानेनादृशो निहामेरोदयाहदिहादेचिवतत्रेति ॥ तथोपा
दानेपीति यद्यपि कर्तृविभक्तिः केवले कर्तरि श्रूयते तथापि कर्म्मकरणोपधानकृतमस्य कर्तृ
त्वेन मुख्यस्य नहि परशुसहायः छेत्ता केवलः छेत्ता भवति ॥ ननु यदि न केवलस्य कर्तृत्वमपि
तु करणादिसहितस्य तथा सति करणादिष्वपि कर्तृविभक्तिः स्यान्न चैतदस्तीत्यत आह भव
ति च लोके करणादिष्वपि कर्तृविभक्तिः कदाचिदन्यत्र विवक्षावशादित्यर्थः ॥ अपि चैयमुप
दानश्रुतिः करणव्यापारोपरममात्रपरा न स्वातंत्र्यपरा कर्तृविभक्तिस्तु भाजनीवलेपिपति

का॰रा॰२। वर्तीति वद् बुद्धिपूर्वकस्य करणव्यापारे परमस्पष्टत्वादित्याह अपि वास्मिन्नुपादान इति॥ य
१८ थायं व्यपदेश इति॥ यदुक्तमस्माभिर ... उपमात्रमेतदिति तद्दितः समुचितं सर्वकारका
णामेवेति॥ निर्लिप्तेति तदुल्लासलेति काष्ठानि दिमर्दि स्थालीति हि स्वव्यापारे सर्वे चाकर्तृत्वात ३५तं
लिं बुद्ध्यादीनां कर्तृत्वमेव न करणत्वमिति स्यात अत आह उपलब्धेर्हेतवो करणत्वान्नत्वेवं कर्ति
तस्यामेवात्मनः स्वाभाविकं कर्तृत्वमस्त्विति स्यात अत आह न चेतनस्यानुपलब्धावप्यस्य स्वाभाविकं
कर्तृत्वमास्तीति कस्मान्नित्योपलब्धिस्वरूपत्वादात्मनः। न हि नित्यस्वभावे चास्ति भावस्य
व्यापार इत्यर्थः। तदेवं तस्योपलब्धौ स्वाभाविके कर्तृत्वे समस्ती त्युक्तं नापि बुद्ध्यादेरुपलब्धिकर्तृ
त्वमात्मन्यध्यस्तं यथा तद्गतमध्यवसायादिकर्तृत्वमित्याह अहंकारपूर्वकमपि कर्तृत्वं
नोपलब्धुर्भवितुमर्हति॥ कुतः। अहंकारस्याप्युपलभ्यमानत्वात्॥ न हि शरीरादिवस्यापि
यागम्य तस्यामेव जातं भवति॥ एतदुक्तं भवति। यदि बुद्धिरुपलब्धीर्भवेत ततस्तस्यानुप
लब्धृत्वमात्मन्यध्यस्येत न चैतदस्ति। तस्माज्जडत्वेनोपलभ्यमानतयोपलब्धिकर्तृत्वानुप

पत्तेः॥ यद्वोपलब्धौ बुद्धेरकर्तृत्वे तदा पुंसो बुद्धेरुपलब्धृत्वे करणांतरं कल्पनीयं तथा च नाम मा
त्रे विसंवाद इति तन्न भवतीत्याह नन्वेवं सति करणांतरकल्पना बुद्धेरुपलब्धृत्वाभावात्। तर्हि
सिद्धानीमकरणं बुद्धिरुपलब्धा वा स्तो वानुपलब्धेत्यत आह बुद्धेः करणत्वाभ्युपगमात्। अथ माऽभि
संधिः॥ चैतन्यमुपलब्धिरात्मस्वभावो नित्य इति न तत्रात्मनः कर्तृत्वेनापि बुद्धेः करणत्वे॥ किं
तु चैतन्यमेव विषयावच्छिन्नं वृत्तिरिति चोपलब्धिरिति च व्यपदिश्यते। न स्वतंत्रा ताद्रूप्यावच्छेदे
वृत्तौ तु बुद्ध्यादीनां करणत्वमात्मनस्तु तदुपधानेनाहंकारपर्यंतं कर्तृत्वं प्रज्ञप्तमिति॥ परान्तु तद्बु
द्धेः॥ यदेतज्जीवानामौपाधिकं कर्तृत्वं तत्प्रवर्तनात्तिहेतोषु रागादिषु सत्स्वेनेश्वरमपरं
प्रवर्तकं कल्पयितुमर्हति ऋते प्रसंगात्॥ न चेश्वरो हेयपदापातरहितो जीवान् साधुकर्म
धुनि कर्मणि प्रवर्तयितुमर्हति येन धर्माधर्मौ वेदोपालंभाश्चित्त्यमुपपद्येत॥ सा
स्वतंत्रः कारणे कोऽधर्म एवं जीवत्स्वप्रवर्तयेन्नाधर्मे तत्र तत्स्वहितान् तत्त्वैः सर्वधा
र्मिका एवेति सुखिन एव स्युर्न दुःखिनः॥ स्वतंत्रास्तु रागादिप्रयुक्ताः प्रवर्तमाना धर्मा

ना॰रा॰दू॰ धर्म्मप्रपंचप्रपंचतो वैचित्र्यमनुभवतीतियुक्तं॥ एवं च विधिनिषेधयोरपि वक्तव्यमितरथा तु सर्वपात
१८ कोऽस्मत्तंत्रईश्वरेणैव प्रवर्त्यत इति कृतं विधिनिषेधाभ्यां न हि वल्लवदानेऽलमल्लिलोघनुप
मानं प्रत्युपदेशोऽपि वा न्याः तस्मादेष ह्येव साधु कर्म कारयतीत्यादि श्रुतयः समस्तविधिनि
षेधश्रुतिविरोधाल्लोकविरोधाच्च स्वर्थप्रशंसापरतया नेया इति ज्ञातेऽभिधीयते। एष ह्येव
साधु कर्म कारयतीत्यादयः तावत् श्रुतयः सर्वव्यापारेषु जंतूनामीश्वरतंत्रतामाह तत्र स्वति
वाधके न प्रशंसापरतया व्याख्यातुमुचिता॥ न च श्रुतिसिद्धस्य कल्पनीयतापेन प्रवर्तके
पुरागादिषु सत्स्वतत्कल्पना विरुद्धेता न चेश्वरतंत्रत्वे धर्म एव जंतूनां प्रवृत्तेः स्वरिवत्वमे
व न वैचित्र्यमिति युक्तं॥ यद्यप्ययमीश्वरो वीतरागस्तथापि पूर्वं जंतुकर्मापेक्षया जंतून् धर्मा
धर्मयोः प्रवर्तयन्नेष पक्षपाताभ्यां विषमो नापि निर्घृणः॥ न च कर्मप्रचयस्यादिमत्त्व
नादित्वात् संसारस्य न चेश्वरतंत्रत्वात् कृतं विधिनिषेधाभ्यामिति सांप्रतं॥ नहीश्वरः प्रवर्तयन् न
रपवन इव जंतून् प्रवर्तयति अपितु जंतूनां मनुरधमानो रागाद्युपहारमुखेन एवं चेष्टा

निष्प्राप्तिपरिहारार्थिनो विधिनिषेधावर्पयतो भवतः। तदनेनाभिसंधिनोक्तं परायत्ते विहित
नलेकरोत्येव जीव इति॥ तस्माद्विधिनिषेधयोरविरोधात् लोकस्य स्वफलदर्शित्वात् एष ह्येव सा
धुकर्म कारयतीत्यादिश्रुतेः॥ अज्ञो जंतुरनीशोयमात्मनः सुखदुःखयोः। ईश्वरप्रेरितो गच्छेत् स्व
र्गं वा श्वभ्रमेव वेति स्मृतेः ईश्वरतंत्रत्वमेव जंतोर्नो कर्तृत्वं न तु स्वतंत्रत्वमिति सिद्धं। ईश्व
रएव विधिनिषेधयोः स्थाने निपुणत्वात् पादिविधिनिषेधयोः फलेन हीश्वरेण तत्प्रतिपादित धर्मा
धर्मानिरपेक्षेण कृतमिति विधिनिषेधयोरानर्थक्यं॥ न केवलमानर्थक्यं॥ विपरीतं च प्रयता
इत्याह तथाहि विहितवादिरणमिति॥ पर्वोक्तस्य दोषः कृतनाशाकृताभ्यागमः प्रसज्येत जाति
हिताय मन्यत॥ अज्ञो नानीशस्य देवादन्यायावीपत्ति शक्तित्वादित्वमप्यापतत्येव॥ अवोतर
संगतिमात्रमीश्वरयोरिति॥ प्रयोज्यप्रयोजकभाव उपकार्योपकारभावः॥ अत्रापातितो विनि
गमनाहेतोरभावात् अनियमोऽतिप्रसंगश्च स्युः॥ नि अंहे तामासदर्शनेन भेदप्रद्मालेख्या
हतमेवेति॥ ईशितव्येशितृभावस्य व्याप्यव्यापकभावस्य द्वैयतात् भावस्य नियम्यनियंतृभाव

य

ब्र॰ २।३। वस्थाधाराधेयभावश्च जीवपरमात्मनोर्भेदे कल्पते [illegible] च ब्रह्मदासा ब्रह्मकितवा इत्याद्याः श्रुतयो द
९८ शा ब्रह्मकितवा ब्रह्मेत्यादि प्रतिपादनपराज्जीवानां ब्रह्मणो भेदे ऽवकल्प्यते [illegible] चैताभिर्भेदाभेद
प्रतिपादनपराभिः श्रुतिभिः सादात्म्यप्रतिपादकाः स्वमते वर्णितत्पादोऽस्य विश्वा भूतानीत्यादेः
स्मृतेश्च ममैवांश इत्यादेर्जीवानामीश्वरांशत्वसिद्धिः [illegible] निरतिशयोपाधिसंपन्नश्चाविभक्ति
योगेनेश्वरः स्वांशानामपि निरुपाधीनामीष्ट इति युज्यते नहि तावदनवयवस्येश्वरस्य जी
वा भवितुमर्हन्त्यंशाः अपि च जीवानां ब्रह्मांशत्वे तद्गता ब्रह्मणो वेदना भवेत् पादादिगता इव
देहिनो देवदत्तस्य ततश्च ब्रह्मणः तस्य समस्तजीवगतवेदनानुभवप्रसंग इति व
रं संसार एव मुक्तेः तत्र हि स्वगतवेदनामात्रानुभवान्नमपि दुःखमनुभवति मुक्तस्तु स
मस्तजीववेदनाभागिति प्रपन्नो न मुक्तेरनर्थबहुलतया परिहर्तव्या स्यादिति ॥ तथा भेदा
भेदयोः परस्परविरोधिनोरेकत्रासंभवाद् भेदांशो जीवानां न च ब्रह्मैव सदसत्तस्तु जीवा इ
ति युक्तं सुखदुःखसंसाराद्यवस्थाभावप्रसंगात् ॥ अनुदाहरणाभावप्रसंगाच्च ॥ तस्माज्जी

वा एवापरमार्थसंतो न ब्रह्मैकमद्वयं॥ अद्वैतस्यातयन्तु ज्ञातिदेशकालाभेदनिमित्तोपनाशादिति प्रातेभि
धीयते॥ अनधिगतार्थबोधनानि प्रमाणानि विशेषतः शब्दः॥ तत्र भेदे लोकस्यैव तावन्मादेन प्राति
पाद्य॥ अभेदस्यानधिगतत्वाद्धिगतभेदानुवादेन प्रतिपादने महिता येनैवावसमुपजम्यते मध्ये व
च परामृश्यते अतैवोपसंह्रियते तत्रैव तस्य तात्पर्यं। उपनिषदस्याद्वैतोक्रमतत्परामर्शी तदुपसंहारा
अद्वैतपर एव पुर्ज्यंते। न च पत्पराक्तदेपवाथिकं पुनः॥ अभ्यासेऽपि भेदपरत्वमर्थस्य संभवति नाल्प
त्वमप्प्रागेवोपचरितार्थत्वमित्युक्तं तस्मादद्वैते भाविके स्थिते जीवभावः तस्य ब्रह्मणोऽनाद्यनिर्वच
नीयाविद्योपधानभेदादेकस्यैव बिंबस्य दर्पणाद्युपाधिभेदात्प्रतिबिंबभेदः॥ एवं चानुज्ञापवित्रहारे
लौकिकवैदिकौ सुखदुःखमुक्तिसंसारव्यवस्था चोपपद्यते न च मोक्षस्यानर्थबहुलता। यतः प्रति
बिंबानामिव रूपामतावदातत्वादि जीवानामेव नानावेदनाभिसंबंधो ब्रह्मणस्त्वाविवस्येव नेतदप्यसं
वेद्यः॥ यथा च दर्पणापनये तत्प्रतिबिंबं बिंबभावेनावतिष्ठते। रूपासोप्रातिबिंबितमपि॥ एव
मविद्योपधानविगमे जीवो ब्रह्म भवेदिति सिद्धं॥ जीवो ब्रह्मणा शश्वत तत्र तयानत्वेश इति तात्पर्यार्थः॥

वे॰।२।३। सप्तदशसंख्यापरिमितो राशिर्गणः सप्तदशकः॥ तत्र पांचबुद्धिकर्मेंद्रियाणि वा प्राणानि दशप्राणाबुद्धि मनसीवृ
त्तिभेदमात्रेण भिन्नो अप्येको वस्त्वेक मंतःकरणं शरीरे पंचविषया इति सप्तदशको राशिः। अनु
२० ताविध्यरमिमतो ननु प्रवृत्त प्रवर्तना। अपो न बेपेप्रवर्तीपितुरर्मि प्रापानुरोधात्संभवात्॥ ब्रू
त्वपीपामग्नीषोमीयहिंसा पांप्रवृत्त प्रवर्त्तीनानुपपत्तेश्च॥ उ॰ आर्षेपि निषमांशेऽप्रवृत्तेः। कः पु
नर्देहसंबंधः नहि कूटस्थस्यानित्यस्यात्मनोऽपरिणामिनोऽस्ति देहेन संयोगः समवायो वाऽन्यो
वा कश्चित्संबंधः स्वकलधर्मातिरिक्तादित्यभिसंधिः॥ उत्तरं देहादिसंघातोऽहमेवेत्यात्मानि वि
परीतप्रत्ययोत्पत्तिः। अपसर्पः॥ सत्यं नास्ति वास्तवो देहादिभिः पारमार्थिकः संबंधः किंतु अनादि
श्री जनितात्मविषयाविपर्यासा तावदिरहमेव देहादिसंघात इत्येवंरूपा। अस्यां देहादिसंघातात्मता
ध्यासेन मानसे तेजसो पंसावृतः तादात्म्यलक्षणः संबंधो न पारमार्थिक इत्यर्थः॥ गरूडाभिसं
ध्यश्चोदयति॥ सम्यग्दर्शिनः स्नाहीति॥ उत्तरं न तस्येति यदि सत्यैः स्फुटलभेदादिसंघातोऽविद्यो
पदर्शितः एकमेवाद्वितीयं ब्रह्मात्मेति सम्यग्दर्शनमभिमतं श्रद्धातदहं तं प्रति विधिनिषेधयोरन

समाप्तमदल्लेखितः

र्षसमेव॥ एतदेव विशदयति हेयोपादेययोरिति चोदकेनिगदाभिसंधिमाविष्करोति शरीरव्यतिरेकदर्शी
न एवामुष्मिकफलेषु कर्मसु दक्षिणासमासादि श्रुतिनियोज्यत्वाभिमानितिचे परिहरति न तत्संहतत्वाभिमानात्
एतदुक्तं भवति तत्त्वाभिमानिति॥ यो ह्यात्मनः षाट्कौशिकादेहाद्व्यतिरेकं वेद न तु समस्त बुद्ध्यादिसंघा
तव्यतिरेकं तस्यामुष्मिकफले ऽधिकारः समस्त बुद्ध्यादिव्यतिरेकवेदि न तु कर्तृत्वेनात्मनोऽत्वाभिमानर
हितस्य नाधिकारः कर्मणि तथा च न यथेष्टचेष्टाक्रमे मानाविकलस्यतस्याकर्मप्रभावादिति॥ तेषां तु
रवकुः संख्यानां वैशेषिकाणां च सुखदुःखव्यवस्था पारमार्थिकी मिथ्या तावहवात्मानश्च सर्वगताः तेषामे
वैषव्यतिकरः प्राप्नोति तत्र प्रसङ्ग परवेक संरख्यान्प्रतिव्यतिकरं तावदाह कपालितेति। यादृशा ... दृशो गुरूणां
संबन्धः सर्वान्पुरुषान्प्रत्यविशिष्ट इति तत्र तेन सुखदुःखे सर्वान्प्रत्यविशिष्टेन च कर्मणा निबन्धनाव्य
वस्थाकर्मणः प्रावृत्तत्वेन प्रवृत्ते असमाधारणत्वेनाव्यवस्थाता वदवस्थात् चोदयति तस्यादेतदिति॥ तद
र्थ्यः॥ न च प्रधानं स्वविभक्तरव्यापनायप्रवर्तते किंतु पुरुषार्थं च पुरुषं प्रत्येन्य भोगापवर्गौ
पुरुषार्थौ साधितौ तं प्रति समाप्ताधिकारतया न प्रवर्तते॥ पुरुषान्तरं प्रत्यसमाप्ताधिकारं प्रवर्त्तत एव

वा॰२।२।
चमुक्तसंसारिव्यवस्थोपपत्तेः सुखदुःखव्यवस्थापि भविष्यतीति ॥ निराकरोति न होति ॥ सर्वेषां पुरुषाणां
विभुत्वात्प्रधानस्य च साधारणत्वादसंबंधप्रत्यासत्तेनेन नापि साधितदुःखेतदेव नास्ति ॥ तस्मात्प्रत्याउ
२१
नवशेन विना हेतुं व्यवस्थाऽऽश्रयपास्मा चायुक्ता हेतुभावादित्यर्थः ॥ भवतु संसारव्यानामव्यवस्था
प्रधानसमा वा पाददृष्टस्य प्रधानस्य साधारणत्वात् कारणादादीनां त्वात्मसमवायादृष्टं प्रत्यात्म
मसाधारणं तत्कृतश्च मनसा सहात्मनः स्वस्वामिभावलक्षणः संबंधो नादिरदृष्टभेदाना
मनादित्वात् । तया च मनः संयोगस्यासाधारणत्वेपि स्वस्वामिभावस्यासाधारणत्वादसिद्ध्यादि
व्यवस्थोपपद्यत एव ॥ न च संयोगोपि साधारणः नहि तस्य मनसः सर्वात्मभिरतैर्वैः संयोगः सर्वव
स्वामिनापि । आत्मसंयोगस्य प्रतियोगिभेदेन भेदात ॥ तथा दानेकत्वस्यागमस्येषुत्वात् ॥
व्यवस्थापकाश्रेकत्वेप्युपपत्तेर्नानेकात्मकल्पनागौरवादागमविरोधाच्चाश्रेत्यादि रूपत्वे
न च भेदकल्पनापामन्यो न्याश्रयापत्तेः भेदहितकल्पना ततश्च भेद इति ॥ एतदेव कारणं दमतदू
षणं भाष्यकृतानुभोठवादितपाकाणादान्त त्यपापद्दष्टानियमादित्यादीनि सूत्राणि योजितानि

सांख्यमतदूषणम्। परास्तेवेति शोचयंते केचित्तदास्तां तावत्॥ इति श्रीवाचस्पतिमिश्रविरचिते
भगवत्पादशारीरकभाष्यविभागे भामत्यां द्वितीयस्याध्यायस्य तृतीयः पादः समा
प्तः॥ संपादितः श्रीधरेण॥ श्री ॥ श्री ॥ श्री ॥ ॥